जननीमर्त्यगणस्यतावत् ३४ कामौनसंव्रजतिनाशमनेकजन्म मोहांधकारगमने
विमलानुरागे नानामुखानुचरणेनविधूपवक्ता येकर्ममार्गममलंपरितोवदंति ३५
नान्येवतन्मतिविमोहनसुदमाणि संवर्द्धयंतिपशुपाशमखंडमत्रै कल्पांतका
लमवधायनवाजपाव काप्युत्तरेतिपरमात्तवशक्तिराद्ये ३६ संसारमेवककवलेसहसा
विधाया सैवस्वयंभवतिचोत्तररहीनरूपा जानुत्तरेतितवशक्तिरुदारचित्ते सापिस्वयं
भवतिसंहृतिविघ्नजाला ३७ त्वन्पीडितातदनुतेकरुणाकटाक्ष पातेनतत्त्रिभुव
यांतिचयान्यचाव कर्मेतिकेपिखलुकेपिवदंतिकाले केपिस्वभावमपिकेपिवदंदेवं ति १२
३८ भक्तोस्वयंसमदनेमुकुतनाधिवासा त्वांकौलिकीमितिवदंतिनभाग्यहीना नारायणा
स्यगिनचक्रगतिर्यदासीत् त्यक्तापितांकमपिशंभुरियोगं ३९ यातापिविच्युतमुधांगव
नोवभूव शेषश्चकेपचवकमस्त्रमहारिरीद्रैः त्यक्तायतंचधनदोपिकपालिवेष ४०
त्वामहीपरिचचारविनाद्वितीयं वं पाशीकरेणनिजपाशमपाश्रयतीरे पातालमेवभव-
नोभवनेचकारः शाच्याशचीपतिरपिप्रविधायमंत्रं मध्येवदेविनचधर्षणमस्तुनो
वा ४१ किंचाहमत्रनिवसेनभयेननाके शैक्षैववकंजसदनेकूनाधिवासा अंभोजि
नीपतिरपिप्रकटप्रभाव त्यक्तास्वलोकमपिशंकरमाजगाम: ४२ तत्वाकम
ब्धभवभावसमाधियोगं दुद्राववयोजनमहस्वमपारमार्गः प्रेताधिपोपिपितुरं
तिकमाशुगत्वा हृष्टाभयेनपरिहीनकुलंदिनेशं ४३ तत्याजवाहनमपिप्रकटप्रभा-
वं स्वचक्रेकथ्याचवहुधाविपलायतेस्म एवंयदीयमपिनामशशांकुन्निशम्य त
त्रामतुल्यमपिनाममहेशकादि ४४ श्राकर्णीदेवगणासहसानिलिल्यु नीरेवनेगि

विद्वरीषुपराशयेषु सोयंमहामहिषरूपधरोमहीया मेकक्षणेननिजतुच्छकलोप्यरूपात् नीतोंततास्तपदिदेवनिकायकार्यमार्गी त्वानामहोत्सवपरानकृतप्रभावान् ४५ किंवर्णयामितवदेविमहानुभावं वेदागमादिनिचयैरपिसूक्ष्मतत्वे नोवर्णितंयदिहवर्णितमंवयेतत्कारुण्यतस्तवविपारमतीवसत्यं ४६ धन्यासिदेविगिरिजेजाताऽनेमतिरुज्वला कुलकल्याणनाम्नीहतत्वेनाहंप्रतोषिता येकेचदपिचान्येच स्तोत्रेणकृतनिश्चयः तोष्यंतिकौलिकाभूत्वाकुलधर्मसनातनो ४८ तेषांमितिस्थिरानित्यंभविष्यतिममाज्ञया ममस्तोत्राणियावंतिह्यागमेनिगमेपिच तेषांयत्पाठतोवारलक्षपुण्यंप्रजायते तत्पुण्यमस्यलोकस्यवारैकंस्यपठितस्यच भविष्यतिमहाभागेनान्यथावचनंमम: ५१ इतिश्रीरुद्रयामलतंत्रराजेसंध्यातर्पणादिकुलकल्याणवर्णनंनामचतुर्दशःपटलः १४ श्रीभैरवउवाच शृणुदेविप्रवक्ष्यामिन्यासकांडंसुदुर्लभम् येनकृत्वासाधकेंद्रकोटिपूजाफलंलभेत् स्वगृहेमार्गत्यद्वारेस्थित्वा हुंफट्स्वाहा इतिक्रोधदृष्ट्यापार्श्वद्वयम्‌वीक्ष्यपश्चादवलोक्यसुमनाभूत्वागृहांतःप्रविश्य ॐह्रींविस्मुरुद्ध धर्मपापानिशमय प्रक्षेपंवकुल्यमपनयहुंफट्स्वाहेति हस्तौपादौ प्रक्षाल्य ह्रींस्वाहेतित्रिराचम्य कुशःहस्तःपूजापीठंध्यायेत् यथापुष्पमण्डपंतत्रसंचिंत्यतत्रकल्पद्रुमंस्मरेत् तन्मध्येमणिपीठंनानामणिपीठंनानामणिलंकारभूषाढ्यंमुद्रिदेवैश्वभूषितं शिवाभिर्वहुमांसाण्यस्थिमोदमानाभिरावृतंचतुर्दिक्षुशिवामुंडाचितांगारास्थिभूषिता इतिपीठंध्यात्वाक्रमेणपूजयेत् पुष्पमण्डपायनम: कल्पद्रुमायनम: मणिपीठायनम: नानामणिभ्योनम: नानालंकारेभ्योनम: मुनिभ्योनम: देवताभ्योनम: शिवाभ्योनम: शवेभ्योनम: मुंडेभ्योनम: चितांगारास्थिभ्योनम: इतिबहिःसंपूज्यगृहद्वारस्यदक्षिणेतरयोरुपर्यधश्चगंगणेशायनम: क्षंक्षेत्रपालायनम: द्वंद्वारश्रियेनम: दंदेहल्येनम: द्वाराभावेएवंपरिकल्प्यसंपूज्य तालत्रयंपूर्वकंतद्वारमुद्घाटयित्वाघ्येकुसुमाक्षताद्वाराचालयनयोगेनप्रसर्पन्तुयेभूतायेभूताभुविसंस्थिता येभूताविघ्नकर्तारास्तेनश्यन्तुशिवाज्ञया इत्यनेन ॐसर्वविघ्नानुत्सार्यहुंफट्स्वाहेति गृहांतःप्रविश्यतस्मंनिर्गच्छतां।

ॐ पवित्रवज्रभूमे हुं फट् स्वाहेति रक्तचंदनादि स्वासनभूमौ संपूज्य ॥ ४

विघ्नसंघानां स्ववामांगसंकोचेन मार्गं दत्त्वा वामपार्ष्णिघातत्रयेण भौमान् तालत्रयेण अं-
तरिक्षगान् दिव्यदृष्ट्यवलोकनेन दिव्यान् इति त्रिविध विघ्नानुत्सार्य वामपादपुरः
सं(?)तः प्रविश्य ॐ रक्ष रक्ष हुं फट् स्वाहेति यागभूमिं प्रोक्ष्य पूजापीठस्य चतुर्दिक्षु गंग-
णपतये नमः वं वटुकाय नमः क्षं क्षेत्रपालाय नमः यं योगिनीभ्यो नमः इति संपूज्य भू-
मौ त्रिकोणमंडलं कृत्वा तत्राधारशक्तिकमलासनादिभ्यो नमः इति संपूज्य तत्रास-
नं संकल्प्य तदुपरि शिवसूत्रं कुशविष्टरं कृत्वा पठेत् मेरुपृष्ठ ऋषिः सुतलं छंदः कूर्मो
देवता आसने विनियोगः पृथ्वीत्यासनमंत्रस्य पृथ्वी त्वया धृता लोका देवि त्वं विष्णु-
ना धृता त्वं च धारय मां देवि पवित्रं कुरु चासनं इति प्रार्थयित्वा इति धृत्वा कुशानुपयं-
त सुरेखे वज्ररेखे ॐ हुं फट् स्वाहेति मनेनमंडलं सृत्वा तत्रोपविश्य पाविजयो स्वीकुर्यात ।
तत्रासने मौनी योपविश्य त्रिपुरांसुयोगेनाक्षतादिकं ना अपसर्पंतु ये भूता ये भूता भुवि सं-
स्थिता ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया सर्वविघ्नानुत्सार्य हुं फट् इति वा-
मपार्ष्णिघातत्रयेण ऊर्ध्वं तालत्रयेण दिव्यदृष्ट्या च त्रिविधविघ्नानुत्सार्य्य वाम-
कर्णे गुरुभ्यो नमः दक्षिणे गंगणपतये नमः मध्ये श्रीपरदेवतायै नमः आनंदमानंदकरं प्र-
सन्नं ज्ञानस्वरूपं निजबोधयुक्तं योगींद्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामि
इति प्रणम्य मितिज्ञात्वा संविदं स्वीकुर्याद्यथा ॐ संविदे ब्रह्मसंभूते ब्रह्मपुत्री सदानघे ।
ब्राह्मणानां च तृप्त्यर्थं पवित्रं भव सर्वदा ॐ ब्रह्मण्यै नमः स्वाहा सिद्धमूलमये देवि ह्री
नबोधप्रबोधिनी शत्रुपक्षनिसूदनी ऐं क्षत्रियायै नमः स्वाहा अज्ञानेंधनदीप्ताग्ने ज्ञानाग्नि
ब्रह्मरूपिणी आनंदस्याहुतिं प्रीतिं सम्यज्ज्ञानं प्रयच्छ मे क्लीं वैश्यायै नमः स्वाहा नम-
स्यामि नमस्यामि योगमार्गप्रदर्शिनि त्रैलोक्यविजये मातः समाधिफलदा भव क्लीं
शूद्रायै नमः स्वाहा ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतं स्रावय स्रावय आकर्षयाक-
र्षय सिद्धिं देहि देहि श्रीबाला त्रिपुरसुंदरी पदमेव शमानय मानय स्वाहा मूलेन सप्तधा
जप्त्वामिति कृत्य मूलेन देवीमावाह्यावाहनादिमुद्राः प्रदर्श्य स्वशिरसि वक्ष्यमाणगु-
रुं चतुष्टयं संपूज्य स्वहृदये सांगायै स्वेष्टदेवतायै संतर्प्य ऐं वद वद वाग्वादिनि मम जि-
ह्वाग्रे स्थिरीभव सर्वसत्त्ववशंकरी स्वाहा इति मुखे जुहुयात् आनंदमयो भूत्वा चतुर्दि-
क्षु प्रकारं संचिंत्य प्राणायामं कुर्यात् तत्र प्राणं वामघोडशवारं जपं दक्षांगुष्ठेन दक्षिण

गुरुं

श्रीगुरुं

हं

रु॰या॰
४७

47

सापुटंनिरुध्य वामेनपवनंपूरयेत् तमेवचतुःषष्टिवारमुच्चरन् दक्षनासाकनि।
ष्ठिकाभ्यांवामंपुटंनिरुध्यपवनंकुंभयेत् ततस्तमेवद्वात्रिंशद्वारमुच्चरन् वामंपुटं
निरुध्य दक्षरेचयेत् इत्येक एष एव विपर्ययेनद्विपर्ययेनद्वितीयः प्रथमंतृती
यः इतिप्राणायामंकृत्वा भूतशुद्धिंकुर्यात् यथामूलाधारात्स्वातःकृत्वोत्क्रमे
ण हंसः इतिमंत्रेण देवींपृथिव्यासहस्वाधिष्ठानेसमानीय तत्रदे[illegible]जलेतांलीनां।
विचिंत्य तस्माज्जलेसहमणिपूरेसमानीय तत्रवह्नौजलंलीनंविचिंत्य तस्माद
ग्निनासहअनाहतेनीत्वा तत्रवायौवह्निंलीनंविभाव्य तस्माद्वायुनासहगृहीतजी।
वात्मानंविशुद्धौसमानीय तत्राकाशेवायुंलीनंविचिंत्य तस्मादाकाशेसहाज्ञाच
क्रेसमानीय तत्रस्थमनस्याकाशंलीनंसंचिंत्य मनोनादेन नादध्वनौध्वनिंपरशा
क्तौतांपर[illegible]क्तिंसहस्रदलस्थतेजोमयपरमशिवेनसहैकतांनीत्वावामकुक्षिस्थि
तंपापपुरुषंकज्जलप्रभं ब्रह्महत्याशिरस्कंस्वर्णस्तेयभुजद्वयं सुरापानहृदायु
क्तं गुरुतल्पकटिद्वयं तत्संसर्गपदद्वंद्वमंगप्रत्यंगपातकं उपपातकरोमाणंर
क्तश्मश्रुविलोचनं अधोमुखंकृष्णवर्णमंगुष्ठपरमाणकं खड्गचर्मधरंक्रुद्धं।
पापकृद्दोविचिंतयेत् इतिपापंसंचिंत्य प्राणायामविधिनावामनासापुटेन यं
बीजेनवायुनापूर्य नाभिस्थषट्कोणेश्रृंसंयोज्यमितिकृष्णवर्णंविचिंत्य कुंभकेन
वायुनापापंसंशोष्य दक्षेण वायुंविरेच्य दक्षेणरंबीजेनपूर्य मूलाधारेसंयोज्य
बीजंविचिंत्यकुंभकेनवह्निमातंसंदह्य भस्मनायुतंवायुवामेनविरेच्यवामेनवंबीजे
नापूर्य ब्रह्मरंध्रेसंयोज्यबीजेशुक्लवर्णंध्यात्वाकुंभकेनामृतधारयाभस्मप्लुतंज्ञात्वा।
दक्षेणविरेच्य पुनर्दक्षेणलंबीजेनापूर्यमूलाधारेसंयोज्य बीजपीतंसंचिंत्य
कुंभकेनभस्मघनीकृत्यवामेनविरेच्य पुनर्वामेनवामेनमायाबीजेनवायुनापू।
र्य मूलाधारेबीजंबालार्कवर्णंसंचिंत्य कुंभकेनकरचरणादियुतंस्वदेहंनिष्प
न्नंविभाव्यवायुंदक्षपुटेनविरेच्य इतिस्थूलशरीरंनिपात्यसूक्ष्मशरीरंनिष्पाद
त ततोबीजेनपरमशिवात्परशक्तिंनिस्सार्य तस्याकाशध्वनिं तस्मान्नादं ततोबिंदुं
तस्मात्कुंडलिनीं ततो मनः ततः सोहमितिमंत्रेण हंस इतिक्रमेण साःवीनस्थाप
यन् जीवात्मानंहृदिसंस्थाप्यकुंडलिनींस्थापयेदितिभूतशुद्धिंकृत्वा ततोनिरस्तत

रक्तवर्णं

कलकलुषं देवताराधनतत्परायोग्यं स्वदेहं विभाव्य प्राणप्रतिष्ठां कुर्यात् यथा तथो
क्तं ज्ञानार्णवे मुखे हृन्मंत्रं समुच्चार्य हंसस्तु विपरीततः प्राणप्रतिष्ठामंत्रोयं सर्वतंत्रे
षु गोपितं शिरसब्रह्माविष्णुरुद्रेभ्यो ऋषिभ्यो नमः मुखे ऋग्यजुसामभ्यां छंदे
भ्यो नमः हृदये नमः हृदये श्रीप्राण शक्तिदेवतायै नमः गुह्ये बीजाय नमः पा
दयोः ह्रीं शक्तये नमः नाभौ क्लीं कीलकाय नमः इति विन्यस्य प्राणप्रतिष्ठार्थे वि
नियोगः कृतांजलि रक्ता ॐ आं ह्रीं क्रों अं कं खं गं घं ङं आकाशवाय्वग्निसलिलपृथि
व्यात्मने आं हृदयाय नमः ॐ आं ह्रीं क्रों इं चं छं जं झं शब्दस्पर्शरूपरसगंधात्मने शि
रसे स्वाहा ॐ टं ठं डं ढं णं श्रोत्र त्वक् जिह्वा घ्राणात्मने शिखायै वौषट् ॐ एं तं थं दं
धं नं वाक् पाद पायूपस्थात्मने ऐं कवचाय हुं ॐ आं ह्रीं क्रों ओं पं फं बं भं मं मनोबुद्धि
कारचित्तात्मने अः अस्त्राय फट् इति मंत्रानंगुष्ठादिकरतलांतं करयोर्विन्यस्य हृदया
दिषडंगेष्वपि विन्यस्य रक्ताब्धिपोतारुणमध्यसंस्था पाशांकुशौ विद्धशरासवा
णान् शूलं कपालं दधती कराब्जैः रक्तां त्रिनेत्रां प्रणमामि देवीं वामायुर्द्वयोराद्यो
नदाधस्ययोरन्यौ इति आयुधध्यानं ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं ह्रों हंसः श्रीविद्ये
मम प्राणा इह प्राणाः आं सोहं श्रीबालात्रिपुरसुंदर्या वाङ्मनस्त्वक् चक्षु श्रोत्र घ्राण
प्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा इति प्राणप्रतिष्ठां कृत्वा मातृकान्यासं कुर्यात् य
था ॐ अस्य श्रीशुद्धमातृकान्यासस्य ब्रह्माऋषये नमः शिरसि गायत्री छंदसे न
मः मुखे श्रीमातृकादेवतायै नमो हृदये हल्भ्यो बीजेभ्यो नमो गुह्ये स्वराशक्तिभ्यो
नमः पादयो अव्यक्तकीलकाय नमः सर्वांगे इति विन्यस्य श्रीबालात्रिपुरापूजांगत्वे
न मातृकान्यासे विनियोगः इति कृतांजलिरक्ता ॐ अं कं खं गं घं ङं आं अंगुष्ठा
भ्यां हृदयाय नमः ॐ इं चं छं जं झं ञं ईं तर्जनीभ्यां नमः शिरसे स्वाहा ॐ टं ठं डं ढं णं ऊं
मध्यमाभ्यां शिखायै वषट् एं तं थं दं धं नं ऐं अनामिकाभ्यां कवचाय हुं ॐ पं फं बं
भं मं कनिष्ठिकाभ्यां नेत्रत्रयाय वषट् अं यं रं लं वं शं षं सं हं ळं क्षं अः करतलकरपृष्ठाभ्यां
अस्त्राय फट् इति मंत्रानंगुष्ठादिकरयोर्विन्यस्य हृदयादिष्वपि विन्यसेत् पंचाश
द्वर्णभेदैर्विहितवदनदोःपादयो कुक्षिवक्षोदेशां भा स्वत्कपर्दाकलितशशि

दू॰या॰
४८

48

न१

कलामिंदुकुंदावदातांसा अक्षस्रक्कुंभचिंतालिखितवरकरां त्रीक्षणां पद्मसंस्थामच्छा
छकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि इतिध्यात्वा अंनमः शिरसि आं
नमः मुखे इंनमः दक्षनेत्रे ईंनमः वामनेत्रे उंनमः दक्षिणकर्णे ऊंनमः वाम-
कर्णे ऋंनमः दक्षनासापुटे ॠंनमः वामनासापुटे ऌंनमः दक्षगंडे ॡंन
मः गंडे एंनमः अधरोष्ठे ऐंनमः ऊर्ध्वोष्ठे ओंनमः ऊर्ध्वदंतपंक्तौ औंनमः अधोदंत
पंक्तौ औंनमः तालुमूले अंनमः जिह्वाग्रे अःनमः दक्षवाहुमूले कंनमः कूर्प
रे खंनमः मणिवंधे गंनमः अंगुलीमूले घंनमः अंगुल्यग्रे ङंनमः वामवाहुमू-
ले चंनमः कूर्परे छंनमः मणिवंधे जंनमः अंगुलीमूले झंनमः अंगुल्यग्रे ञंन
मः दक्षपादमूले टंनमः जानुनि ठंनमः गुल्फे डंनमः अंगुली ढंनमः अंगुल्यग्रे
णंनमः वामपादमूले तंनमः जानुनि थंनमः गुल्फे दंनमः अंगुलीमूले धंनमः
अंगुल्यग्रे नंनमः दक्षपार्श्वे पंनमः वामपार्श्वे फंनमः पृष्ठे बंनमः नाभौ भंनमः उदरे
मंनमः हृदये यंनमः दक्षिणांसे रंनमः ककुदि लंनमः वामांसे वंनमः दक्षभुजे शंनमः
वामभुजे षंनमः दक्षपादे संनमः वामपादे हंनमः कंठादिनाभ्यंतं ळंनमः सर्वांगे
इति सृष्टिकान्यासः यथा शिरसि अंॐअंनमः मुखवृत्ते आंॐआंनमः ॐइं
ॐनमः दक्षनेत्रे ईंनमः ॐईंनमः वामे ईंनमः ॐईंॐनमः इत्यादि ळंॐळंनमः
ॐळंनमः इत्यंतं मातृकास्थानेषु प्रत्यक्षरपुटितं प्रणवं प्रणवपुटितं प्रत्यक्षरं च
न्यसेत् पुनः अंह्रींअंनमः ह्रींअंह्रींनमः आंह्रींआं ह्रींआंनमः ह्रींआंह्रींनमः इंह्रीं
नमः ह्रींइंह्रींनमः इत्यादि ळंह्रींळंनमः इत्यंतं मातृकास्थाने प्रत्यक्षरपुटितं
मायाबीजं मायाबीजपुटितं प्रत्यक्षरं च न्यसेत् पुनः अंश्रींअंनमः श्रींअंश्रींनमः
इत्यादि श्रींह्रींळंनमः श्रींळं च न्यसेत् इत्यंतं मातृकास्थाने प्रत्यक्षरपुटितं प्रत्य तं
श्रीबीजं श्रीबीजपुटितं प्रत्यक्षरं च न्यसेत् ततः अंऐंअंनमः ऐंअंऐंनमः [illegible] इत्यादि
ळंऐंळंनमः इत्यंतं मातृकास्थानेषु प्रत्यक्षरपुटितं वाग्भवबीजं वाग्भवबीजपुटि
प्रत्यक्षरं च न्यसेत् अंफट्अंनमः फट् इत्यादि ळंफट्ळंनमः फट्ळंनमः

३न्यंनमातृकाख्यानेषु व्रत्यक्षरपुटितं मूलमंत्र पुटितंमूलमंत्रपुटितेव्रत्यक्ष
रंन्यसेत् ३तिव्यस्तसमस्तमूलमंत्रमात्रिकाव्रत्यक्षर परस्परपुटितं श्रीविद्याग
स्यानुग्रहषोडान्यासः तद्यथा श्रींह्रींक्लींऐं श्रंश्रीकंठरुद्रायनमः श्रांश्रंनंतरु
द्रायनमः ३इंसूक्ष्मरुद्रायनमः ३ईंत्रिमूर्तिरुद्रायनमः ३उंअमरेश्वररुद्रायनमः
३ऊंअर्घीसरुद्रायनम ऋंभारभूतीशरुद्रायनमः ३ॠंत्रांतीर्थीशरुद्रायनम ३ऌंस्था
णुकरुद्रायनमः ऐंऋंटीशरुद्रायनमः ३भौतिकरुद्रायनमः ३ओंसद्योजातरु
द्रायनमः ३औंअनुग्रहेशरुद्रायनमः अंअक्रूरेशरुद्रायनमः ३अः महानेशरुद्रा
यनमः ३कंक्रोधीशरुद्रायनमः ३खंचंडीशरुद्रायनमः ३गंपंचात्मकरुद्राय
नमः ३घंशिवोत्तमरुद्रायनमः ङं रुद्रायनमः ३चंकूर्मीरुद्रायनमः ३जंसर्व
रुद्रायनमः ३छंएकनेत्ररुद्रायनमः ३जंचतुराननरुद्रायनमः ३झंअजेशरुद्राय
नमः ३जंसर्वरुद्रायनमः ३टंसोमेशरुद्रायनमः ३ठंलांगुलीशरुद्रायनमः ३डं
दारुकेशरुद्रायनमः ३ढंअर्धनारीशरुद्रायनमः ३णंउमाकांतरुद्रायनमः ३तं
आषाढीशरुद्रायनमः ३थंदंडीशरुद्रायनमः ३दंअत्रीशरुद्रायनमः ३धंमीने
शरुद्रायनमः ३नंमेषेशरुद्रायनमः ३पंलोहितेशरुद्रायनमः ३फंशिखीशरु
द्रायनमः ३बंछगलंडेशरुद्रायनमः ३भंद्विरंडेशरुद्रायनमः ३मंमहाकालेश
रुद्रायनमः ३यंवालेशरुद्रायनमः ३रंभुजंगेशरुद्रायनमः ३लंपिनाकीशरुद्रा
यनमः ३वंखड्गीशरुद्रायनमः ३शंवकेशरुद्रायनमः ३षंश्वेतेशरुद्रायनमः ३सं
भृगीशरुद्रायनमः ३हंनकुलीशरुद्राय ळंशिवेशरुद्रायनमः ३क्षंसंवर्तकेश
रुद्रायनमः ३तिरुद्रन्यासः अथग्रहन्यासः तत्ररक्तवर्णंसूर्यंध्यात्वा हृदिश्री
ह्रींक्लींश्रंआं इंईं उंऊं ऋंॠं ऌंॡं एंऐं ओंऔं अंअः सूर्यायनमः भ्रूमध्येशुक्लवर्णंसो
मंध्यात्वा ३यंरंलंवंसोमायनमः नेत्रयो लोहितंमंगलंध्यात्वा ३कंखंगंघंङं मं
गलायनमः हृदयमंडलश्यामवर्णंबुधंध्यात्वा ३चंछंजंझंञं बुधायनमः ३कंठंकु
पीतवर्णंबृहस्पतिंध्यात्वा ३तंथंदंधंनंशुक्रायनमो नीलवर्णंशनींध्यात्वा ३पंफं

जं ८

वंभंमंशनिश्चरायनमः वक्रे धूम्रवर्णाय ध्यात्वा ३ शंषंसंहं राहवेनमः पादयोधूम्र
वर्णो केतुध्यात्वा लंक्षं केतवेनमः इतिन्यसेदितिग्रहन्यासः ललाटेह्रीं श्रीं क्लींअं
इंउंऋंलृंएंउंअं इंद्रायनमः दक्षललाटे श्रीं ३ अंऋंलृंएंओंअंअः अग्नयेनमः दक्षक
र्णे कंखंगंघंङं यमायनमः वामःकर्णे ३ चंछंजंझंञं नैरृतेनमः वामकूपे ३ टंठंडं
ढंणं वरुणायनमः वामकर्णपृष्ठे ३ तंथंदंधंनं वायव्येनमः वामकर्णे ३ पंफंबं
भंमं सोमायनमः वामललाटे यंरंलंवं ईशानायनमः मूर्ध्नि ३ शंषंसंहं ब्रह्मणे
नमः पादाग्रे लंक्षं अनंतायनमः इतिन्यसेल्लोकपालन्यासः अ शिवशक्ति

यह २

न्यासः मूलाधारे श्रींह्रींक्लीं वंशंषंसं डाकिनीसहिताय ब्रह्मणेनमः स्वाधिष्ठाने ३
वंभंमंयंरंलं राकिनीसहिताय विष्णवेनमः मणिपूरके ३ टंठंडंढंणं तंथंदंधंनं पं
फंबंभंमं लाकिनीसहिताय रुद्रायनमः अनाहते कंखंगंघंङं चंछंजंझंञं टंठं काकि
नीसहिताय ईश्वरायनमः विशुद्धचक्रे ३ अंआं इंईं उंऊं ऋंॠं लृंॡं एंऐं ओंऔं अंअः
शाकिनीसहिताय सहिताय सदाशिवायनमः भ्रूमध्ये लंक्षं हाकिनीसहिताय प
रमशिवायनमः इतिन्यसेदितिशिवशक्तिन्यासः अथ श्रीविद्यान्यासः शिरसि

दिति ७

श्रींह्रींक्लीं अंआं कंखंगंघंङं त्रिपुरायैनमः ललाटे ३ इंचंछंजंझंञं अं वालायै
भ्रूमध्ये ३ उंऊं टंठंडंढंणं श्रीविद्यायैनमः कंठकूपे ऋंॠं तंथंदंधंनं ललि
तायैनमः हृदि ३ लृंॡं पंफंबंभंमं महाकाल्यैनमः नाभौ ३ एंऐं यंरंलंवं सरस्व
त्यैनमः लिंगे ओंऔं शंषंसंहं कामेश्वर्यैनमः आधारे अंअः लंक्षं चामुंडायैनमः
सर्वांगे इतिन्यसेदितिश्रीविद्यान्यासः अथपीठन्यासः मूलाधारे श्रींह्रींक्लीं
अं इंउं ऋं लृं एं ओं औं कामरूपपीठायनमः हृदि ३ आं ईं ऋं लॄं ऐं औं अः जालंधरपी
ठायनमः ललाटे ३ कंखंगंघंङं पूर्णगिरिपीठायनमः ललाटोर्द्ध्वे ३ चंछंजंझं
ञं उड्डीयाणपीठायनमः भ्रूमध्ये ३ टंठंडंढंणं वाराणसीपीठायनमः नेत्रत्र
यो ३ तंथंदंधंनं अवंतीपीठायनमः मुखवृत्ते ३ पंफंबंभंमं मायावतीपीठा

उं ४

यनमः ३ कंठे यंरंलंवंमथुरापीठायनमः नाभिदेशे ३ शंषंसंहंअयोध्यापीठायनमः
कंसां लंहंक्षंकांचीपीठायनमः इतिन्यासेनपीठन्यासः एवंश्रीविद्याषोडान्या
संविधाय ॐकारपुटितमूलेनत्रिधाव्यापकंन्यासंकृत्वाथ ॐअस्यश्रीविद्यात्रिपुरामं
त्रस्य दक्षिणामूर्तिऋषिः पंक्तिश्छंदः श्रीविद्यात्रिपुरादेवता ऐंबीजं सौंःशक्तिः क्लीं
कीलकं ममश्रीधर्मार्थकाममोक्षार्थेपूजायांजपेविनियोगः इतिकृतांजलिः श्री
दक्षिणामूर्तिऋषयेनमः शिरसे पंक्तिश्छंदसेनमो मुखे श्रीबालात्रिपुरादेवता
यनमो हृदयेमें वंदूद ऐंबीजायनमो गुह्ये सौंःशक्तयेनमो पादयो ध क्लींकील
कायनमो नाभौ सर्वांगेषु ममश्रीधर्मार्थकाममोक्षार्थेपूजायांजपेविनियो
गः इतिकृतांजलिः ध ऐंनमोनाभ्यादिपादांतं ध क्लींनमः हृदयानाभ्यांत ध सौंः
नमः ब्रह्मरंध्रादिपादांतं ऐंनमोवामकरे क्लींनमः दक्षकरे ध सौंनमः उभयो
ध ऐंनाभौ मूर्ध्नि ध क्लींनमो मुखे सौंनमो वक्षसि इतिदेहशुद्धिन्यासंकृत्वा पीठ
न्यासंकुर्यात्तथा तत्र मूलेनपवनमेकवारंपूरयेत् मूलेनचतुर्वा २ कुंभेमे
डाभ्यांरेचयेत् एवमेवविपर्ययेनद्वितीयः प्रथमः तृतीयः इतिप्राणायामंकृ
त्वा मूलाधाराद्दर्शितविभक्ति पूर्वोक्तऋष्यादिन्यासंकृत्वा ध ऐंअंगुष्ठाभ्यांनमः
ध क्लींतर्जनीभ्यांनमस्वाहा ध सौंमध्यमाभ्यांवषट् ध ऐंअनामिकाभ्यांहुं क्लींक
निष्ठिकाभ्यां ध सौंःकरतलकरपृष्ठाभ्यांफट् ऐंहृदयायनमः क्लींशिरसेस्वाहा
ध सौंःशिखायैवौषट् ऐंकवचायहुं ध क्लींनेत्रत्रयायवौषट् ध सौंःअस्त्रायफट् २
तिकरषडंगविन्यस्यस्वदेहं सिंहासनत्वेनपरिकल्प्य ध मंडूकायनमः मूलाधा
रे ध कालाग्निरुद्रायनमः स्वाधिष्ठाने ध मूलप्रकृत्यैनमः नाभौ हृदये ध आधा
रशक्त्यादिभ्योनमः दक्षांसादिस्वस्थानेषु ध ब्रह्मादितुर्यप्रेतासनेभ्योनमः हृदि
रत्नवेदिकासिंहासनाभ्यांनमः दक्षांसादिषु ध धर्मादिभ्योनमः मुखादिषु ध
अधर्मादिभ्योनमः हृदि ध अनंतादिज्ञानात्मानेभ्योनमः तत्रैव ध इच्छाद्यष्टशा
क्तिभ्योनमः मध्येमनोन्मन्यैनमः हृदि ध वामादिशक्तिभ्योनमः ध ह्सौंःसदा
शिवमहाप्रेतपद्मासनायनमः क्लींसर्वशक्तिकमलासनायनमः २ इतिवि

रु॰या॰
५॰

न्यस्यादितिपीठन्यासः अथासनन्यासः ॐ अं त्रिपुरासुंदरीदिव्यात्मासनाय नमः ॥
पादयोः ॐ सं त्रिपुरवासिनीसर्वमंत्रासनाय नमः जंघयोः ॐ सं त्रिपुरश्रीसर्वमंत्रासनाय नमः
जान्वोः ॐ सं त्रिपुरसुंदरीसाध्यासनाय नमः मूलाधारे इत्यासनन्यासः अथायुधन्यासं कुर्यात्
वामहस्ते पुं पुस्तकाय नमः ॐ दक्षे मां मालाय नमः पुनर्वामे अं अभयाय नमः दक्षे
ॐ वं वराहाय नमः इति विन्यस्य चतुष्पीठन्यासं कुर्यात् ॐ ऐं कामेश्वर्यधिष्ठिताकामरूपपी
ठाय नमः मूलाधारे ॐ क्लीं वज्रेश्वर्यधिष्ठितजालंधरपीठाय नमः ॐ सौं भगमालिनीधिष्ठि
तपूर्णगिरिपीठाय नमः भ्रूमध्ये ॐ मूलं श्रीबालात्रिपुरसुंदर्यधिष्ठितश्रीउड्डान
पीठाय नमः ब्रह्मरंध्रे अथ तत्त्वन्यासः ऐं आत्मतत्त्वात्मने श्रीबालात्रिपुरसुंदर्यै नमः ना
भ्यादिपादांतं क्लीं विद्यातत्त्वात्मने श्रीबालाकंठादिनाभ्यांतं ॐ सौः शिवतत्त्वात्मने मूर्धा
दिकंठांतं मूलं सर्वतत्त्वात्मने श्रीबालात्रिपुरसुंदर्यै नमः इति सर्वांगे विन्यस्य ॐ मूलेन
व्यापकं कृत्वा ध्यानं कुर्यात् यथा हस्ताभ्यामक्षमालां स्फटिकमणिमयीं ज्ञानमुद्रां च
भद्रां बिभ्राणां दक्षिणाभ्यां मणिमयमकुटां पुस्तकं चाभयं च वामाभ्यां रक्तकौशेयपरि
हितजघनां रत्नकेयूरहारां दिव्यालंकारयुक्तां त्रिभुवनजननीं दिव्यगंधानुलिप्तां सद्बु
द्धिरंध्रीमपि प्राप्तजालेनिरंभरकांतिकलां समग्रां विनमद्देवासुरेंद्रमौलिमालारजोरं
जितपादपद्मां एवं ध्यात्वा जपेद्देवीं भावायचक्रमध्यतः एवं त्रिखंडमुद्रामुद्रितकरो
ध्यात्वा मूलं यथाशक्ति जपित्वा प्राणायामादिना जपं समर्प्य श्रीगुरुं प्रणम्य इति श्रीरु
द्रयामले तंत्रराजे श्रीविद्यापंन्यासखंडवर्णनं नाम पंचदशः पटलः १५ भैरव उवाच
शृणु देवि प्रवक्ष्यामि पूजाखंडं सुदुर्लभं येन ज्ञात्वा साधकेंद्रो जीवन्मुक्तो भविष्यति अ
थांतर्यागः यथा प्रातः स्मरणोक्तप्रकारेण कुंडलिनीमुत्थाप्य ब्रह्मरंध्रं नीत्वा परमानं
दनिर्भरीभूत्वा तत्तेजसा परिणतां देवीं हृदयमध्यकमले ध्यायेत् अथ बाह्यार्घ्यस्थापनं
कुर्यात् चतुरस्रं यथा तत्र स्वदक्षे बिंदुत्रिकोणवृत्तं देवतावत्कृत्वा सपात्रं कृष्णोदास
नपीठं यतनं कृत्वा करखंडगाध्यानं तिक्तकार्घ्यस्थापनं कुर्यात् मंडलं विधाय तत्राधारशु
क्तिभ्यां नमः इति संपूज्य तत्राधारं संस्थाप्य अस्त्राय फट् इति शोधितं नमः इति पूरि
तं पात्रं संस्थाप्य तत्र वाग्भवेन प्रणवेन वा गंधादिनि क्षिप्य गंगेत्यादिना तीर्थमावा

ण येत्तु योनिमुद्रां प्रदर्श्य स्वमन्त्रेण पूजयेदिति सामान्यार्घ्यवामे गयादिना विं
दुत्रिकोणषट्कोणवृत्तचतुरस्रं कृत्वा सामान्यार्घ्यजलेन मंडलं प्रपूज्य तत्राधा
रशक्तिभ्यो नमः इति संपूज्य नम इत्याधारं संस्थाप्य रं वह्निमंडलाय दशक
लात्मने नमः प्राम विस्फुलिंगिन्यै नमः षं सुश्रियै नमः सं सुरूपायै नमः हं क
पिलायै नमः लं हव्यवाहायै नमः कं कव्यवाहायै नमः स्वर्णादिरचिते
पात्रमस्त्रेण प्रक्षाल्य श्रीविद्याकलशपात्रं प्रतिष्ठापयामीति संस्था
प्य अं अर्कमंडलात्मकाय द्वादशकलात्मने श्रीविद्याकलशपात्रा
य नमः इति पात्रं संपूज्य तत्र पूर्वोक्तमंडलं विभाव्य पूर्ववत्संपूज्य तत्र
हंत्राकारेण सूर्यस्य द्वादशकलाः पूजयेत् यथा कं भं तपिन्यै नमः खं बं
तापिन्यै नमः गं फं धूम्रायै नमः घं पं मरीच्यै नमः ङं नं ज्वालिन्यै नमः
चं धं रुच्यै नमः छं दं सुषुम्णायै नमः जं थं भोगदायै नमः झं तं विश्वा
यै नमः ञं णं बोधिन्यै नमः ठं डं क्षमायै नमः ततो वामदेवताय वौषट् स
हस्रमलवरयूं आनंदभैरवाय वौषट् सहक्षमलवरयीं आनंदभैरव्यै
वौषट् इति संपूज्य ह्रीं नमो वज्रपुष्पे हुं फट् स्वाहेति विलोममातृकामु
च्चरन् शुद्धजलेन कलशमापूर्य मायाबीजेनांगुष्ठानामिकाभ्यां पुष्पेण
तज्जलमालोड्य तत्पुष्पं तिरस्य वधूबीजेन चंदनादिलोडितं पुष्पं तज्जले
निक्षिप्य ह्रूंमिति गारुडिनीमुद्रयाभिरक्ष्य ओं सोममंडलात्मकाय प्रदषोड
शकलात्मने श्रीविद्याकलशामृताय नमः इति संपूज्य तत्र पूर्वोक्तमं
डलं विभाव्य पूर्ववत्संपूज्य तत्र सोमस्य षोडशकला हंत्राकारेण स्वाद्या
दिप्रादक्षिण्येन पूजयेत् तद्यथा अं अमृताकलायै नमः आं मानदाकला
यै नमः इं पूषाकलायै नमः ईं तुष्टिकलायै नमः उं पुष्टिकलायै नमः ऊं र
तिकलायै नमः ऋं धृतिकलायै नमः ॠं शशिनीकलायै नमः लृं चंद्रिका
कलायै नमः लॄं कान्तिकलायै नमः एं ज्योत्स्नाकलायै नमः ऐं श्रीकलायै
नमः ओं प्रीतिकलायै नमः औं अंगदाकलायै नमः अं पूर्णाकलायै नमः

अः स्वर्णाभृता कलायै नमः इति संपूज्य फडिति संरक्ष्य हुमित्यवगुण्ठ्य मूलेन संवीक्ष्य नमः
इत्यभ्युक्ष्य मूलेन गंधमाघ्राय कुंभमुद्रां दत्त्वा शापमोचनं कुर्यात् ॐ एकमेवपरं ब्र
ह्म स्थूलसूक्ष्ममयं ध्रुवं कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहं वां वीं वूं वैं वौं वः
ब्रह्मशापविमोचितायै सुरादेव्यै नमः इति त्रिः सूर्यमंडलसंभूते वरुणालय
संभवे अमाबीजमये देवि शुक्रशापाद्विमुच्यतां सां सीं सूं सैं सौं सः शुक्रशापविमो
चितायै सुरादेव्यै नमः इति त्रिः वेदानां प्रणवो बीजं ब्रह्मानंदमयं यदि तेन सत्येन
ते देवि ब्रह्महत्या व्यपोहतु ॐ ह्रीं श्रीं क्रां क्रीं क्रूं क्रैं क्रौं क्रः सुरा कृष्णशापं मोच
य २ अमृतं स्रावय २ स्वाहा इत्यपि त्रिः पावमानः परं ब्रह्म पावमानः परो रसः पा
वमानपरं ज्ञानं तेन त्वं पावयाम्यहं इति त्रिवारं पठित्वा आनंदभैरवभैरवौ ध्या
येत् समुद्रे मथ्यमाने तु क्षीराब्धौ सागरोत्तमे तत्रोत्पन्ना सुरादेवी कन्यका रू
पधारिणी अष्टादशभुजा देवी त्रिनेत्रा रौद्ररूपिणी नवकुंभधराशोणानना नवव
पात्रपरायणा नमामि कालाग्निसदृशी कृतन्हास्यलसत्सुखी आनंदभैरवं क
स्यासुराये यमुद्राभिः इति ध्यात्वा हसक्षमलवरयूं आनंदभैरवाय वौष
ट् इति दशधा जप्त्वा संपूज्य द्रव्यमध्ये दत्त्वा वर्णेन त्रिपंचाशत्त्रं १८ कं· १८
यं· १८ इति शक्तिचक्रं विलिख्य तन्मध्ये हुंकारं विलिख्य तस्यामृतं विचिंत्य वामि
ति सुधाबीजं मूलमप्यष्टधा जपेत् ध्यात्वा परेदि द्रव्यशुद्धिः अथ श्रीचक्रयोर्म
ध्ये पूर्ववत् मंडलं कृत्वा चतुरस्रे ॐ पूर्णगिरिपीठाय नमः उड्डीयानपीठाय नमः
ॐ कामरूपपीठाय नमः जालंधरपीठाय नमः इति संपूज्य षट्कोणे षडंगं
संपूज्य मूलं खंडत्रयेण त्रिकोणं संपूज्य ॐ आधारशक्तये नमः इति संपूज्य
त्रिकोणे आधारं संस्थाप्य नमः इति सामान्यजलेनाभ्युक्ष्य रं वह्निमंडलाय दश
कलात्मने नमः इति संपूज्य षडंगं षडंगैः संपूज्य मध्ये मूलेन देवीं संपूज्य
फडिति पात्रं प्रक्षाल्य ॐ स्त्रीदेव्याः पात्रं संस्थापयामि नमः इति संस्थाप्य अं
अर्कमंडलाय द्वादशकलात्मने नमः इति पात्रं संपूज्य तन्मध्ये त्रिकोणं हंसं वि
लिख्य मूलेन मंडलं संपूज्य ब्रमित्यमृतं क्षं लं हं सं षं शं वं लं रं यं मं भं बं फं पं

नंथंदंधंनंणंढंडंठंटंञंझंजंछंचंङंघंगंखंकं अः अं औं ओं ऐं एं ॡं ऌं ॠं ऋं ऊं उं ईं इं आं अं इति
विलोममातृकां च पठन्नूर्ध्वमस्तेन त्रिकोणं पूर्वपूर्यं जलेनामागमैकं पूर्वपूर्य ततः सोममण्डला
यषोडशकलात्मने नमः इति संपूज्य द्रव्ये अं १६ कं १६ थं १६ तन्मध्ये हंक्षं इति दत्वावर्तेन
शक्तिचक्रं त्रिकोणं विलिख्य मूलखंडत्रयेण त्रिकोणं षट्कोणं च संपूज्य गंगे च तीर्थमा
वाह्यानंदभैरवं ध्यायेत् स्वमंत्रेण संपूज्य पूर्वादितः ४ ग्लूं गगनरत्नेभ्यो नमः
स्लूं स्वर्गरत्नेभ्यो नमः ४ प्लूं पातालरत्नेभ्यो नमः ४ म्लूं मर्त्यरत्नेभ्यो नमः मध्ये न्लूं
नागरत्नेभ्यो नमः इति संपूज्य शुद्ध्यादिशोधयं यथा त्रिकोणवृत्ते शुद्ध्यादिपात्रं
संस्थाप्य यमिति संशोष्य रमिति संदह्य वमित्याप्लाव्य धेनुमुद्रयामृतीकृत्य मूलं
दशधा जपेदिति मुद्राचतुष्टयं शुद्धिः ततः कुंडगोलादिशोधयेत् ह्रमित्यवकुंठ्य
तालत्रयेण दिशः संबध्य देवीमावाह्यामृतीकृत्य योनिं प्रदर्श्य कुंडलिनीप्रयोगेन तिः
सृतामृतवृष्टिं तन्नाडीष्ट मूलान्ते ब्रह्माण्डखंडसंभूतमशेषरसनिर्भरं आपूरितमा
हापात्रं पीयूषरसमावह इत्यभिमंत्र्य ४ ऐं अमृते अमृतोद्भवे अमृतवर्षिणि अमृ
तमावह २ ओं जुं सः स्वाहा इत्यभिमंत्र्य सौः तद्रूपेऽर्घौ करस्थं च दत्वा चैचित्स्वरूपिणी
भूत्वा परामृताकारं मपि विस्फुरणं कुरु कुरु इत्यभिमंत्र्य सौः नमः इति संपूज्य धें
नुमुद्रां प्रदर्श्य सकलीकृत्य मत्स्यमुद्रयाच्छादयेदिति विशेषार्घ्यस्थापने विधिः अ
थ द्वितीययोगविधि ततः साधकः कृतात्मपूजानक्रियः शिरसि श्रीगुरुं ध्यात्वा संपूज्य
प्रणम्य तदाज्ञामादाय सर्वलक्षणसंपन्नां ब्रह्मविद्यादिदीक्षितां हंसीं प्राप्तनिमंत्रि
तां गेनोयस्वासने समुपवेश्य तस्याः पादौ प्रक्षाल्य सुखोपविष्टां प्रणम्य कृतांजलि
स्त्वं भवती श्रीपरदेवता यजमानार्थं त्वमेव इतीभूत्वा मां कृतार्थं कुर्विति प्रार्थ्य देवा
ग्रतः स्वासनमुपविश्य कृतांजलिरयेत्यादि श्रीपरदेवताप्रीत्यर्थं हंसीपाजन
महं करिष्ये इति संकल्प्य मूलविद्यया प्राणायामत्रयं कृत्वा ऋष्यादिकरषडंगन्या
सान्विन्यस्य सुगंधतैलसुगंधादिकमुद्वर्तनं पूरकमुष्णोदकेन स्नापितां मनोहर
वस्त्रालंकारणाद्यैस्तु भूषितां वामभागे स्वासने समुपवेश्य हंसीं देवीरूपां ध्यायन्
स्वपुरतः प्राग्वत्साधारपात्रं संस्थाप्य कलशाभोगपात्रे कृत्वा सहितियं भोगपात्रं

रु॰ या॰
५२

52

त्येपुनःपुनर्निवेद्यंतांतरुणोल्लासपुस्तकोक्तांत्वापूजांमंडलस्योत्तरभामसुगंधतैल
सुगंधादिकमुद्वर्त्तनपूर्वकमुष्णोदकेनसुस्नापितांमनोहरवस्त्रालंकारणायैःसु
भूषितांस्ववामभागेस्वासनेसमुपवेश्यहृतींदेवीरूपांध्यात्वातत्पुरतःप्रागवत्सा
धारंपात्रेसंस्थाप्यकलशाभोगपात्रेकृत्वासहितियभोगपात्रेहत्येपुनःपुनर्नि
वेद्यतांतरुणोल्लासपुस्तकोक्तांत्वापूजांमंडलस्योत्तरभागेसुवर्णरूप्यविद्रु
मगजदंतादिनिर्मितंमंचसुचेटंतपटसूत्रैर्हठनवंपट्टसूत्रचित्रविचित्रारक्त
पट्टिकाभिर्गुंफितंपर्यंकमस्तीर्यतदुपर्युदीर्घकोपवर्णादिकंनिधाय
तत्रसुगंधपुष्पाणिकर्पूरजांसितविकीर्यतत्रवक्ष्यमाणविधिनायोगपीठं
संपूज्यमंचकपश्चिमयोगिनीवलिंपूर्वेक्षेत्रपालवलिंदक्षिणेगणे
शवलिंउत्तरेवटुकवलिंचतुष्टयंवक्ष्यमाणविधिनादत्वापर्यंकोपरिह
तींपश्चिमाभिमुखेसमुपवेश्यस्वयंपूर्वाभिमुखंउपविश्यमूलविद्यया
प्राणायामत्रयंऋष्यादिन्यासांश्चकृत्वाहृतींदेहेप्रागुक्तविधिनामातृ
काविसंपूज्यस्यतस्यदक्षिणपादतलेक्लींकामराजश्रीपादुकांपूजया
मिनमः इतिसंपूज्यवामहस्तेवंवसंतश्रीपादुकांपूजयामिनमःस्त
नयोःसोसोमपादश्रीपादुकांपूजयामिनमः इतिसंपूज्य कामकलापू
जयेत् यथादक्षपादांगुष्ठेश्रंश्रद्धाश्रीपादुकांपूजयामिनमः दक्षपादां
गुष्ठेश्रंऊर्द्धीकलाश्रीपादुकांपूजयामिनमः दक्षपादां
पादुकांपूजयामिनमः दक्षपादांगुष्ठेश्रांप्रीतिकलाश्री
पादुकांपूजयामिनमः गुल्फे इंरतिकलाश्रीपादुकांपूजयामिनमः जं
घायां ईंहृतिकलाश्री॰ जानुनिकीर्तिकाश्री॰ ऊरुमूले ऊंमनोरमाक
लाश्री॰ नितंबे ऊंमनोरमादिनीकलाकक्षा लूंमोहिमीकलाश्रीस्तने
लूंसंमोहिनीकलाश्रीपू॰ ऊरुमध्ये ऊंमनोरमाकलाश्रीपू॰ कक्षायां यें
दीपिनीकलाश्रीपू॰ कंठे यें वोधिनीकलाश्रीपू॰ कर्णे वशंकरीकलाश्रीपू॰ क
पोले ओंरंजिनीकलाश्री कपोलो श्रंसुभगाकलाश्रीपू॰ शिरसि श्रः प्रिय
दर्पिलीलाश्रीपू॰ इतिसंपूज्य सोमकलापूजयेत् शिरसि श्रंपूषाकला

श्रीपू॰ नेत्रे श्रां श्रयै माकलाश्रीपू॰ कपोले ई स्रमनसा स्त श्रीपूकर्णमूले ईरतिकलाश्रीपूकंठे उं प्रीतिकला श्रीपूक लायां ऊं धूलिकलाश्रीपूस्त ने श्रृं सौम्यकलाश्रीपूकक्षा ॠं मरीचिकलाश्रीपूनितंबे ऌं दशामीक लाश्रीपूरुमूले ॡं श्रंशुमालिनीकलाश्रीपू॰ उरुमध्ये एं श्रंगिरा कलाश्रीपू॰ जानुमध्ये ऐं श्रमीकलाश्रीपू॰ जंघयो श्रायाकलाश्रीपू॰ गुल्फे संपूर्णमंडलाकलाश्रीपू॰ पादाग्रष्ठे श्रं पुष्टिकलाश्रीपू॰ वामपादां गुष्ठे श्रः श्रमृतकलाश्रीपूजयामिनमः इतिसंपूज्य षष्ठवंशान्मम कांवंष्ठकामचापंसंपूज्य मूर्द्ध्नि द्रावणवाणश्रीपू पादयोः ह्रीं उन्माद वाणश्रीपू॰ मुखे क्लींमोहणवाणश्रीपू गुह्ये ब्लूं संदीपिनवाणश्रीपू॰ हृदि सः शोषणवाणश्रीपू इतिपंचावर्णसंपूज्य तस्याललाटे ह्रीं कामश्रीपू॰ गले क्लीं मन्मथश्रीपू॰ हृदि ऐं कंदर्पश्रीपू॰ नाभौ ह्रूं मकर ध्वजश्रीपू॰ मूलाधारे स्त्रीं मीनकेतश्रीपू॰ इतिपंचकामान्संपूज्य तस्याशि रसि ऐं क्लीं स्त्रीं हर ह्लूं धारांशक्तिश्रीपादुकांपूजयामिनमः इतिमंत्रे णसिंदूरादिना त्रिकोणं विलिख्य अग्र कोणे ऐं स्त्रभगश्रीपादुकांपूज यामिनमः दक्षिणे क्लीं भगसर्पिणीश्रीपू॰ वामे सौभगाभगावहाश्री पू॰ पुनस्त्रिकोणवामकोणे श्रीमहालक्ष्मीश्रीपू॰ दक्षिणे ऐं सरस्वति श्रीपू॰ इतिसंपूज्य तस्याशिरसि श्रीउडीशानाथश्रीपू॰ रक्तां वाश्रीपू॰ च र्यानाथश्रीपू॰ नाभौ जलंधरपीठश्रीपू॰ जालेश्वरीदेवीश्रीपू॰ पूर्णाना थदेवश्रीपू॰ चामुंडापरीवाश्रीपू॰ उडीशलाथदेविश्रीपू॰ स्मरमंदिरेका मरूपपीठे श्रीकामेश्वरीदेवीश्रीपू कामेश्वरीनंदनाथश्रीपादुकांपू जयामिनमः इतिसंपूज्य गुह्यपीठस्य वामभागे वक्ष्यमाणप्रकारेण गुरुपंक्तिं संपूज्य हृदयपंकजे श्रनंगकुसुमादिभ्यो नमः इतिपूजयेत् तत ऐं सौं ह्रैं ह्रूं क्लीं इतिमंत्रेण मोनिमुद्रां प्रदर्श्य योनौ क्षोभं विचिंतये त् ऐं ह्रूं ह्रीं क्लीं ह्रीं दः इतिमंत्रेण तस्या भ्रूमध्ये क्षोभ विचिंतयेत् ऐंन

मः स्वारमंदरे मूलमुच्चार्य द्रां द्रीं क्लीं ब्लूं सः इति स्मृत्वा स्वशिरसि मूलविद्यां
स्मरन् मूलेन मदनागारे पुष्पांजलिं दत्वा स्वस्मिन् शिवरूपं तच्चाशक्तिरूपं
विभाव्य मदद्रवक्षरत् नानाविधासनपरिरंभविविधविचित्रलीलाविशे
षैर्लास्यसम्यक्परितोष्य तदनंगसदनमथ तत्कक्षान्तदंगं निष्पीड्य तन्निर्ग
तं तत्वान्तं तस्य यं येक्रमेणोद्धृतकलशादि विद्यार्द्धमूलेन निक्षिप्य तद्द्रवं
हेतुना प्रक्षाल्य तदंचलसेन प्रक्षिप्य तां प्रणम्य भोजनान्तां वलवसना
भरणदक्षिणादानैः परितोष्य स्वानन्दरूपमत्वा श्रीगुरुं प्रणम्य पीठपूज
मारभेत् एतद्रहस्यं वेश्यापराजितापुष्पं इत्यादि पुष्पं च स चंदनं परस्परा
भिमुखं संयोज्य तयोः शिवशक्तिरूपयोः संगमेन कुलद्रव्यं सन्निवि
भाव्य तन्मध्यस्थं चंदनं अर्घ्यपात्रे निक्षिप्य देवीं तर्पयेत् इति श्रीरुद्रया
मले तंत्रराजे श्रीविद्यायां दूतीपूजनकथनं नाम षोडशः पटलः १६ भैर
व उवाच शृणु देवि प्रवक्ष्यामि पात्राणां स्थापनक्रमं येन कृत्वा साधकेन्द्र
लभते वांछितं फलं ततो देव्याज्ञां गृहीत्वा पठ श्रीपात्रयोर्मध्ये पात्राणि
स्थापयेद्यथा घटसमीपे गुरुपात्रं अपयात् तत्राचननीयपात्रं च क्रमेण
स्थापयेत् सामान्यार्घ्यपात्रं ततो मांसमत्स्यायुतकारणं तत्तत्वमुद्रया
श्रीपात्रान्समुद्धृत्य आनन्दभैरवं तर्पयामि नमः मन्त्रेण संतर्प्य ततः अमुका
नंदनाथ गुरुपादुकां तर्पयामीति त्रिः सकृद्वा संतर्प्य एवं परमगुरुं प
रमेष्टिगुरून् संतर्पयेत् ततः श्रीपात्रामृतेन च देवीं साङ्गां सवाहनां
सपरिवारां श्रीबालात्रिपुरसुंदरीं हृदि संतर्पयेदिति तत्वमुद्रया यातद्
कं स्वतंत्रे अंगुष्ठानामिकायोगाद्धामहस्तस्य तर्पयेत्साधु यथा देवी देवीं का
सपरिकरां ततः तत्वशुद्धिं कुर्यात् तदुक्तं कालिकाश्रुते ॐ प्राणापानव्या
नोदानसमाना मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ॐ पृ
थिव्यापस्तेजो वाय्वाकाशानि शुध्यन्तां इत्यादि ॐ त्वक्चक्षुःश्रोत्रजिह्वाघ्राणवाचां
सि मे इत्यादि ॐ पाणिपादपायूपस्थशब्दानि मे प्रकृत्यहंकारवद्भिः मनः

श्रोत्राणि मे स्पर्शो रूपरसगन्धाकाशानि मे ॐ वायुतेजः सलिलभूम्या
त्माना इत्यादि इति सप्तमन्त्रान्पठेदिति तत्त्वशुद्धिः ततो मूलमन्त्रेणार्घ
पात्रादिकं स्वीकारं कुर्यात् ततः श्रीपात्रामृतेनात्मानं पूजोपकरणानि
चाभ्युक्ष्य तस्मात्सर्वं ब्रह्ममयं भवेदिति ततः स्वकस्य पूर्वदक्षिणपश्चि
मोत्तरे त्रिकोणवृत्तं विलिख्य ॐ ह्रीं मंडलाय नमः इति मंडलं संपूज्य
अर्घपात्रं पूर्णसलिलं मांसमीनपुष्पैर्बलिमुपस्कृत्य बलिपात्रस्थ
कारणेन वालांगुष्ठानामिकाभ्यामुत्सृजेदनेन एह्येहि देवीपुत्र वटु
कनाथ कपिलजटाभारभास्वर त्रिनेत्र सकीलविघ्नान्नाशय सर्वोपचा
रसहितं बलिं गृह्ण गृह्ण स्वाहा एष बलिर्वटुकाय नमः इति दक्षिणे यां
योगिनीभ्यो नमः इति योगिनीः समर्च्य तर्जनीमध्यमानामिकाङ्गुष्ठै
र्बलिं दद्यात् दिने दिने ऊर्ध्वब्रह्माण्डतो वा दिवि गगनतले भूतले निष्कले वा
पाताले वा वने वा सलिलपवनयोर्यत्र कुत्र स्थिता वा क्षेत्रे पीठोपपीठा
दिषु च कृतपदा धूपदीपादिकेन प्रीता देव्यः सदा नः शुभबलिविधि
ना पान्तु वीरेन्द्रवन्द्याः यां योगिनीभ्यः स्वाहा सर्वयोगिनी हुं फट् स्वाहा ए
ष बलिर्योगिनीभ्यो नमः पश्चिमे क्षं क्षेत्रपालाय नमः इत्यभ्यर्च्य वाम
मुष्टिं कृत्वा तर्जनीं सरलां विधाय पुनर्बलिं दद्यात् दिने दिने क्षां क्षीं क्षूं
क्षैं क्षौं क्षः स्थानक्षेत्रपाल धूपदीपादिसहितं बलिं गृह्ण २ स्वाहा एष ब
लिः क्षेत्रपाय नमः उत्तरे गणेशमभ्यर्च्य दण्डाकारांगुलिर्मध्ययुक्तां कृ
त्वा पूर्ववद्बलिं दद्यात् दिने दिने गां गीं गूं गैं गौं गः गणपतये वरवरद सर्वजनं
मे वशमानय बलिं गृह्ण २ स्वाहा एष बलिर्गणेशाय नमः अथ वास्त्री वा
मे मंडलं कृत्वा पूर्ववत्पूर्ववत्संपूज्य तत्र साधारबलिं संस्थाप्य मूले मूले
नाभिमंत्र धूपदीपादिना सर्वान्संपूज्य हि सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यः हुं फ
ट् स्वाहा एष बलिः सर्वभूतेभ्यो नमः इति तत्त्वमुद्रया उत्सृजेत् एतत्संच
बलिं कुर्यात् ततः पीठपूजां कुर्यात् एतावत्कर्म अशक्तस्य द्वारपूजासन

शोधनऋष्यादिकरषडंगन्यासः ध्यानांतं कृत्वा सामान्यार्घ्यं संस्थाप्य पू
र्वं शंशोधितवारणेन श्रीपात्रं संस्थाप्य संपूज्य संतर्प्य पीठपूजां कुर्यात्
तत्र शिरसि श्रीपादुकां पूज्य श्रीचक्रस्य दक्षवामयोः गुरुगणपतिक्रमेण सं
पूज्य मंमंडूकाय नमः कालाग्निरुद्राय नमः मूलप्रकृत्यै नमः आधारश
क्त्यादिभ्यो नमः कूर्माय नमः अनंताय नमः वराहाय नमः पृथिव्यै नमः
सुधासमुद्राय नमः मणिद्वीपाय नमः आनंदकाननाय नमः महाश्मशा
नाय नमः कल्पवृक्षाय नमः मणिपीठाय नमः रत्नसिंहासनाय नमः
सिंहासनस्य पादचतुष्टये स्ववामादिप्रादक्षिण्येन धर्माय नमः ज्ञानाय
नमः वैराग्याय नमः ऐश्वर्याय नमः स्वाग्रादिचतुर्दिक्षु अधर्माय नमः अ
ज्ञानाय नमः अवैराग्याय नमः अनैश्वर्याय नमः वाय्वादिकोणेषु ब्रह्मादि
तुर्यप्रेतासनेभ्यो नमः सिंहासनमध्ये मायायै नमः विद्यायै नमः अनंता
य नमः पद्माय नमः आनंदकंदाय नमः संविन्नालाय नमः प्रकृतिमय
पत्रेभ्यो नमः विकृतमयकेसरेभ्यो नमः पंचाशद्वर्णबीजाढ्यतत्त्वरूपिण्यै
कर्णिकायै नमः अं अर्कमंडलाय द्वादशकलात्मने नमः उं सोममंडला
य नमः रं वह्निमंडलाय नमः सं सत्त्वाय रं रजसे नमः तं तमसे अं अन्तरात्म
ने नमः ह्रीं ज्ञानात्मने नमः ज्ञानतत्त्वाय नमः मायातत्त्वाय नमः कालतत्त्वा
य नमः परतत्त्वाय नमः इति संपूज्य अष्टदलकेसरेषु महालक्ष्म्यै नमः सर
स्वत्यै नमः प्रीत्यै नमः कीर्त्यै नमः शान्त्यै नमः पुष्ट्यै नमः तुष्ट्यै नमः इति
संपूज्य मध्ये पुष्पं दत्वा इति पीठपूजां कृत्वा श्रीचक्रं पूजां कुर्यात् यथा शिरसि
श्रीगुरुं संपूज्य संप्रार्थ्य प्रणम्याज्ञां गृहीत्वा प्राणायामादिषडंगांतं कृत्वा
त्रिखंडया पुष्पांजलौ सा शिवां शिवामानीय मूलं देवेशि भक्तिसुलभे परि
वारसमन्विते यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव इति तत्रावाह्य वह
न्त्या साहरु नानात्तेजः सौः श्रीबालात्रिपुरसुंदरि इहागच्छ २ इह तिष्ठ ति
ष्ठ इह सन्निधेहि २ इह सन्निरुध्य २ इह संमुखी भव २ इहावकुंठिता भव म

मसर्वोपचारसहितांपूजां गृह्णस्वाहा षडंगेनसकलीकृत्यामृतीकृत्य
परमीकृत्यावाहनादिमुद्राप्रदर्श्य मूलंमातृकांचाज्ञाप्यसामान्यार्घ्यंदे
वींत्रिःप्रोक्ष्यप्राणप्रतिष्ठांलेलिहानमुद्रयाचक्रविधावराभयपुस्तकाक्ष
मालीकुशपाशचापवाणकपालयोनितिवीजमुद्राप्रदर्श्यमूलेदेवींत्रिः
संपूज्यसंतर्प्य मूलंसांगायैसायुधायैसावरणायैसालंकारायैश्रीकामे
श्वरसहितायैश्रीबालात्रिपुरसुंदर्यै पाद्यंकल्पयामिनमः इतिपादयोः
मूलंसांगायै अर्घ्यंकल्पयामिस्वाहाशिरसिएवं च सांगायैआचमनियं
कल्पयामिनमः मुखे इतिसर्वंसामान्यार्घ्यंदेयात् ततःशुद्धजलेन च
पादुकोपरियायस्वत्रिपुरेरत्ननिर्मितेस्नानमंडपमायाहिस्नानार्थंश
क्रदिगंतं इतिस्नानमंडपंनीत्वास्वर्णासनेसमुपवेश्यप्राग्वदर्घ्यपाद्या
चमनीयादिदत्वामुखंप्रक्षाल्यलंकानयित्वामूलं च सांगायैश्रीबालायै
त्रिपुरसुंदरीपादुकायैस्नानंकल्पयामिनमः सर्पंगोदुग्धेनकेशासाध
नानितिधायोष्णोदकेनपंचगव्यैःपंचामृतैःशुद्धजलेनदेवींस्नापयि
त्वा च ओंबृहस्पतिदेवताभ्यांवासोभ्यांनमः इतिवस्त्रेदत्वा च विश्वदेव
तायकंठसूत्रायनमः इतिदत्वासामान्यार्घ्यात् मूलेनमलंकाराणिपरि
कल्पयामिनमः विशेषतोमुकुटपरिकल्पयामिनमः मूलंश्रीबाला
त्रिपुरसुंदरीपादुकायुगमातन्हापंचवायुरस्मरन् यागमंडपमा
याहिपरिवारगणैस्सह इतियागमंडपंनीत्वामूलेनश्रीबालात्रिपुर
सुंदरीपादुकायै गंधं परिकल्पयामिनमः मूलं श्रीबालाःअक्षता
न्कल्पयामिवोषट् एवंपुष्पाणिकल्पयामिवौषट् त्रिवारंसंपूज्यसं
तर्प्य धूपपात्रंपफट् इतिप्रोक्ष्ययामि कालाग्निरुद्ररूपायजगद्धूप
संगंधिनेसर्वगंधवहायगंधायनमः इतिसंपूज्य मूलंवनस्पतिरसोम
त्रोगंधाढ्योगंधमुत्तमः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां
श्रीबालाधूपंपरिकल्पयामिनमः ओंजगद्धुनिमंत्रमातरस्वाहा

इत्यपि घंटवादयन् सर्वं धूपं दत्वा ॐ जगत्त्र्यं ज्योतिरूपाय दीपाय गंयाय न
मः इति संपूज्य मूलं सुप्रकाशो महादीपः सर्वत्र तिमिरापहः साबाह्या
भ्यन्तरं ज्योतिर्दीपोयं प्रतिगृह्यतां श्रीबालात्रिदीपं परिकल्प॰ इति घंट
वादयन् पूर्ववदीपं दत्वा देवीदक्षे निधाय धूपं वामे च देवाग्रे चतुरस्रं मंडलं
कृत्वा स्वर्णादिपात्रे नैवेद्यं धृत्वा मूलेन निरीक्ष्यास्त्रेण प्रोक्ष्य कुशेनास्त्र
कवचनाभ्युक्ष्य ॐ जंसः वौषट् इति सप्तधाभिमंत्र्य यमिति सप्तधा तद्भूनदो
षं संशोष्य रमिति तद्दोषं संदह्य वमिति सप्तधाकृती कृत्य श्रीपात्रविंदुभिः
संप्रोक्ष्य धेनुयोनिगरुडमुद्राप्रदर्श्य मत्स्यमुद्रयाच्छाद्य जलदत्तहस्तग
त्वा वामानामाङ्गुष्ठेन नैवेद्यं स्पृशन् मूलं सांगायै॰ श्रीबालात्रिपुरसुंदरीनै
वेद्यं कल्पयामि नमः इति जलं दत्वा कृतांजलिः मूलं श्रीबालात्रिपुरसुंद
रि हेमपात्रगतं दिव्यं परमान्नं सुसंस्कृतं पंचधा षट्रसोपेतं गृहाण मम
सिद्धये इत्यत्र निवेद्य मूलेनाचमनं दत्वा कनिष्ठानामांगुष्ठैः ध॰ ऐं प्राणा
य स्वाहा तर्जनीमध्यमांगुष्ठैः ॐ क्लीं अपानाय स्वाहा मध्यमानांगुष्ठैः ध सौः
व्यानाय स्वाहा तर्जनीमध्यमांगुष्ठैः ध क्लीं उदानाय स्वाहा सर्वांगुलिभिः
मूलं समानाय स्वाहा इति प्रदर्श्य मूलेन वाग्भवेन आत्मतत्त्वव्यापिका श्री
बालात्रिपुरसुंदरी तृप्यतु॰ मूलं क्लीं आत्मतत्त्वं शोधयामि स्वाहा मूलं
श्रीविद्यातत्त्वं शोधयामि स्वाहा मूलं ह्रीं शिवतत्त्वं शोधयामि स्वाहा मू॰
सर्वतत्त्वव्यापिका श्रीबालात्रिपुरसुंदरी तृप्यतु इति तत्त्वैर्ग्रासचतुष्ट
यं ग्राहयित्वा मूलं श्रीबाले त्रिपुरसुंदरि नमस्ते देवदेवेशि सर्वतृप्तिकरं
परं मन्यानिवेदितं शुद्धं प्रकृतिं स्वस्वरूपीतलं अमृतानंदसंपूर्णं गृहाण
जलमुत्तमं इति जलं निवेद्य अस्त्रेणावस्त्रेणासनं स्थाल्यं संवेष्टयच्चंटां वा
दयन् वक्षेपूगाद्यैः सरपामभिनवरूपविष्टैः समंताच्छिन्नं यजनयजनति
कोर्व्यजमानामरवीभिः नर्मक्रीडाप्रहसनपरा पंक्तिभोक्तृन्नहसंती भु
क्तेपात्रकनकघटितेषट्रसांश्चिहिलासान् इति भुञ्जानां ध्यात्वा मूलेन

पुनराचमनं दत्वा नैवेद्यं किंचिन्निर्माल्यवासिन्यै दत्वा ववस्यति देवतापर्तां ह
लायनमः इति संपूज्य मूलमंत्रं यथाशक्त्या जपित्वा समर्प्य भुक्तवंतीं स्वरू
पं भावयेत् जलमादाय अमृतोपस्तरणमसि स्वाहेति देव्या हस्ते उत्तरापो
शनं दत्वा गतसारं निवेद्य मुद्धृत्य ततो स्वमंत्रेण तस्यानं प्रोक्षण एप ह्रीं संपो
यमुखं प्रक्षालनार्थं जलं करौ हस्तौ वार्थं सुगंधचूर्णं च दत्वा गंडूषानिकार
पित्वा कर्पूरशकलैर्दंतधावनं परिकल्प्य पुनर्गंडूषजलं दत्वा दव्यास्मरण
त्तलनं कृत्वा आचमनीयं निवेद्य कर्पूरादिना सुगंधमिश्रितां मूलमोनी
यमूलमुद्रायां श्रीविद्यायै तांबूलं कल्पयामि नमः इत्युत्सृज्य योनिमुद्रया
प्रणम्य पुनर्मूलमुद्रायां प्रसन्नपूजां विधाय ततो देव्याः हृदयादिषडंग
स्थानेषु श्रीं ह्रीं ऐं हृदयाय नमः श्रीं ह्रीं क्लीं शिरसे स्वाहा श्रीं ह्रीं सौः शि
खायै वषट् श्रीं ह्रीं ऐं कवचाय हुं श्रीं ह्रीं क्लीं नेत्रत्रयाय वौषट् ह्रीं श्रीं सौः
अस्त्राय फट् इति षडंगपूजां विधाय प्राग्वत्त्रोपदर्पणं पूजां कुर्यात्
तत्रादौ देव्याः पृष्ठभागे दक्षिणोत्तरायतं रेखात्रयं विभाव्य गुरुपंक्ति
त्रयं पूजयेत् यथोद्देशे रेखायां ऊर्ध्वकेशानंदनाथवज्र वृषध्वजनाथव
ज्रपूः इति दिव्यौघः तदधारेखायां विप्रिशानंदनाथवज्र महेश्वरीनंद
नाथवज्र रूपीनंदनाथवज्र इति सिद्धौघः तदधः ॐ तारांबावज्र भानुम
त्यंबावज्र जयांबावज्र विद्यांबावज्र सुखानंदनाथवज्र महोदर्यांबावव
ज्रपरानंदनाथवज्र पारिजातानंदनाथवज्र कुलेश्वरीनंदनाथवज्र
विरूपाक्षिनंदनाथवज्रपुष्पं प्रतीच्छ हुं फट् स्वाहा फेरखांबावज्रपुष्पप्र
तीच्छ हुं फट् स्वाहा इत्येते गुरुत्रयं पूजयेत् अग्रतो देवी मौलो अलोभयमा
त्रं पूजयेत् ततः केसरेषु वायव्ये ॐ त्रिपुरे हृदयपाक्षि वज्रपुष्पं प्रतीच्छ कं
फट् स्वाहा नैऋत्ये ह्रीं श्रीं विद्ये शिरःपाके वज्रपुष्पं प्रतीच्छ हुं फट् स्वाहा
ईशान्ये श्रीं बाले शिखापाके वज्र अग्निकोणे ऐं ललिते विकेकवचपा
केवज्रपुष्पः पूर्वे फट् महाविद्ये नेत्रपाके वज्र पश्चिमे मूले प्रोटत्रिरेख

रु· या·
५८

56

स्वशाक्तिशक्तेवज्रप्रथमंप्रतीच्छ हुंफट्स्वाहा इति पूज्य पूजकमध्ये प्राच्यानुसा
रेण षडङ्गदेवताः संपूज्य अष्टदले देव्यग्रदलमारभ्य वामवर्तेन चतुर्दिक्षु वं
वैरोचनवज्रप्रथमंप्रतीच्छ हुंफट्स्वाहा ॐ घं घेवज्र· ॐ पद्मनाभवज्रं ॐ अमि
नवज्र तथैव विदिक्षु हुंफट्स्वाहा ॐ शं शङ्खवज्र ॐ पं पद्मवज्रं ॐ अमि
मकवज्र ॐ मां मामकवज्र ॐ पां पाण्डुरवज्र ॐ स्त्री विद्येषवज्रः इति संपूज्य
देव्यग्रद्वारमारभ्य वामवर्तेन चतुर्द्वारेषु ॐ पं पद्मान्तकवज्र ॐ पं पद्मा
नकवज्र ॐ वि विघ्नान्तकवज्र ॐ नं नरान्तकवच इति संपूज्य चतुरस्रप्र
थमवीथ्यां इन्द्रादीनावाह्य संपूज्य तत्समीपवीथ्यां वज्रादीन्पूजयेत् ततो
मूले पुष्पाञ्जलिना त्रिवारं देवीं संपूज्य देवीपरिवारसहितान् तर्पयामिति आज्ञा
ञ्जिरसा गृहीत्वा परिवारदेवतास्तर्पयेत् ॐ सौः म्हौः इति पुष्पाञ्जलिं दत्वा
ॐ सौः म्हौः इं इन्द्राश्रीपादुकां पूजयामि तर्पयामि नमः इति सर्वत्र
श्रीश्रीपादुकांपूज तं यं यमराजाश्रीपादुकांपू· त निं निरृतिश्रीपादुकां
पू· तः वं वरुणश्रीपादुकांपू· त· वं वायोश्रीपादुकांपू· त· कुं कुवेरश्री
पादुकांपूज· ईं ईशानाश्रीपू· त ब्रं ब्रह्म श्रीपू· त· नं नारायणश्रीपा· पू·
त· इ इत्थं ततेरभ्यर्च्य प्रथमावरणम् सौः म्हौः पुष्पाञ्जलिं दत्वा ॐ सौः म्हौः
गुरुश्रीपा· पू· त· परमगुरुश्रीपू· त· परापरगुरुश्रीपू· त· इ परमेष्ठिगुरु
श्रीपू· त· इति गंधाद्यैस्ततैरभ्यर्च्य द्वितीयमावरणं ॐ सौः म्हौः पुष्पाञ्जलिं दत्वा
ॐ सौः म्हौः लक्ष्मीपापू· त कीर्तिश्रीपांपू· त· इति‥ तिश्रीपा· पू· त· इ थ
त्याश्रीपा· पू· त· स्थितिश्रीपापू· त· इ पुष्टिः श्री· पू· त· इ विभाश्रीपा·
पू· त· इ मतिश्रीपा· पू· त· इ भ्रान्तिश्रीपापू· ति इ नतिश्रीपू· त· इ वागभि
श्रीपापू· त· इ सभाश्रीपू· त· इ सोमाश्रीपू· त· ॐ सौः म्हौः क्रिया श्रीपू· त·
इ नुमिश्रीपादुकां श्रीध्यानमः इति गंधाद्यैस्ततैरभ्यर्च्य तृतीयावरणं
मू इ स्ववामेन· पूज्या ॐ सौः म्हौः पुष्पाञ्जलिं दत्वा रुरुभैरवपुत्रब्राह्मीश्री
पादुकांपू· तर्पयामि नमः इ चं चण्डभैरवपुत्रनारायणीपू· त· इ संहारभैरव

युतमंभवी ३ भीषणभैरवयुतम्अपराजितश्री ३ कालाग्निभैरवयुतकौमा
री॰ ३उन्मत्तभैरवयुतवाराही ३ विकारलभैरवयुतवारह्मीश्री ३ चंडीसिंही
श्रीपादुकां॰त॰ पूजयामिनमः इतिगंधाद्यनैसंपूज्य सोमकलांतध्यात्वाचतु
र्थावरणम् ४ देवीवामतःपूज्या ओंसौःम्हौः ओंपुष्पांजलिदत्वा ओंसौःम्हौः
सरस्वतीश्रीपादुकांपू॰त॰ ३ सतीश्रीपा॰पू॰त ३ दुर्गाश्रीपादु॰ पू॰ त॰ ३ स
वित्रीश्री॰पू॰त ३ ब्रह्मवादिनीश्रीपापूत॰नमः श्रीमतीश्रीपापू॰त॰ नमः
३ कुब्जिकाश्रीपा॰त॰ ३ चंपाश्रीपा॰पू॰त॰ नमः ३ नारायणीश्रीपा॰पू॰त॰
३ विश्वकगलाश्रीपा॰पू॰त॰नमः ३ प्रियाश्रीपा॰पू॰त॰नमः ३ इतिगंधा
द्यनपुष्पैर्देवीवामतःसंपूज्य पंचमावरणामः ओंसौःम्हौःपुष्पांजलि
दत्व ओंसौःम्हौःत्रिपुराश्री॰पू॰त॰ ३ श्रीविद्याश्रीपा॰पू॰त॰ नमः वाला
श्रीपापू॰ त॰नमः ३ कालिकाश्रीपा॰पू॰त॰ ३ ताराश्रीपादु॰पू॰त॰नमः
३ सुमुखीश्रीपू॰त॰ नमः वगलामुखीश्रीपापू॰त॰ नमः ताराश्रीपू॰त॰
नमः वैखरीश्रीपा॰पू॰त॰नमः ३ तुर्याश्रीपा पू॰ नमःमः ३ छिन्नाश्री
पा॰पू॰ त॰ नमः श्रीभुवनेश्वरीश्रीपादुकांपू॰ त॰ इतिगंधाद्यनपुष्पैसू
र्यमंडलावामतः संपूज्यः षष्ठावरणमू ओंसौःम्हौःगंगाश्रीपापू॰त॰
नमः यमुनाश्रीपा॰पूज त॰ नमः सरस्वतीश्रीपापू॰त॰ नमः ३ तीर्थप्रा
ग्रयतःपूज्याः सप्तमावरणम् ओंसौःम्हौःसर्वार्थसायकेश्रीचक्राय
नमः इतिपुष्पांजलिदत्वेतिसर्वत्रमूलविद्यांसप्तथोच्चार्य श्रीविद्या
परमार्थदेवताश्रीपादुकांपू॰त॰ पूजयामिनमः मूलं ३ श्रीत्रिपदंगा
श्रीपा॰पू॰त॰ नमः मूलं शिवायांमूलंवेदमातापाश्रीमूलंसप्त थोच्चा
र्यश्रीविद्यापद्मासनायमूलंदेव्यादक्षहस्तेयोः मूलं अक्षसूत्रश्रीपा॰पू
त॰ नमः पद्मश्रीपादुकापू॰त॰नमः देव्यवामहस्तेयोमूलंसपत्रकुसुम
श्रीपा॰पू॰त॰नमः मूलं लगुडश्रीपा॰पू॰त॰ नमः मूलं ऋग्वेदश्रीपा॰पू॰
त॰नमः यजुर्वेदाश्रीपा॰ पू॰त॰ नमः सामवेदाश्रीपा॰पूत॰नमः मूलं

अर्घ्यैर्वर्णवेदश्रीपा·पू·त· नमः इति गंधाक्षतपुष्पैरभ्यर्च्य वह्निमंडले विदीध्यात्वा अ
ष्टमावरणं श्रीमूलविद्यामुच्चार्य गंधाक्षतपुष्पधूपदीपनैवेद्याचमनीयाताम्बू
लादि समर्पयामि नमः मूलमुच्चार्य गृहीत्वा यं प्रदर्पकामकलारूपं देहं विभाव्य
संकल्पपूर्वकं षडंगादिन्यासं विधाय देवीं सपरिवारां ध्यात्वा मालां मूलेनाभ्यर्च्य स्व
मस्तके गुरुं ध्यात्वा तदाज्ञां शिरसि धृत्वा यथाशक्त्या मूलं विद्यां जपेत् तेजोरू
पं जपफलं देव्या हस्ते समर्पितद्ये कवचसहस्रनामस्तवराजपाठं विधायतत्
फलं मपि देवदेव्यै समर्प्य ३ इति श्रीरुद्रयामले तंत्रराजे श्रीविद्यायां परिवार
सतनकथनं नाम सप्तदशः पटलः १७ भैरव उवाच अथाहं शृणु देवेशि नि
त्यहोमविधिक्रमात् तथा पशुबलिं वत्स शृणुष्वैकमना प्रिये तत्र यथा यथा
ग्निं सत्नतीर्थीकृत्वा दांशानेकस्त्यामेकमांगारं परित्यज्य मूलेन स्वजिनादौ
वह्निं संस्थाप्य व्याहृतिभिराहृतित्रयं कृत्वा तत्र देवीमावाह्य षडंगमंत्रैः षडा
हुतीर्हुत्वा मूलेन षोडशाहुत्वा यथाशक्ति जपित्वा जपं समर्प्य नमस्कृत्य वि
सर्जयेत् इति नित्यहोमं विधाय बलिदानं कुर्यात् यथा पूजापीठादुत्तरत
स्त्वन्तरस्त्रत्रिकोणात्मकं मंडलं कृत्वा मूलं श्रीविद्याया बलिमंडलाय नमः
इति संपूज्य तदुपरि साधारं पात्रं अहीन सलिलपात्रं निधाय श्रीविद्या बा
लिद्रव्याय नमः इति गंधपुष्पाक्षतैः संपूज्य मूलं ॐ श्रीविद्ययक्ताधिपनीते
बलिं गृह्ण २ गृह्णापय गृह्णापय मम सर्वशांतिं कुरु २ यार विद्यां हिया कृत्वा
त्रुटि २ छिंधि छिंधि भिंधि भिंधि स्वाहा इति पठित्वा विशेषार्घ्यादि कधारादानेन वामांगु
मानामिकायोगेन बलिं निवेद्य प्रणमेत् पशुं शक्त्यस्त्वस्मिन्नेव वासरे छागादि ब
लिं दद्यात् तद्यथा सर्वलक्षणसंपन्नं पशुं मूलमंत्रेण स्नापितं गंधादिभिर
लंकृतं देव्या अग्रे स्थापयित्वा मूलेन प्रोक्ष्य स्वमंत्रेण संरक्षकं कवचेनावगुंठ्य मू
लेन धेनुमुद्रयामृतीकृत्वा बलिरूपाय पशवे नमः इति गंधादिभिः संपू
ज्य तस्य दक्षकर्णे ॐ पशुपाशाय विद्महे यन्तर्वायथीमहि तन्नो जीवः प्रचो
दयात् इति पशुगायत्रीं पठित्वा पुरतः खड्गं निधाय ॐ ह्रीं कालि वज्रेश्वरि लो

रुदंडायै नमः इति संपूज्य तस्य पृष्ठदेशे वागीश्वरीब्रह्मभ्यां नमः मध्ये लक्ष्मीनारायणाभ्यां नमः इति संपूज्य तत्पृष्ठे खड्गायासुरनाशाय देवकार्यार्थसाधनः पशुं छिंद्यतस्त्वया श्रीखड्गनाथ नमोस्तु ते इति खड्गमभिमंत्र्य गंधादिकमादाय मूलमुच्चार्य अद्येत्यादि तिथ्युल्लेखमंते अमुकगोत्रोऽमुकशर्माऽमुकसिद्धिकाम श्रीपरदेवतायै इमं पशुं तुभ्यमहं संप्रददे इत्युक्त्वा पुष्पाक्षतादिकं पशुशिरसि निक्षिपेत् ततः पशोः शिरो धृत्वा ध ओं यज्ञार्थे पशवः सृष्टा यज्ञार्थे पशुघातनं यस्मात्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः शिवाय तमिदं पिंडं मत्स्वा शिवतां गतः उद्बुध्यस्व पशो त्वं हि नाशिवे स्त्वां शिवोसि हि इति प्रबोधयित्वा खड्गमादाय अस्त्रीय फट् छिंधि २ स्वाहा इति मंत्रेण खड्गं स्कंधे निधाय स्वयं देवीरूपो भूत्वा निर्विकल्पः सन् तमेकेन प्रहारेण छिंद्यात् सविकल्पः साधकः परहस्तेन पशुछेदं कारयेत् ब्रह्मणास्तिरक्तैः स्वगात्रशोणितरूपोपि बलिर्देयः इत्थं बलिदानं विधाय मूलेन देवीं संपूज्य स्वर्णादिपात्रस्थं जलं धेनुमुद्रयामृतीकृत्य मूलेन देवीं निवेद्य ततः प्रागवदुत्तरापोशानं हस्तप्रक्षालनादिकं कारयित्वा नैवेद्यपात्रं स्वदक्षिणे निवेश्य नैवेद्यस्थलं संशोध्य मूलेनार्घोदकेन प्रोक्ष्य प्रागवत्तांबूलं समर्प्य आरार्तिकं कुर्यात् तद्यथा स्वर्णादिपात्रे चंदनादिनाष्टदलकमलं विरच्य तन्मध्ये दलाष्टके च यवगोधूमपिष्टरचितानि नवदीपपात्राणि संस्थाप्य घृतेनापूर्य कर्पूरादिगर्भिताणि वर्तीनि निक्षिप्य मायाबीजेन प्रज्वाल्य चक्रमुद्रां प्रदर्श्य मूलेन तदारार्तिं संपूज्य तत्पात्रमामस्तकमुद्धृत्योत्थाप्य घंटावादनपूर्वकं देवीमस्तकादिपादांतं त्रिवारं भ्रामयित्वा दक्षिणे स्थापयेत् अथ कुमारीपूजा सा यथा सर्वलक्षणसंपन्नां सुस्नातां सुपरिष्कृतां कन्यां सुवासिनीं वा समानीय तस्याः पादौ प्रक्षाल्य सूक्ष्मवस्त्रेण संमार्जयित्वा पूजापीठे समुपवेश्य तस्याः पादौ पादपीठोपरि निधाय तत्पादपीठे स्थिरासने संस्थाप्य तत्पीठपूजां विधाय तत्रोपविष्टायास्तस्या मूलेन

देवीमावाह्य मूलमुच्चार्य कुलकुमारिके वज्रपुष्पं प्रतीच्छ हूं फट् स्वाहा इति पुष्पा
ञ्जलिना संपूज्य पुनस्तथैव गंधपुष्पादिभिस्तस्याः पादौ संपूज्य दीपांतैरुपच
र्यैर्मूलदेवीरूपां तां ध्यायन् यथोचितं भोजयित्वा तांबूलं समर्प्य वस्त्रालंका
रदक्षिणादिकं यथाशक्ति दत्वा प्रणम्य विसर्जयेदिति कुमारीपूजा तत्र भोगपा
त्रनिवेदनपक्षे पूर्वोक्तरीत्या पूजितायै कुमारिकायै सुवासिन्यै चामत्रपा
त्रं निवेद्य भोजनादिकं दत्वा विसर्जयेत् तस्याभावेपि रःपद्मस्था पशुरुवे नि
वेद्य तर्पणविधिनात्रिसंतर्प्य तत्प्रसादबुद्ध्या स्वात्मनि योजयेत् ततः स्वकी
यं स्वात्मनि योजयेत् ततमूलेन देव्यै पुष्पांजलिं विधाय मूलेन प्राणाया
मत्रयं कृत्वा श्रीमूलविद्यायाः ऋष्यादिकं षडंगन्यासान् विधाय मूलेन
सामान्यार्घोदकेनाभ्युक्ष्य माले माले महामाये सर्वशक्तिस्वरूपिणी चतुर्व
र्गस्वरूपिण्येन स्मान्मे सिद्धिदा भव ॐ ह्रीं सिद्ध्यै नमः इति गंधादिभिः संपू
ज्य गंधं विघ्नं कुरु माले त्वं इत्यनेन दक्षिणहस्ते मालां गृहीत्वा स्वशिरसि
गुरुं मूलाधारे सूर्यकोटिप्रभां कुण्डलीं वा स्वाधिष्ठाने पीतवर्णां वैष्णवीं नाभौ
जीमूतसंकाशां कूर्चबीजं हृदये कालाग्निसदृशं फट्कारं मूलादिब्रह्म
रंध्रांतं सूर्यकोटिप्रतीकाशां श्रीविद्यां गुरुचरणयोरात्मानं च ध्यात्वा भ्रू
मध्ये आज्ञाचक्रे गुरुमंत्रदेवतात्मानमेकाविभाव्य कंठस्थविशुद्धचक्रे
तच्चतुष्टयमेकीभूतमानीय श्रीपरदेवतारूपं तद्ध्यात्वा मूलेन हृदय
मध्यगां मध्यपर्वणि स्थाप्यैकचित्तो भुक्त्वा भुवाग्नीवो ऋजुकायः प्रण
वोच्चारपूर्वकमारभ्याभिमतसंख्यं जपं समाप्य पुनः प्रणवमुच्चार्य ॐ
त्वं माले सर्वदेवानां प्रीतिदा शुभदा भव शुभं कुरुष्व मे भद्रे यशो वीर्यं
च सर्वदा इति मंत्रेण मालां शिरसि स्थाप्य पुनः प्राणायामत्रयं कृत्वा ऋ
ष्यादिकरषडंगन्यासांश्च अंगमात्रां च जपित्वा पुनः प्राणायामपूर्वकं सा
मान्यार्घोदकेन चुलुकेनादाय गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि इति मंत्रेण देव्या वामहस्ते न द

दकदानेनतर्पंसमर्प्य मालांप्रागुक्तमंत्रेण संपूज्य तेनैवरहस्थापयेत्
ततोशिवोसहपात्रवंदनंकुर्यात् देहस्थाखिलदेवतागजमुखादीत्रापि
पामिरवायोगिन्योवटुकाश्चयक्षापितरो वैतालकाश्चटकाःअन्येखेचरास्तच
रानिशाचराभूतापिशाचागरहा तर्प्यंतांकुलदेवकस्यापिवतांश्रीनाथपा
त्रामतं श्रीनाथादिगुरुत्रयंगणपतिंपीठत्रयंभैरवंसिद्धेभ्योवटुकत्रयंपद
युगंद्वितीकमंयुग्मंभवंवीरेचाष्टचत्वष्टषष्टनवकंवीरावलिंपंचमं श्रीम
न्मालिनिमंत्रराजसहितंवदेगुरुमंडलं ब्रह्मांडमंडलाकारंपात्रंनोमि
परंस्तुथास्तुथपापूरितंसाक्षात् आयुर्वितंप्रयच्छमे भैरवउवाच अधुना
देविवक्ष्येहंपात्रवंदनमीश्वरि तत्कालंयद्ददानंदपात्रेहेवेश्ववंदितं पू
जायांपात्रमानंदभरितंपरमेश्वरिगुरुणादत्तमभ्यर्च्य प्रणमेच्छिरसात
तः श्रीमद्भैरवघोषेवरप्रविलसच्चंद्रामृतप्लावितंदेत्राथीश्वरयोगिनीग
णमहासिद्धेसमाराधितंआनंदागमकंमहात्मकमिदंसाक्षात्त्रिखंडामृ
तंवंदेश्रीप्रथमंकरोवुजगतांपात्रंविशुद्धिप्रदं अथश्रुतिरिदंतेपात्रंस
नमितत्रमिंद्रापितासोमेनसतक्रतोपूर्णाआहावोमदीरसःपियंविश्वमि
दंभिहेयंतदेवाः इतिप्रथमं ततोश्रीपादुकांस्थात्वाशिवोहमितिविचिं
त्य हस्ताभ्यांपात्रंधृत्वामूलमुच्चरन् कुलंकुंडलिनीमुखेजुहुयात् आ
त्मनत्वंशोधयामिस्वाहा इतिप्रथमं द्वितियत्रिपुरापात्रेशिवोहंपरिचिं
तयेत् ददहंतिसर्वपापानिरुद्ररूपोप्रजायते हेमंसिंधुरसावरूंदपित
यादतंचयेपादिभिः किंचित्चंचलरक्तपंकजदृशाप्तानंदमुद्रीक्षितं वामे
स्वाङ्कविशुद्धमुद्धकवलंपाणौविधायात्मके वंद्रेपात्रमहंद्वितीयमधुना
नंदैकसंवर्धने अथश्रुतिर्हिरण्यपात्रंमधोपूर्णांददातिमसख्योसानिति
एकधाब्रह्मणोउपहत्तिएकयेवयजमानआयस्तेजोदधातिविद्यात्तत्वं
शोधयामिस्वाहा इतिद्वितियं त्रितीयेभैरवेपात्रेवीरघेकोमहाहृदिः इरि
तंविलयंयातिरक्षाकुर्वंतिसर्वदासर्वाप्यापकलाकलापकलितंकोन्

हलयोजितं चंद्रोपेंद्रमहेंद्रशंभुवरुण ब्रह्मादिभिः सेवितं पात्रं देवगणैः परं मुनिगणै
र्मोक्षार्थिभिः सर्वदा वंदे पात्रमहं तृतीयमधुना स्वात्मावबोधात्परं अथ श्रुतिः आवयेद
स्वहृर्णा वाजपेयेथे ज्येष्ठामनुप्रदिष्टां मदयध्यै दद्धा हुमो णोरायसेन्तविश्वानकरत्व इंद्रा
स्तीर्थीभ पंचपावनं तत्वं शोधयामि स्वाहा इति तृतीयं ३ मध्यमीनरसीवहृद्हरिहरब्र
ह्मादिभिः पूरितं मुद्रामैथुनयमैकमैनिरतं ज्ञातात्मनिक्राश्वयं आचार्यादिकवासिभैर
वकलामांसेन संशोधितं यायात्मं च मकारतत्वनिलयं पात्रं चतुर्थं नमः अथ श्रुतिः
आर्द्रं ज्वलति ज्योतिरहमस्मि ज्योतिर्ज्वलति ब्रह्माहमस्मि अहमस्मि ज्योतिर्ज्वल
ति ब्रह्माहमस्मि अहमस्मि ब्रह्माहमस्मि ज्योतिर्ज्वलति अहमेवाहं मां जुहोमि स्वा
हा इति चतुर्थं ४ गणेशं पंचमं पात्रं भुक्तिमुक्तिप्रदापकं गंधपुष्पार्चितं देवगंगा
याकृतनिर्मलं ५ आधारे भुजगाधिराजनिलये पात्रं महीमंडलं मध्ये सप्तसमुद्र
वारिपिहितं चाष्टौ च दिग्दंतिनः सोहं भैरवमर्चयन्नु तिदिनं तारागणैर्रत्नैरादि
त्यप्रमुखैः सुरासुरगणै राज्ञाः करैः किंकरैः अथ श्रुतिः जातवेदसे सुनवाम सोम
मरातीयतो निदहाति वेदः स नः पर्षदति दुर्गाणि विश्वा नावेव सिंधुं दुरितात्यग्नि
इति पंचमं ५ षष्ठं चैवाग्निपात्रं तु मूलमंत्राभिमंत्रितं भस्मीकरोति पापानां पु
त्रपौत्रविवर्द्धनं छत्रचामरभद्रपीठपरमं नंदोदपंदायकं वाजीदंतिमनोहरं
वश्येभोजयेत्जपाद्विशांतुदशांशतः उत्तमंतद्भवेत्कर्मतत्वांसेनतुमध्यमं ८० होमा

छेतांशांतौ विप्रभोजनं त्वथमं मतम् शांते द्विगुणितं विप्रभोजनं स्तंभने स्मृतं त्रिगुणं द्वेष

णोच्चाटे मारणे होमसंमितं अतिशुद्धकुलोत्पन्नाः सांगवेदविदोमलाः ८२ सदाचाररं

ता विप्रा भोज्या भोज्यैर्मनोहरैः पूज्यास्ते देवतावुद्ध्या नमस्कार्याः पुनः पुनः ८३ संतोष्या

मधुरैर्वाक्यैर्हिरण्यादिप्रदानतः अचलं भवतभीष्टं गृहीता याऽतदाशिषा ८४ एतैरा

भिचारकर्मोत्थान् पृपतिर्द्विजवाक्यतः चंदनं रोचना रक्तं गृहधूमास्थिता भव धूप अग

रो हृविषायुणि निशांत्यादौ यंत्रलेखने पूर्वोक्तगेहे लेखिनं गृह्णीयात्तापयधूकवम ८६ पि

प्पलीमरिचं शुंठीं धूपेन विष्टाश्च चित्रकः गृहधूमोन्मत्तरसो लवणं च विषाष्टकं ८७ शां

तौ वश्ये पलिविधूर्जे स्तंभने द्वीपचर्मणि खरचर्मणि विद्वेषे उच्चाटे ध्वजवाससि ८९ नरास्थि

नि लिखिद्यंत्रं मारणे मंत्रवित्तमः येत्वागंधास्मृता यंत्रतरंगे तेपि संमतः ९० हृतंपञ्चच

तुःकोणं त्रिषट्कोणं दलेन्दुवत् तोये शुमीमशाकानां पातु वाष्यार्यमस्य च ९१ आ

शांशुक्रमतो कुंडं शांतिमुख्येषु कर्मसु सौवर्णी यज्ञवृक्षोत्था स्रुक स्रुवौ शांतवश्ययो ९२

स्तंभने दिककार्येषु शुनौ लोहमयहितौ हेमजा रूपजाजासंभवा लेखनी शमे ९३ व

दूर्वीकरोत्पन्ना स्तंभने ऽश्वत्थवृक्षजा राजवृक्षभवाप्यादि विद्वेषे नुवरं जजा ९४

विभीतितो स्थितोच्चाटे मारणे तु श्मशानस्थिवा शुभे कर्मणि रम्या हे लेखनीरचयेत्सु

धीः ९५ रिक्ते तिथौ शुभदिने विशेषतामशुभे पुनः भत्तपचनर्पणाद्रव्यं तत्यात्रम

त्कीर्त्यते ९६ शांतौ वश्ये पहविष्यान्नस्तंभने परमान्नकं माषमुद्गास्य विद्वेषे गोधू

मान्नं समनेथ्युले ९७ ससरान्नं तथा प्रपामाश्वजा दुग्धोन्नपायसं मारणे प्रोदितम

दंत मंत्रवुर्वितो ९८ शांतौ वश्ये पहरिद्रान्तं जलेन तर्पणं ईरितं मरीचाद्यपकवाल्मैनस्तंभ

ने मारणे तथा मेषरक्तान्वितं तोयं विद्वेषोच्चाटयोर्मतं स्वर्णपात्रं तर्पणस्याद्धपंतौ

वश्ये च कर्मणि १०० स्तंभने मृत्तिकापात्रं विद्वेषादि रोगवं। लोहनिर्मितमुच्चाटे

कुकुटं च तु मारणे भद्रासने समासीनं शांतौ वश्ये प्रपूजयेत् जानुभ्यामुत्थितः स्तं।

कर्मणां

मे द्वेषादावेकपास्थिताः षट्विधि प्रोक्ता एवमंत्रतत्त्वुष्ये सम्यक्कृत्वा न्यासजालं।

मात्मरक्षां विधाय च काम्यकर्म प्रकर्तव्यमन्यथाभिभवे भवेत् शुभवामशुभं वा

पि काम्यकर्म करोति यः ३ तस्यारिक्तं व्रजेन्मंत्रो न तस्मात्तन्यरो भवेत् विषयासक्त

चित्तानां मनोषाय प्रकाशिते ४ पूर्वाचार्यैरिमा काम्यं कर्मनेतद्धितावहं काम्यक

र्मप्रसक्तानां तावन्मंत्रफलं भवेत् ५ निष्कामं भजतादेवं मद्विभीष्टसिद्धयः प्रति

मंत्रसमुदितापप्रयोगास्वावाप्रये ६ तदाशक्तिं विहायैवौ विनिःकामो देवतां भजे।

खं ५

रु०या० १९५

108

त् वेदकामंत्रयंप्रोक्तंकर्मोपासनबोधनं ७ साधनंकांडयुग्मोक्तं तृतीयेसाध्यमीरितं।
तस्माद्वेदोदितंकुर्यादुपासीतेतिचदेवता ८ शुद्धांतःकरणेतेनलभतेज्ञानमुत्तमं कार्य।
कारणसंघातेषुप्रविष्टंचेतनात्मकः जीवोब्रह्मैवसंपूर्णमितिज्ञात्वाविमुच्यते मनुष्यदेह
संप्राप्यदुपासीतस्वदेवता ९ यतोमुच्येतसंसारान्महापापयुतोपिसः आत्मज्ञाना
न्नयेतस्माद्यतितव्यंनरोत्तमैः १० कर्मभिर्देवसेवाभिःकामादिगणदत्ययात् चिकी
र्षुर्देवतोयास्तिमादोभावविचारयेत् ११ स्नानंसंध्यादिकंकृत्वास्मृत्वाश्रीपदांबुजे प्रायी
तस्मिश्च्छय्यायांप्रार्थयेद्वृषभध्वजं १२ ॐदेवदेवेशशूलधृक्हव्यवाहनः उच्छानिष्टंच
मावद्त्वाममसुप्तस्यशाश्वतः १४ ॐनमोजायतेत्रिनेत्रायपिंगलायमहात्मने वामायवि
श्वरूपायस्वप्नाधिपतयेनमः १५ स्वप्नेकथयमेतथ्यंसर्वेकार्येष्वतःक्रिया सिद्धिंचततः।
विधास्यामित्वत्प्रसादान्महेश्वरः १६ एभिमंत्रैःशिवंप्रार्थ्यनिद्रांकुर्यान्निराकुलाः स्वप्ने
दृष्टंनिशिप्रातर्गुरवेविनिवेदयेत् १७ तमंतरेणमंत्रज्ञःस्वयंस्वप्नंविचारयेत् लिंगंचंद्रा
र्कयोर्बिंबंभरताजाह्नवीगुरुः १८ रक्ताब्धिनरराजयुद्धेजयोनलसमर्चनं प्रियविहंगरथं
गोधेरयंप्यानेचमोहनं आरोहनंसारसस्य परालाभश्चनिम्नगा प्रसादंस्यंदनंपद्मं
त्रंकन्याफलंद्रुमौ २० नागोदीपोहयःपुष्पंवृषभोधिश्चपर्वतं सुरापलंग्रहस्तारंनारीदी

ना० १२

प्तपेदिपोप्सराः २१ हर्म्यशैलविषाणाग्रमारोहोगगनेगमः मद्यमांसादनंविष्ठालेपोरु
धिरसेचनं २२ दध्योदनादनंसज्याभिषेकोगोद्विजः ध्वजासिंहसिंहासनेशंखोवादित्र

दिधिः १०

रोचनौ २३ चंदनेदर्पणौचैषांस्वप्नसंदर्शनंशुभं तैलाभ्यक्तःकृष्णवर्णोनग्नोनागतवा
यसो २४ शुष्ककंटकवृक्षश्चचांडालोदीर्घकंधरः पाशादलहीनश्चमेत
त्वशुभावहा २५ शांतिंकुर्वीतदुःस्वप्नेजपेन्मंत्रमनन्यधीः अवदत्रिकंजपं
तस्यकुर्वतोविघ्नसंभवः २६ विघ्नेसद्यमनावृत्यासदामदामवेत् सिद्धोवै
प्रपस्तचिंतासंतुरीयोद्वेषासिद्धभाक् २७ पुनःप्रसादसंतोषःश्रावयंदुंदु
भिर्ध्वनिः गीतस्यतालशब्दस्यगंधर्वीणांसमीक्षणं २८ स्वतेजसाःसूर्यसा
म्यदर्शननिद्राक्षुधाजयः रम्यतारोग्यगांभीर्यमभावःक्रोधलोभयोः २९
एवमादीनिचिह्नानियदापतिमंत्रवित् सिद्धमंत्रस्यजानीयादेवतायाः
प्रसन्नता ३० ततोजपाधिकंयत्नंप्रकुर्याज्ञानलब्धये लब्धज्ञानेकृता
र्थस्यात्संसारापरिवर्तते ३१ ज्ञात्वात्मानंपरंब्रह्मवेदांतेप्रतिपादितं
तंवदेपदेपरमात्मानंसर्वव्यापिनमीश्वरः २३२ इतिश्रीरुद्रयामलतं

भगवन् ७

या० ५

त्रराजे श्रीविद्यायां सिद्धसाध्यसुसिद्धारिमंत्रभेदनिर्णयं नाम पंचत्रिंशः पट
लः ३५ ॐ स्वस्ति श्रीगणेशाय नमः ध्यात्वा श्रीत्रिपुरां हृदब्जकुहरे नत्वा गणे
शं गुरुं श्रीविश्वेश्वरसंज्ञकं स्वजनकं वेदागमार्थानुगं मंत्रादीन्स्मृतिसंग्रहं प्रक
रणान्दृष्ट्वा पुराणान्यथो कुर्वेऽहं गुरुसेवकोलचतुरं ग्रंथोत्तमानिर्णयं पर
माकारुणिकेन महानंमहेश्वराचार्यवर्येण श्रीगुरुणोपदिष्टः कुलधर्मान
भिज्ञो धर्मशास्त्रनिपुणः कश्चिच्छिष्यः संदिहानो मोक्षमार्गाभिलाषी संसा
रभयभीतश्च जननमरणाकुलसंसारमसारं ज्ञात्वा श्रीगुरुमभिसृत्य भक्तिपूर्वं
प्रणिपत्याऽहं भो भगवन्मम मोक्षमार्गोपदेशं मंत्रो भवता दत्तस्तस्य पद्ध
तिमुपदिश इति विज्ञापितः सन् श्रीगुरुस्तं पद्धतिं शिष्यापयन् ब्राह्मे मुहू
र्ते उत्थाय भ्यसामान्यार्घपर्यंतं कथयित्वा यथाक्रमं प्राप्तं कलशस्थानं कु
र्यादित्याह तल्लक्षणमाह तंत्रांतरे कलां कलां गृहीत्वा वै देवानां विश्वकर्म
णा निर्मितो यस्सुरेर्यस्मात्कलशस्तेन चोच्यते कलशमानतंत्रे वोक्तं पं
चाष्टशांदंगुलायाम उद्धयो द्वादशांगुलैः कलशानां प्रमाणं तु मुखमष्टां
गुलं स्मृतं सौवर्णं राजतं वापि मार्त्तिकं वा पयोदितः तदुक्तं कालीतंत्रे त
त्रश्च कारणं दिव्यं समानीय घटस्थितं वेष्टितं रक्तवस्त्रेण रक्तमाल्येन भू
षितं वामभागे महेशानि मंडले चतुरस्रकं तत्र संस्थापयेद्भक्त्या देवी
वुद्ध्या वरानने कलशं मंडले द्रव्यपूर्णकं शशिमंडले अन्यत्रापि स्ववाम
भागे षट्कोणं तन्मध्ये वृत्तरेखकं लिखित्वा तत्र वै कुंभं सौवर्णं राजतं तथा मृ
ण्मयं वापि यद्वा लोहविवर्जितं कांस्यजं मृण्मयं वापि घटं सूणामयशा
लिनं सौवर्णं भोगदं प्रोक्तं राजतं मोदसाधनं कांस्यं पशांतिकरं चैव मृ
ण्मयं पुष्टिदं भवेत् शिष्यं नत्तु तनस्त्रकारणं दिव्यं समानीय घटस्थितं मि
त्यत्र मंडले कलशे द्रव्ये ऽत्यत्र कारणे शब्दो मदिरावाच्यकः न हि हि
ते न मदिरास्यशासने कः यं विधियेपि वेन मदिरायाः प्राशमागमे प्युक्तं ।

चेत्तर्हि श्रुतिस्मृति पुराणेः सह आगमस्य महान्विरोधो जायेत एतं चन्द्ररे कु
तर्कनिविष्टवेदागमयोः कोपि भेदो नास्ति तदुक्तं कुलार्णवे वेदो निष्क
लशास्त्रो वै वेदार्थस्त्वागमः प्रिये भेदाभेदं न कुर्वीत यः करोति स पातकी सत्यं तर्हि श्रुतिस्मृ
तिपुराणेषु मदिराया मुनिभिर्निन्दकर्म कृता यथा सुरा पापं पुनो भवतीत्यादीनि बहूनि
वाक्यानि उपनिषत्सु संति सुरा पैष्टी वय थोक्तं मनुना सुरा वै मलमन्नानां पाप्मा च मलमुच्य
ते तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् एतेन मनुना पैष्ट्या एव निषेधो विहितो
न गौडीमाध्व्योः एवं चेत्तत्र यत्तु तेनैवोक्तं गौडीमाध्वी तथा पैष्टी विज्ञेया त्रिविधा सुरा यथा
चैका तथा सर्वा न पातव्या द्विजोत्तमैः तत्र द्विजोत्तमानां ब्राह्मणानां गौडीमाध्व्योरपि
पैष्टीसमत्वं प्रतिपादितं अत्र द्विजोत्तमः ग्रहणाद्ब्राह्मणस्य सुरादि शकलमद्यनि।
षेधोत्पत्तिः यदाह बृहद्विष्णुः माधूकमैक्षवं मैरं तालं खार्जूरपानसं मधूत्थं चैव माद्वीकं
मैरेयं नारिकेलजं अमेध्यानि दशैतानि मद्यानि ब्राह्मणस्य तु तथाह पुलस्त्यः पानसं द्रा
क्षमाधूकं खार्जूरं तालमैक्षवं मधूत्थं मैरकं चैव मैरेयं नारिकेलजं समानानि विजानीयात्
मद्यान्येकादशैव तु द्वादशं तु सुरा मद्यं सर्वेषामधमा स्मृता तथा च कालिकापुराणे
मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्याद्वै प्रहीयते ब्राह्मणो न यात्रायै ब्राह्मण्यं न प्रहीयते
इत्यादीनि बहूनि वाक्यानि श्रूयंते तर्हि सदाशिवेन मदिरायाः प्रशस्त्यं कथं कैमुक्त।
मिति चेन्न सदाशिवेनापि मदिराया आत्यंगत हीविहिता यदुक्तं कुलार्णवे अमेध्या।
नि द्विजातीनां मद्यान्येकादशैव तु द्वादशं तु सुरा मद्यं सर्वेषाममधमं स्मृतं सुरा तु म
लमन्नानां पाप्मा च मलमुच्यते तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् सुराद
र्शनमात्रेण कुर्यात्सूर्यावलोकनं तत्समाघ्राणमात्रेण प्राणायामत्रयं चरेत् अ
जानुभ्यां भवेत्स्नानं गुरुवाज्ञा सदेवहि ऊर्ध्वं नाभेस्त्रिरात्रं मद्यस्पर्शने विधिः सुरा
पाने कामकृते मद्यस्पर्शादि दोषस्य प्रायश्चित्तमिति स्मृतं अनाघ्रेयमनालोक्य
मस्पृश्यं चाप्यपेयकं मद्यमांसपशूनां तु कौलिकानां महत्फलम् कौलिकानां
महत्फलमित्यत्र कौलाज्ञानाभिन्नं भवंति येषां महाफलं भवतीति चेत्सत्यं।
यथा ब्राह्मण एवस्मार्तो वैष्णवाः शैवाः पंचरात्राः सांख्यतार्किकाः कणभुक्प
थगा वेदाश्रितकापिला भवंति तथैव कौला अपि ब्राह्मण एव न त्वन्ये के पि अ

योक्तं जैनैर्मीमांसकैर्बौद्धैः शैवैः शाक्तैः कनास्तिकैः स्वस्वतर्कविभेदेन जानीयाद्दर्शनानि षट्
अनेन ब्राह्मणा एव कौला: तर्हि शिवेनैकेनैव कर्त्रा एकस्यैव कर्मणो विधानद्वयं कथमुक्त
मिदमसंजसमाभाती तदुक्तं तेनैव कुलार्णवे एकस्यापि विधानस्य न कुत्रापि फलद्वयं देवे
शि दृश्यते तस्मादिति चेत्तदा एकस्यैव वस्तुनो विधानद्वयविधानात्तस्यैव भ्रमो ऽस्माभि
र्दिविशंकायां महाएवं चेत्तदा वेदावेदस्मृतिपुराणकर्तृनामप्येकस्यैव वस्तुनो विधा
नद्वयविधानात् भ्रमो भूत्कथमित्याह यथाह मनुः मोहात् द्विजः सुरां पीत्वा तत्सव
र्णां सुरां पिबेत् तयास्य काये निर्दग्धे तत शुद्ध्यति किल्विषात् मोहाच्छास्त्रपरिज्ञानात्तत्त
त्त्वज्ञादित्यर्थः इति पारजातकृता व्याख्यानमितरायां तु मोहान्नोल्पासनेनेत्यर्थः पुनर
प्यन्यथा मनुरेवाह न मांसभक्षणे दोषो न मद्ये न च मैथुने प्रवृत्तिरेषा भूतानां निवृत्तिस्तु म
हत्फले ननु एकेन ग्रंथकृता एकस्मिन्नेव ग्रंथे एकस्यैव वस्तुनः विधानत्रयविधानमुक्तं कथं
एकस्मिन्न तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् अन्यत्रान्नपानव्याद्द्विजोत्तमैः
इति श्लोकाभ्यां मनुना सुरापानस्य साक्षान्निषेधो विहितः अन्यत्र मोहाद्द्विजः सुरां पीत्वे
त्यत्र विधिना विधानमुक्तं वान्यत्र न मांसभक्षणे दोषो न मद्ये न च मैथुने इत्यत्र ने
व दोषशंकां दूरीकृत्य पाने कोपि दोषो नास्तीति साक्षाद्विधिरुक्तः तर्हि मनुवचोभि
र्महती शंकाया ता कथमित्याह यद्वैपस्तद्वाक्यं निर्णायकं यन्नोक्तं तेनैव अन्यस्मृ।
तिपुराणवाक्यानां विरोधो मनुवाक्येन दूरीकर्तुं शक्यते मनुवाक्यानां परस्परं विरो
धो कस्य वाक्येन दूरीकर्तुं शक्यं तदुक्तं मनुविरुद्धा या स्मृतिः सा दरणीया न तु पवतेनेव
इति चेन्न मनोरयमभिप्रायः तस्माद्राजन्यो वैश्यश्च
महान्विरोधो विरोधो विहित ब्राह्मण^
क्षत्रियो राजन्यौ सुरां न पेया इत्यर्थः
न सुरां पिबेत् इत्यत्रोपासनादिरहिते ब्राह्मणादौ
शास्त्रवि
मोहादित्यत्र शास्त्रार्थापरिज्ञानात् इति पारजातव्याख्यानसामर्थ्यात्
यथा श्रीभगवद्गीतासु श्रीमुखवाक्यं यः
शास्त्रविधिमुत्सृज्य सुरापानं न कार्यमिति ज्ञायते
न स सिद्धिमवाप्नोति न सुखं न परां गतिं त
स्मात्शास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि
शास्त्र^
इति भगवद्गीता यदि शास्त्रविधितादोषो नास्ति तथापि प्रवृत्तिरेषा भूतानां निवृ
त्तिस्तु महत्फले इत्युक्तं यत्र महत्फलं तद्देवकरणीयमिति चेत् तर्हि दुग्धसेवधेयश्च

नमांससोममुत्पन्नादीनामपिहविस्तथाचमनुः सुत्यन्नानिपयः सोममांसंयच्चानु
संस्कृतास्वक्षारलवणंचैवप्रकृत्याहविरुच्यतेतत्यमधेमनुनापरिगणितानाम
प्येकस्यत्यागेमहत्फलमितिप्रसिद्धरस्त्येवतदुक्तंकुलार्णवे पृथिव्यांयानिक
र्माणिजिह्वोपस्थनिकं जिह्वोपस्थपरित्यागीकर्माणिकिंकरिष्यति एवंचेत्तथापि
त्यागएवकर्तव्यः इतिचेन्नब्रह्माण्डपुराणेकालिकापुराणादिषुदेवीपूजायामुक्त
त्वात् यदिकापुराणे मदिरापूर्णंनैवेद्यादन्यत्सर्वंचदक्षिणे इतितथाचब्रह्मा
ण्डपुराणेहयग्रीवंप्रत्यगस्त्यवाक्यं षोडशान्यासादयोन्यासान्यासमखंडेसमीरि।
ताः अन्तर्यागक्रमश्चैवबहिर्यागक्रमस्तथा महायागक्रमश्चैवपूजाखंडे।
प्रकीर्तितः इतिकेऽन्तर्यागःकोबहिर्यागः इत्याशंकायांब्रह्मयामलेनार
दप्रतिब्रह्मवाक्यंतेप्रतत्शास्त्रमिदंदिव्यंनवाच्यंश्रुतिचोदितं अन्तर्यागमिदं
ज्ञेयंबहिर्यागंतुवैदिकं मंत्रतंत्रसमायुक्तंतद्वयंब्रह्मबोधकं चक्रेसंकेतसमयं
सर्वंतुभ्यंप्रकाशितं गोपनीयंप्रयत्नेननवाच्यंपशुसंनिधौ त्यजन्महाकामहाभा
गसत्यमेतन्मयोदितं इतितथोक्तंकुलार्णवे यथैवाचान्तरारात्रः प्रियास्युर्नव
हिष्वराः तथान्तर्यागनिष्ठायेप्रियामेदेविनापरे भवतुपञ्चमयोगस्यागममहत्क त॰
लमुक्तंतथासत्सुश्रुतिस्मृतिपुराणोक्तकिमस्माकमागमेसह इतिचेन्मनुना
स्वसंहितायामागमशास्त्राणां मध्येयेनमवपूपमुक्तंकथमित्याहमनुनास्वसं
हिता यथाश्राम्नातानिमित्तहितसिद्धांतानिविविचिंतयेत् सिद्धांतान्यागम।
शास्त्रेष्वधीतेष्वाम्नातंभवति तदागमशास्त्राण्येवाध्येतव्यानिकिंवेदा
ध्ययनेनेतिचेन्नमनुनैवास्यश्लोकस्यानन्तरार्द्धे केवलागमध्ययनेनिषेध उ
क्तोयथाकेवलान्नियदाधीतिवेदकाह्योभवेद्विज अनेनवेदागमध्ययनेद्विज
स्यावश्यमधिकारोविहितः तत्वागमाचरणे एवंचेन्नमनुनागमाचारंगीकारा
त्कथमित्याहमनुरेवश्रुतिद्वैधंभवेद्यत्रतत्रधर्मावुभौस्मृतौ उभौअय
स्करौन्नूनंसम्यगुक्तौमनीषिभिः श्रुतिद्वैधमित्यत्रश्रुतिसंज्ञावेदस्यतन्नु
स्मृतिपुराणयोश्चदृष्टसिद्धिविग्रहायश्रुतंतच्छ्रुतितेनश्रुतिवेदः श्रुतिस्त्रीवे
द आम्नायइत्यमरः वैद्यगर्कवामदेवादित्यागमः तथोक्तंनिर्गतंब्रह्म

वदनाद्गतं श्रीब्रह्मणोमुखेमतं श्रीमुनिहृदस्य तस्मान्निगमउच्यते आगतं शंभु
वदनाद्गतं श्रीगिरिजामुखेमतं श्रीवासुदेवस्य तस्मादागमउच्यते एतेननि।
गमागमयोः श्रुतिसंज्ञाजाता कथमित्याह एतेननिगमागमाउभावदृष्टवि
ग्रहात् श्रुतावितिज्ञायते अन्यथा न हि कस्यविद्विप्रस्यवेदद्वयंभवति अने
नैवाभिप्रायेण मनुना श्रुतिर्द्वैविधमित्युक्तं अतो द्विजेनावश्यमेव निगमाग
माचारवादरणीयाविति मनुवचनेन ज्ञातं इति सिद्धं अन्यथा प्रायश्चित्तश्रवणा
त् तथोक्तं शिवशास्त्रे चतुर्वेद्यपियो विप्रो दीक्षितो न शिवाह्वये स तु शूद्रः अम
न्त्यः तस्माद्देयं न प्रशासनं तंत्रांतरे वहते श्रुत्युक्तं श्रीवाराहतंत्रे तायां स्मृतिसंभ
द्वापरे तु पुराणोक्तः कलौ वागमसंभवः इति तथोक्तं श्रीभागवते भक्त्या परि
चरेद्देवं तं प्रोक्तेन च केशवं तथा च तत्रैवोक्तं नैगमस्तांत्रिकोमिश्रस्त्रिधा चोपा
सको मतः भगवत् तर्हि श्रीभागवतवाक्येन तंत्रोक्तशब्देन स्मृतिपुराणे श्रूयते
इति चेत् तत्कथमित्याह एवं श्रूयते वहुधाराचार्यैः श्रीभगवतस्य वाह्योवादी
दीपिका
पिकां वहिनाय कां श्रीधरस्वामिना विरचितां तेन तंत्रोक्ते आगमोक्ते निति
व्याख्यातं अन्यैराचार्यैः सह तस्य महान्विरोधो जातस्तेन दीपिकानादरता तदा स
र्वैर्मिलित्वा स्वां स्वां दीपिकां सिकथवस्त्रेण संवध्य यस्य टीका गंगातो निस्सर
ति सर्वैः सैव प्रमाणीकार्या इति प्रतिज्ञापूर्वं ते स्वां श्रीगंगामध्ये प्रक्षिप्तवंतः
तेन तु कौशुभांशुकेन संवेष्टस्वां पादिकां निःक्षिप्त गंगायां तत्स्यैव टीका
निस्सरतायदि तेन तत्र शाकूशस्य कृतेव्यातस्तदा तस्य टीका गंगायाकथ्यं वा।
हिः प्रक्षिप्तस्तत्तद्दीका सर्वैरंगीकृते निति तथा चाध्यात्मरामायणे गंगाप्रतिसीता
वाक्यं देविगंगे नमस्तुभ्यं निवृत्ता वनवासतः रामेण पूजयेत्वाहं लक्ष्मणेन
समन्विता सुरामांसोपहारैश्च नानानैवेद्यसंयुते फलेनावूलवस्त्रैश्च
ब्राह्मणेकोटिभिर्हृते तिदेवीमधिकृत्य तथा च भविष्योत्तर एवं हृष्टैर्निशा

नीत्वा प्रभाते चारुणोदये घातयेन्महिषान्मेषांजातानन्यांस्तथा मृगान् श
तमर्धशतं वापि तथार्धं वा यथेच्छया सुरासर्वभृतैः कुंभैः पूजयेत्परमेश्वरीं
कापालिकेभ्यस्तत् देयं ज्वलद्भिर्दीपकूलकैः इति चेत्सत्यं भवतु तथा
पि श्रीभागवतरामायणे भविष्योत्तरवाक्यैस्तथा पूजाप्राशस्त्यमुक्तं चेत्त
र्हि लव्याचार्येण त्रिपुरामधिकृत्यानुकल्पः कथमुक्तः तथाचार्यैः वि
प्राक्षोणिभुजो विशस्तदितरे क्षीराज्यमध्वासवैः त्वां देवि त्रिपुरे परापर
मंतर्प्य पूजाविधौ यां यां प्रार्थयते धियां तेषां तप ध्रुवं तां तां सिद्धिमवा
प्नुति तरसा विघ्नैरविघ्नीकृत तथा च श्रीविक्रमे देव्यास्तु दक्षिणे भागे च
क्रपार्श्वे निवेदयेत् एतद्द्रव्यस्य शूद्रस्य नान्येषां तु कदाचन वैश्यस्यामि
कं शुद्धं क्षत्रियस्य तु साज्यकं ब्राह्मणस्य गवां क्षीरं ताम्रे वापि सज्जेन्मधु द्विजा
तीनां पापावकल्पेष्वितानां एतद्द्रव्यं तु शूद्रस्येत्यत्र शुचे द्राव पतीति शू
द्रो वीरः तस्यैवेतद्द्रव्यमुक्तं नत्वन्यस्य इति श्रीविक्रमलव्याचार्यैर्वाक्यै
रनुकल्पः एवं श्रेयानिति चेत्र तु तदभावेनुकल्पाय यथा प्रायश्चित्तैः श्र
वणात् तदुक्तं कुलार्णवे मद्याभावे तु वटुकं जले संध्यन पयेगुडमिश्रेण। यो॰
तक्रेण तथा च मधुभाजिना सौवीरेणाथवा कुर्यादेतत्कर्म न लोपयेत् प्र
मादाद्यदि लुप्येत देवताशापमाप्नुयात् तथा च भैरवतंत्रे मधुमांसवि
ना देवि कुलपूजां समाचरेत् जन्मान्तरसहस्रस्य सुकृतं तस्य नश्यति ए
वं बहुषु पुराणेषु बहूनि वाक्यान्युपलभ्यन्ते तत्र महाभारते मोक्षधर्मेषु।
दक्षप्रतिशिववक्यं अध्यात्मेनैवरं चाग्निरुत्थुपक्रम्य अपूर्वं सर्वतोभद्रं।
विश्वतोमुखमव्ययं अब्दैर्दशार्हसंयुक्तं गूढमप्राज्ञनिंदितं वर्णाश्रमकृ
तैर्धर्मैर्विपरीतं क्वचित्समं गतान्तैरध्यवसितमत्याश्रममिदं व्रतं मयापा

शुपतेनामन्युभमनुत्यादितमुत्तम तस्यचीर्णस्यमत्पुण्यंतत्रैभवतिनिश्चितं इ
तितत्रैवनारायणोदेवीइतिविष्णुवाक्यं सुरामांसोपहारैश्चभक्ष्यभोज्यैश्चपूजिता न्व
णामशेषकामांस्त्वंप्रसन्नासंप्रदास्यसि तेसर्वेसर्वदाभद्रेमत्प्रसादादसंशयं अ
संदग्धामविष्यंतिगच्छदेवियथासुखं इतितथामार्कंडेयपुराणेदत्तात्रेयवाक्यं।
मद्यैर्मांसैस्तथाभक्ष्यभोज्यैश्चैवात्मसंमितैः लब्ध्वापासमेतंगीतैश्च ब्राह्मणानांतथार्च
ने येतुमांपूजयिष्यंतिवाद्यैश्रुतिमनोहरैः तेषांमहत्परांपुष्टिं पुत्रदाराधनादिकान्
प्रदास्यामवधूतस्त्वहरिष्यामचमानतमिति तत्रैवसुमेधावाक्यं देवीमुद्दिश्य।
इत्थंपूजयेजगद्धात्रींचंडिकांभक्तवत्सलां अर्घ्यादिभिरलंकारैर्गंधपुष्पैस्तथाक्ष
तैः धूपैर्दीपैश्चनैवेद्यैर्नानाभक्ष्यसमन्वितैः रुधिराक्तेनबलिनामांसेनसुरया
सह प्राणामाचमनीयेनचंदनेनसुगंधिना सकर्पूरैश्चतांबूलैर्भक्तिभावस
मन्वितैः इतितथारुद्रयामले विनागौडींचमाध्वींचसुरापाःपूजयेच्छिवां शि
वंनारायणंसूर्यंदेवताःशापमाप्नुयात् तथोक्तंकुलार्णवे प्रोक्तंचवैष्णवेश
क्तेसौरेपुगतदर्शने बौद्धेपाशुपतेसांख्येवृत्तेकालमुखेतथा सद्दावाममसि
द्धांतेवैदिकादिषुपार्वति विनालिपिसितामध्यांनुपूजितंनिष्फलंभवेत् कुलद्र
व्यैर्विनाकुर्याज्जपपूजातपोव्रतं निष्फलंतद्भवेद्देविभस्मनीयंयथाहुतं इतिचे।
त्यंभवतु तथापिश्रीभगवतभविष्योत्तररामायणेमहाभारतविष्णुपुराण
मार्कंडेयपुराणे श्रीक्रमभैरवतंत्ररुद्रयामलकुलार्णववाक्यैः सुरयादेवदेविपूजा
प्राशस्त्यमेवापानेनतुस्वीकारः साक्षाद्देवतापानांगीकारादितिचेत्क्रमकथमि
त्याहयदिसुरापानेपापस्यात्तर्हिरुद्रादीनांग्रंथेषुकथपानवर्णनेक्रमेणकुत्स्याह
येश्लोकावह्निशुद्धानिस्मरंतितएवमयाग्रंथेमध्येप्रविष्टव्यानतथान्ये इतिप्रतिपूर्व
घेनवहून्यंडितानाहयस्त्वनामाकितंकाव्यंकारितंयेनाग्निनानदग्धास्तएवतत्र
तेनलिप्तावह्निशुद्धेमाघेवलभद्रवर्णनयथाघूर्णायन्मदिरास्वाद मदपादतल
क्षुतीरेवतीदशनोच्छिष्टपरिपूतपुटेहृशोनतत्रैवरेवतकवर्णनेक्रमस्यपानवर्ण
नेयथाक्रांतकांतवदनप्रतिबिंबमग्नवालसहकारसुगंधौ स्वादुनिप्रणदतालि
निशीथेनिर्ववारमधुनीद्रयवर्गः तथाभीतगोविंददिभासरणेगेता अंधकता

स्य

रु॰या॰
२१२
112

लितालेनवदस्मियदिकिंचिदपि दंतरुचिकौमुदी हरति हरतिमिरघोरं स्फुरदधर।
सीधुना तव वदनचमारोचपति लोचनचकोरप्रिये चारुशीले मुंचमयि मानमनि
दानं सपदि मदनानलो दहति मम मानसं देहि मुखकमलमधुपानं अत्रसीधु
शब्दो मद्यवाचकः तथा मैरेयमासवः सीधुर्मेदकः जगलसमो इत्यमरः।
इति नवमावतारस्य श्रीजगन्नाथस्य रथयात्रायामेकदा बलभद्रपतनं जातं
तदा राज्ञोत्पात मोत्पातमित्युक्ते तत्र कस्यचित्वाहिनीपतेः पद्यं यथा उत्पातितं
मदीह देव विचारणीयं दामोदर पतति चेदथवा सुभद्रका देववीरस्त विलोच
नलोचस्य युक्तं हि लांगलपतेः पतितं पृथिव्यां इति तथा च व्यासः उभौ वज्ञासवक्षी
वो दृष्टो मे केशवार्जुनाविति तथोक्तं दत्तात्रेयेण मुनिना विश्वामित्रेण धीमता प
राशरेण मुनिना निपीता वारुणी किल इत्यादीनि बहूनि वाक्यानि पानविधा
नुपलभ्यंते रितं चरेत् अतो देवैर्यदंगीकृतं तदवश्यमेवांगीकार्यमिति चेत्सत्यं न
देवचरितं चरेत् यद्दैवैः कृतं तन्न करणीयं यदुक्तं यद्देवकरणीयमिति चेन्न पठि
तेन चरितं तद्देवाचरणीयमिति न्यायाद्देवादिचरितमेव मर्त्यैराचरणीयं।
न पिशाचादिचरितमंगीकार्यं तदुक्तं भगवद्गीतासु यद्यदाचरति श्रेष्ठस्तत्तदेवे
तरो जनः स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते इत्युपक्रम्य मम वर्त्मानुवर्तं
ते मनुष्याः पार्थ सर्वशः इति तथोक्तं श्रुतिर्विभिन्ना स्मृतयो विभिन्ना नैको मुनि
यस्य वचः प्रमाणं धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पंथा इति वा
को देवादिविबुधचरितमेवाचरणीयमिति ज्ञायते भगवत्येते वाक्ये भव
द्वैमेद्विदृढतोश्राप्यस्तथाप्यत्र यदि श्रुतयः प्रमाणं न मतं तर्हि किं नांगीकुरुते इ
वत श्रुतयोपि सत्येव यजुर्वेदवाजसनेयिनाय था ऊर्जं वहंतीरमृतं घृतं पयः।
कीलालं परिस्रुतं स्वधास्थ तर्पयत मे पितरमिति ऊर्जं तेजः अमृतं घृतं पीयूषं हा
तमाज्यं पयो दुग्धं कीलालं परिस्रुतं मद्यं अथवा ऊर्जं अन्नं कीलालं पानीयं पशु
कीलालं बंधने स्थाने अलंकरोति कीलालं यज्ञ पशुं एतान् वहंतीः देवीरापो मे पि
तरं सुधास्थ तर्पयत देवीरापः इत्याध्याहार्यं सुरा हलिप्रिया हाला परिस्रुद्वरु।
णात्मजा इत्यमरः तथान्य श्रुतिपुराणेष्वाहावोमादिरस्य मद्यार्थं विस्पष्टमभिधा

घूर्णित ७

यैतिदेवा इति ऋगर्थे प्रमाणं अस्यार्थः हे इंद्र इदं दृश्यते नेनेति इंद्रः तथा तैत्तरे-
यब्राह्मणं तस्मादिंद्रो नाम इंद्रो ह वै नाम तमिंद्रं संतं इंद्र इत्याचक्षते परोक्षेण परो-
क्षप्रिया देवा इति तथा स उवाच त्वामेव यानियात् इति तमिंद्र उवाच प्राणोहमस्मि
ऋषे इति तेन हे इंद्र इदं ते पात्रं एतेनानेन सोमं अनेन चेंदुं संपूजार्हः कलशो भवे-
दिति सोमः कलशोदकं पिब कीदृशं पात्रं सत्रमित्र पणदाने दानेन लब्ध हे श-
तक्रतो शतशाकलां क्रतुशब्दस्य संकल्पवचनत्वात् नेमदिरस्य मादकस्य मध्वाः
मधुविषमः स्वाहावपूर्णः यं विश्वेदेवाः इदं अभिहार्येति अन्विषं तेन कलशोद-
कपानेन सर्वसंकल्पं मूर्तिविति मरुत्कलति त्यर्थः इति श्रुत्यंतरं कलशोदकस्य सो-
मत्वे प्रमाणं ऋग्वेदे तैत्तरेयब्राह्मणे श्रूयते अथाह सोमराकक संहल्लक्षादथा तिस्वा
दिष्ट्यामदिष्ट्यामपठस्व सोमधारयेति सराकं संदाने सोसोमप्रकाश मंत्रः कथितः
तयांतापिवेत् यदत्रशिष्टाशिनः सतस्य यदिंद्रो अपिबच्छचीभिः इदं तस्य मनसा शि-
वेन सोमं राजानमिह भक्षयामीति सुराभक्षणे सोमं राजानं भक्षयामीति कारणमं-
त्रः उक्तः अनयोर्दृष्टार्थत्वेवस्यात् अस्माभिस्तवं ज्ञायते सुरापाः सोमं वा चत्वेनानुष्ठे-
पार्थप्रकाशन दृष्टार्थता भवति तथायोह वा च सोमपार्थः सरायां प्रविष्टः इत्युप-
न्यस्तं तेन स्पष्टमेव सोमशब्दवाच्यत्वमयाने तथा तापीत्वा मिमं त्रयेतायासोमं-
शत्रो भवति एतं व्याख्यात प्रापं तथा च श्रुत्यंतरं अभिप्रेहि दक्षिणतो भवाम-
न्यो वृत्राणि जघनाव भूरि जुहोमि ते धरणमध्वा अग्रमभावुयांशुप्रथमापिवे-
ति अस्यायमर्थः मंत्रमन्युस्त्वाश्यो मन्युप्रस्तुच्यते हे मन्यो मन्युः क्रतुशतमा-
न्युः शतक्रतुरिति दर्शनात् श्रीचक्रार्चने रूपं यज्ञप्रस्तुच्यते हे मन्यो क्रतो त्वं अस्मा-
नभिप्रेहि अस्मान् आगच्छ दक्षिणतस्त्वं भव अथ वृत्राणि पापानि भूरि भूरीणि ज-
घनाव ते धरुणं धावकं मध्वो अग्रं विशेषार्घ्यरूपं तेन विनाम संभवात् त्वयि प्रथमं
जुहोमि तत उभावावापिवाउपां श्युयां गुह्यतया तत्यागोप्यते तत् द्वयोरो हे स्वयो-
निमिव पार्वति इति वेदादिस्तानागीवादिषु श्रुगोप्यत्वोक्तेः एवं बह्वश्रुतिषु
अयमर्थश्रुतिमुपलभ्यते यथा सौत्रामण्याउछेषणपातारं ब्राह्मणं त्रिणीते

च॰ ४

श॰ १४

ति ब्राह्मणस्य उच्छेषणपाने विहितं तत्र कथं दोषं प्रशक्तिविधिस्पृष्टत्वादित्यो तत्र
मस्ति प्रकृत तु पितृस्य किंचित्सौत्रामन्यां सुरोन्पादनरूपणेति सन्नवदेषु संधाने
मुक्तं तत्र हि तिस्रो रात्रीरवतिष्ठते तद्वदित्यर्थः सविस्तरं प्रपंचितः इत्यादीनां
सोमतुल्यता उक्ता सोमोपि किं तत्त्रिस्रो रात्रीरवतिष्ठेत तद्वदित्यर्थः सविस्तरं प्र
पंचितः अतो सोमशब्दवाच्यतयां प्रकृतस्य सिद्धायां सर्वेपि वेदाः अस्मिन्नर्थे
प्रमाणमिति साधितं मिति भवति तथोक्तं सौत्रामन्यां कुलाचारे ब्राह्मणः
प्रपिबेत्सुरामिति तथा च यजुर्वेदे हिरण्यपात्रं मधुपूर्णं मधुर्वोप्राणीति एक दा
ब्रह्मणे प्रहरति आयुस्तेजो दधाति तथा च सौत्रामण्यां महात्म्यं संध्याप्रयो
गे सौत्रामण्याभिषुतात्सुरान्फलविनियोगार्थः इति तथा च हंसः शुचिषत् इति
स्वादिष्टया मदिष्ठया सोमे गंगे इत्यादयो बह्वाऋचो वर्तन्ते विस्तरया भयान्न।
व्याख्याताः तथा च ज्ञानार्णवे यथा यज्ञेषु विप्राणां सोमपानेन दोष्यते सौ।
त्रपानं तथा कार्यं समये भोगमोक्षदा मिति एवं बहुभिः श्रुतिभिरयमर्थः।
साधितः सत्यं श्रुतिभिरयोर्थो यदि साधितः तर्हि श्रुतयोगादि सिद्धा भवं
ति शुक्रेण शापः पश्चाद्दत्तः कथमेतां प्रतिशापशंकां प्रमाभिदूरीका।
र्या इत्याशंकायामह वेदा भूतभविष्यद्वर्तमानकालप्रमाणार्थवा
चकाः नत्वेककालवाचिनः तथा च रुद्रयामले नारद प्रति विष्णुवाक्यं ए
कदाभ्यागादाश्रमे कमलापते तुष्टाव परया भीत्या नारायणमनामयं त
मागतमभिज्ञाय लक्ष्मीनाथो महाकुलः उवाच परया प्रीत्या नारदं मुनि
पूजितं महाप्राज्ञ महायोगपरायण शृणु नारद वक्ष्यामि तवागमनकार
णं शुक्रेण दत्तशापो वै कुलानां का गतिर्भवेत् तन्मोहनाशकामाय वै
दवाणीं निशामय यथा शृणोम्यहं दिवारात्रमवंविदितं श्रीजालपोवाच अ
यातो ब्रह्मशात्रस्तम्भत्वान्निश्चलमानसः अग्वेदमंत्रमादौ तु पुंश्चाव परया
धिपः पवित्रा पाप्मानां छुं शुणोति निहंति शापं न यो शापितं कोपि शक्तः सा

सौत्रामन्यावभृथे वेतियोगः ४

शापंवैमन्यमानास्तिरस्कृता: नरानरकवासंकारिण:अस्यार्थःपवित्रापूता
वारुणीइत्यार्थः:वारुणीमंदुष्कृतन्यायेनानुवर्तनीयापाप्मानंछेशृणोतिपा
पात्मानंपवित्रीकरोतिगतकल्मषंकरोतीत्यर्थः पुनःवारुणीकीदृशीशापे
निहंति वारुणीकायांशापितुंकोपिनशक्तोहिहेतोवैनिश्चयेनरामानुषान
रकवासंकारिणोभवंति कस्मिन्कलौतुरीययुगेकथंभूतातिरस्कृतानिंदि
ता अनादरतावाकलिशब्देनकलिनाछादिता: सुरासेवनपराङ्मुखीकृताअ
न्ययुगेषुत्वसेवनपराइत्यर्थः कथंभूतांतरायावारुणीसशापांजानंता:स्थियु
क्तोयमर्थः:सर्वपादार्थमूलभूतांसुरादेवीसशापांमन्यमानाजनानरकगा
मिनोभवंत्ये श्रीजालवाच इमामेवाथशुश्रावदेवमायासमीरितां वा
रुणींप्रतिसद्वाणींनारदोभगवानृषि परमानंदसंयुक्तोजगामस्वेछयामुनि:
ततोजानियविमलांवारुणींशिवसेवतां सर्वदेवसमाराध्यांसेवितांसिद्ध।
किन्नरैः वेदाज्ञायदीदृशीतर्हिशुक्रेणकथंस्वाशापोस्यादत्त: एवंचेन्नप
नाप्राप्तंशुक्रस्यकाशक्तिः:शुक्रेणानधिकारिण:शप्तानदुक्तेनत्वेवजालेप
रोप्रति जालपोवाच मांसंशापंकथाश्चितेवारुणींप्रतिसत्तम: शुक्रको
वावराकोस्तियोमुंशप्तुंक्षमोभवेत देवानायानिप्रसंगेनशापोदत्तोनृणा
मिह वर्णादिव्यवहाराणांवशीकृतमानसा नेकदाचिद्विनश्यंतु:स्वधर्मा
कविनात्विह युगंद्वापुरमाश्रयावशीकृत अल्पबुद्धिनराज्ञात्वाकलिकाले।
विशेषत: एतदास्वादनालोकानष्टसंताविशेषत धर्महीनाभविष्यंतिन
रकातिशयोस्पृशं एवंकृतेसमाधायमुनिकारुणिकामहान् एतदास्वा
दकर्तृणांददौशापमहामति: लोकामूढाविजानंतिशतांमेतांवरप्रदां वर्णा
श्रमाणांव्यवहृतमर्यादाधर्मगुप्तये मूढा:शास्त्रंविजानंतिवारुणींवरदायि।
नीं ब्रह्मविष्णुशिवाधाराशिवाराध्यंविशेषत: भवतुपदैोमेनसेषानशास्त्रा
वर्णाश्रममर्यादामतदास्वादकर्तृणांशुक्रेणशापोदत्तस्तदाद्विजातिभिरेषा
त्याज्येवसत्यं कविनानधिकारिण:केनाधिकारिण:कौलानदुक्तेनत्वेवजोल

लोकप्रकलि

रु·या·
११४

पास्वाः तां तेंद्रतिकः कौलश्चापितुंशक्यो द्वितीयामपि वारुणीं तस्मात्क्षमास्तु मा
शवः यां तु येनाधिकारिणः सदाधिकारकौलानां वारुणीपानकारिणामभि
न्नवर्णानां श्रमाचाराय एते नां भवंति हि कौलानामग्नितुल्यानां स्पर्शमात्रेण वा
रुणीं दृष्टोदृष्टादिदोषैः पवित्रा जायते पिताः सुरादर्शनमात्रेण कुलाशुद्धा भ
वंति हि वारुण्या सत्कुलाशुद्धा सत्कुलैरपि वारुणी वारुणी कुलयोकोपि
न भेदं वक्तुमर्हति: सदाधिकारकौलानां वारुणीपानकारिणामित्यत्र
कुले शरीरं धर्माधर्मख्यानं तिजानाति इति कौलः न हि सत्स्वते षु शुक्रे कथं।
शापादत्रः यदुक्तं महाभारते समन्युस्थाय महानुभाव तदा विप्रहितं चिकीर्षुः
काव्यः स्वयं वाक्यमिदं जगाम दस्तुरापानं प्रतिजातशंकः: यो ब्राह्मणोद्यप्र।
भृतीह कश्चित्मोहात्सुरापास्यति मंदबुद्धिः अपेतधर्मा ब्रह्महा चैव स स्यादस्मि
न् लोके गर्हितः स्यात्परे च मायाचेमां विप्रधर्मोक्त सीमां मर्यादां वै स्थापितां
मर्त्यलोके संतो विप्राः शुश्रुवांसो गुरूणां देवा लोकाश्चोपशृण्वंतु सर्वे
ब्रह्मत्यासमपापं तस्य स्याद् ब्राह्मणस्य तु यः यास्यति सुरां मोहान्नरकं चापि या
स्यति इति शुक्रे शापमनादृत्य ब्रह्मादिभिः सुराकथमंगीकृते चेन्न तेस्स शा।
पोद्धारं कृत्वा कादंवरी पुनरंगीकृता कुत्र दृष्टुं कस्मादृतमित्याशंकायां देवी।
प्रति शिववाक्यं रुद्रयामले देवीरहस्ये यथा शिव उवाच शृणु देवि प्रव।
क्ष्यामि सुराशुद्धिविधिं परं यं विधाय कलौ मंत्री भविता मुक्तिभाजनः ये रेव
पातकी देवी साधको द्रव्यशंकरीः शुद्धस्तेनैव पूजायां भवेद्योगापवर्गकाः।
यदा प्रभृति लोकेस्मिन्सुरा ख्यातिमुपागता तदा सर्वे सुरा देवि ब्रह्मविष्णुहरा
दयः तत्संसर्गा भवानंदनिर्भरांतरमानसाः असुरा राक्षसा यक्षा गंधर्वा मा
नवादयः भजंति च सुरां दिव्यां मंत्रसत्कारमंत्रितां कालेन कलसंस्था सुरा
देवि सुरेश्वरी कलिना कालरूपेण वाधिते गुगनप्रिये शापाः शुक्रेण दे
वेशि कचकारणहत्यया शुक्रशापवशी देवि ब्रह्मविष्णुहरादयः ॥

ब्रह्मर्षयः सुरा देव्यै ददुः शापं यथाक्रमं ब्रह्महत्या सुरापानं समं ज्ञेयं सुरेश्वरि सुरा
प्राप्याय देवैस्तदा दैत्या मुदं ययुः सुरां पीत्वा तु दितिजै देवबलविवर्जितः स्वर्गान्निराकृ-
ता देवि पुरंदरपुरस्सराः तदा जिष्णुं पुरस्कृत्य देवा यत्नमतन्वत सदाशिवादयो दे-
वाः प्रादुर्भूता मुखोत्तमा वरं वृणु यथाभीष्टं देवनायकसंप्रतं तं तदा प्रभुप्रप
छामी गच्छामो निलयं स्वकं तदा शक्रोब्रवीद्देवि पुरस्कृत्य निजं गुरुं तृणाग्रविंदुमा
त्रेण सुराया प्राशितेन च यावत्प्रजीयतेस्माकं न शाम्रतचेदेशतैः सा शापा ब्रह्मणा
देवी विष्णुना शंकरेण च तां विना निर्बला जाताः शत्रुभिश्च पराजिताः तदा सर्वे सुरा दे
वं शिवमीश्वरमव्ययं तुष्टुवुः परमा भक्त्या प्रणिपत्य पुनः पुनः ॐ एकाक्षराय रुद्राय
अकारायात्मरूपिणे उकारायादिदेवाय विद्यायाहाय वै नमः तृतीयाय मकाराय शि
वाय परमात्मने सूर्याग्निसोमवर्णाय यजमानाय वै नमः नमस्ते भगवान्रुद्र भास्क
रामिततेजसे नमो भवाय देवाय सर्वाय च कपर्दिने शिवाय क्षितिरूपाय सदासुर-
भये नमः ईशानाय नमस्तुभ्यं संस्पर्शाय नमो नमः पशूनां पतये चैव पावकामित
तेजसे भीमाय व्योमरूपाय शब्दमात्राय वै नमः महादेवाय सोमाय अमृताय नमो
नमः उग्राय यजमानाय नमस्ते कर्मयोगिने इति स्तुत्वा परं देवं भैरवं मीश्वरं प्रणे शिवं
मुः सकला देवा ब्रह्माविष्णुहरादयः तदा वागुदभूद्व्योमः पंचव्योमशरीरिणां सुरेयं
सर्वदा सिव्याप्तकलैस्तु मनुद्भिः युक्तानया प्रसंगेन यथावदनुपूर्वशः चतु-
र्विदरूपोहं ऋग्यजुःसामरूपवान् अथर्वाहं आत्मा परमा शिवोव्ययः देवानां
लोकवेदार्थमंत्ररूपविभाय च कुरुकुल्लां महाविद्यां सदाशिवप्रकाशयः आगमं
नाम शास्त्रं तु चतुष्षष्ट्यात्मकं परं तस्मिन्सुरादिशुद्धिंत प्रकाशाय मनुत्तमे इति वाणी
शिवो भूत्वा विरराम यदा तदा सदाशिवमहेशानं तुष्टुवुः प्रणतासुराः ॐकाररूपि-
णे देव नमस्ते विश्वरूपिणे इत्युपक्रम्य इति स्तुत्वा महादेवो महात्मा श्रीसदाशिवः
प्रोवाचगमशास्त्रं तु मोक्षमार्गे महात्मनां देवदेवीतिया देवी श्रीभवानिति विश्रुता ॥
सदाशिव प्रणम्याशु प्रोवाच श्लक्ष्णया गिरा वद देवागमं शास्त्रं रहस्यं परमाद्भुतं य-
स्योच्चारणमात्रेण शापहीना भवेत्सुरा श्रीशिव उवाच शृणु देवि प्रवक्ष्यामि सुरास-

रु.या.
११५
115

ह्लिंय याक्रमं मकाराणांतु सर्वेषां शोधनं सिद्धिरूपिणां वर्द्धनं वेदोनिष्कलशुद्धो वै।
वेदार्थोस्त्यागमं शिवे वेदागमार्थतत्त्वज्ञै सुरासेव्या मुमुक्षुभिः शास्त्राणां परमेश्वा
नि मंत्रानि कार्याणि कौलिके अधुना शृणु देवेशि सुराशोधनमुत्तमे इत्यारभ्य शोध
न द्रव्यानि परमेश्वरि भैरवं भैरवीं देवी यजेद्वीर समागमे अयथा भैरवं देवमकृत्वा
देवतार्चनं पशुपानविधौ पीत्वा वीरोपि नरकं व्रजेत् इत्यंते विस्तरं भया चतुर्नवतिमंत्रा
नोक्तास्तथोक्तं कुलार्णवे असंस्कृतां सुरा पापा कलहा व्याधि दुःखदा आयुः श्री कीर्ति सौ
भाग्य धर्म विद्यादिनाशिनी सुसंस्कृता सुरारोग्यं सर्वदुःखं पदे पदे अग्निसूर्येन्दु सद्ब्रह्मवि
ष्णुरुद्रेश सन्निधिवे चतुर्नवतिमंत्रे स्यान्मदिरा परमामृतं एतेन साधकस्य पूजादावा
सं वश्यश्रीकारो वश्यमेवायतः तदुक्तं भावचूडामणौ शिवं इति देवीवाक्य विना
हेतुकमास्वाद्य मोदयुक्तो महेश्वराः न पूजां मम संकुर्यान ध्यानं न विचिंतनं त।
स्मात् भक्त्या च पीत्वा च पूजयेत् परमेश्वरीं भक्तेति पूजादावात्मा पूजायां द्रव्येण सहाम
ल्कमात्रं शु विमर्थो न तु भोजनां गीकारः तत्रांतरेपि देवो भूत्वा यजेद्देवानां देवो
देवमर्चयेदिति यदाहं तत्रराजे आध्यसाधकयोरेतत्काम्यपेयं समीरितं सिद्धस्य
सर्वदा प्रोक्तां एतौ सौ विस्मयं भवेत् सिद्धस्य सर्वदा प्रोक्तं न तु साधकस्येत्यासंका
यां तत्रैवोक्तं यथा साधको नियताहारः समाधिस्थः वेत्स्वयमिति एतेनोक्तं कल्पोक्त
विधिनात्म पूजां विधाय पश्चाद्देवदेवी पूजां कुर्यादिति सिद्धं स्तरेण भया तत्कल्पो
क्त पूजा न लिखिता भवतु मयाप्यंगीकृत्य स्वात्मार्चां विना देवार्चने यद्यधिकारो।
नास्ति रुद्रयामलेवाक्यं कौलानां मग्नितुल्यानां स्पर्शमात्रेण वारुणी दृष्टोच्छि
ष्टादिदोषैस्तु पवित्रा जायते स्वयं इत्यादिवाक्ये शिवेन शापशंका दूरीकृत्वा तर्हि ते
नैव सुरासद्धार्थं चतुर्नवतिमंत्रा इति चेत्सत्यं शिवेन लोकमर्यादार्थं पशुनिश्चया।
र्थं चतुर्नवतिमंत्रा उक्तास्तु कौलिकसंदेहनिवृत्त्यर्थं तदुक्तं तंत्रांतरे यद्विस्याद्भैरवः
साक्षात्कर्षणोत्तमः तथापि लौकिकाचारमनसापि न लंघयेत् वारुणीसंदेहनिवृ
त्यर्थं रुद्रयामले आलपवाक्यं स्वपितरं प्रति यथा शापोद्धारोपि निगमे वारुणी
संदेह शोधने गुरु लिखितेपि न कर्तव्यः संदेहः सतुले हादिं सौत्रामणी नामय

पूजादोसत्व

ज्ञेपशुवर्णादंते भ्रष्टशुंभ्यानीयते सुरा तातीतस्यास्तेन्नाधिकारस्ता शुक्र।
शापसमुद्धारं विना तेकथ्यमाद्रिपुः पानार्थं पशवो यज्ञे पशुपानं व
शीकृता कुलानां सर्ववर्णानां न शापोपि शोधनं येन्नभ्रांता भविष्यं
ति कौलाशापादिशोधनं ते महपशवस्तान्नरकावासकारिणः कोवा
रवराकाणां दैत्यानां स्वपुरोहितः वारुणीशापदानार्थं यः क्षमो भवतिक्ष
तो तस्मान्नसमयोग्यास्युः ब्रह्मविष्णुशिवादयः शुक्रादयः केवराकाः
पेयुर्वारुणीं च ये इति पानवत्ताजालपयावारुणीशोधनं स्यापि शंकादू
रीकृता तथापि कुलार्णवे यामलादिवाक्ये शोधनस्यावश्यकत्वमपि
सूचितं ततो यथाविधि स्वस्वदेवतास्वकल्पोक्तविधिना संपूज्य शक्ति
वीरैः सहस्वपात्रवंदनं कुर्यात् तथोक्तं यामले माहेश्वर्यैर्महावीरैर्महा।
चीनपदस्थितैः महाशक्तिमयैः सार्धं सेव्यद्रव्यमिदं प्रिये गुरुं ध्यात्वा परां
ध्यायेद्वीरं संपूज्य शक्तितः शक्तियुक्तो यजेत्पात्रमित्याज्ञापरदेवतामे।
श्वरी शक्तिहीने वृथा पानं शिवहीने यथार्चनं शिवशक्तिसमायोगे।
वीरपूजाविमोक्षदेति भवत्वेन पूजनं कृतं तेनैव द्रव्यादिकं सेव्यं किमर्थं।
द्रव्यादिकं शोध्यमित्याशंकायामाह कुलार्णवे आराधनासमर्थोऽश्च दया
दर्चनशोधने योद्रातुं नैव शक्नोति कुर्यात्तद्दर्शनं सम्यक् शक्तितः कृतं कृत्वा य   दचनं^
त्फलं समवाप्नुयात् तत्फलं समवाप्नोति सकृत्कृत्वा क्रमार्चनं येन कृत्वा
षोडशमहादानानि लभते फलं तत्फलं समवाप्नोति दानानि लभते फलं।
लं^   सार्धत्रिकोटितीर्थेषु स्नात्वा यत्फलं भेत् तत्फलं लभते मन्याकृत्वा श्रीचक्र
दर्शनं श्रीचक्रदर्शनं वीरैः सहपानमित्यर्थः तथा च श्रीभगवद्गीतायां यज्ञ
शिष्टाशिनः संतो मुच्यंते सर्वकिल्बिषैः ये भुंजते ते त्वघं पापा ये पचंत्यात्म
कारणात् इति तथा रुद्रयामले येषां भवं पदं सपास्य कुबुद्धिनष्टा मार्गेभ

ह.या.
११८
116

जंतिपरमाविधिनोपितेषां नोजायतेसुगतिरत्रवहंतिभारं तेपापिनः पशुग
णाइवमुग्धभावा गंगादितीर्थनिचयानिमहापशूनां चित्तेस्फुरंतिपरि
तोनुयुगंहितावत् यावन्नकौलमुनिसंगतिमंडलेषु सतीर्थविंदुकणमेवपि
वंतिधन्याः इत्यादिवहूनिवाक्यानि संतिनिखिलानि भवन्तुयदिनवतिमं
त्राःप्राचेनशोधनार्थमुक्ता यावत्पानार्थकोपिमंत्रोक्तं नहिकेनपीयते इत्या
शंकायामाह श्रीमद्भैरवशेखरप्रविलसच्चंद्रामृतप्लावितं क्षित्यारब्धपात्र
स्तोत्रमिदंमित्यंतंषोडशमंत्राः संति एकपात्रप्रत्येकमंत्रंपठित्वाप्रतिपात्रम
मृतं कुलार्णवोक्तं वक्ष्यमाणमिदंमंत्रंद्यथा इदंपवित्रममृतंपिबामिभ।
वभेषजंपशुपानसमुच्छेदकारणंभैरवोदितं चित्तेस्वातंत्र्यामारत्वात्तस्मिनं
दमयत्वतः तन्मयत्वाद्भावाश्चांतरनारसेस्वस्वातंत्र्येविकाशायास्वरा।
मः स्वैरनपीयते तस्मादिमांसुरांपीयतेदेवीपूर्णवंतापिवाम्यहं मंत्रेण
नेनदेवेशिमूलमंत्रेणमंत्रवित् अनाकुलंदमनाकुर्यादलिकुर्यात्पानंशनैः
शनैः भवतुयदिस्वागमोक्तमंत्रोस्तिविदेनतर्हिश्रुतिमंत्रंविनापानेकथ
मधिकारं इत्याकांक्षायामथर्ववेदेपानमंत्रोयथा आर्द्रज्वलपतिज्यो
तिरहमस्मि ब्रह्माहमस्मियोहमस्मि ब्रह्माहमस्मिअहमेवमांजुहोमिस्वाहा।
इत्यनेनज्वलमानमार्द्रज्योतिमुखेजुहुयात् भवतुयदिवेदागमेषुमंत्राश्र
पिसंति तर्हिपानेनकावालाभोजात इत्याशंकायामाह ततःपानानंतरंअतः
मद सच्चिदाद्वितीयमखंडमचलमजमक्रियकूटस्थानेनस्वरूपंस्वप्रकाशं एतद्ब्रा ब्रह्म
श दंभिविशेषितं परंब्रह्मनदेवाहमेवास्मीतिवेदांतेप्रतिपाद्यतेतद्द्रव्यपानेनवि।
नाभवति मोमहमतेनमीमांसिकस्यत्रश्रुतिस्तत्वप्रमाणं अज्ञानस्यनामधेया
निआत्मवाइदमेकएवाग्रआसीत् तस्माद्वैतन्नष्टशांतदेवाअनुप्रविशत् अं
तःप्रविश्यशास्त्राज्ञानानां अनंतरमबाह्यंसबाह्याभ्यंतरमजंशरीरेषुबुद्धि
ह्णात्वादेवपाशंजुहोतितत्राग्यंपुरुषोस्वयंज्योतिर्भवति तत्रद्रव्यपानेनपाशहा।

नैयोयं विज्ञानमयः पुरुषो योयमसंगो ह्ययं पुरुषः योयमविनाशी पुरुषः प्रत्यगानंद
मयः पुरुषो विज्ञाने अन्यसहस्रशीर्षा पुरुषो योयममृतमयः पुरुषो विज्ञानमानंदो
ब्रह्म; प्रजापतिष्ठा ब्रह्म एक एवाद्वितीयं ब्रह्मेति स्मृतिरप्याह क्षेत्रज्ञं चापि मां विद्धि
सर्वक्षेत्रेषु भारत नवद्वारे पुरे देही नैव कुर्वन्न कारयेन् अनादित्वात् प्रकाशत्वात् क
मनामहं समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरं उत्तमपुरुषस्त्वन्यः परमात्मा समव्य
यः नजायते म्रियते वा कदाचिन्नायं भूत्वा भाविता वा न भूयः नादत्ते कस्यचित्पा
पं न चैव सुकृतं प्रभुर्विभुः अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः अविभक्तं विभक्ते।
षुः विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च पंडिताः समद
र्शिनः वासुदेवः सर्वमिति स महात्मा सुदुर्लभः उपदेष्टानुमंता च भर्ता भोक्ता
महेश्वरः सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितं आत्मैव देवताः सर्वा एतैर्वि
शेषणैः सर्वैर्विशेषितं परं ब्रह्म तत्त्वमसीति श्रुतिं गृहीत्वा दृढभावनया गुरोराज्ञ
या एवं वेदवाक्याद्गुरुतः स्वतस्त्रिप्रकारेण ब्रह्माहमस्मीति ज्ञात्वा समुक्त इति
सिद्धं तथा च श्रुतिः वेदाहमेतं पुरुषं महांतमादित्यवर्णं तमसः परस्तात् त
मेव विदित्वा मृत्युमेति नान्य विद्यते जनायेति अन्यथा शास्त्रगर्भेषु लुठंतो
भवतां इहेति अन्यदपि च ज्ञानभावः स्यात्तावद्देहे नास्ति भावनाभेदभावनयो
वेति सर्वस्मिन्नेकतालयः इति तथोक्तं कुलार्णवे समर्पयंति ये भक्त्या चा।
वाभ्यामपि सिद्धितासवं उत्पादयंति वानंदमत्रिपाः कौलिकाश्चते आवयो
परमाकारसच्चिदानंदलक्षणं कुलद्रव्यानुभावेन परिस्फुरति नान्यथा अ
तः स्वानुभवोल्लासो मनोवाचामगोचरः कुलद्रव्योपभोगेन जायते नान्य।
ष्यापि ये सेविते च कुलद्रव्ये कुलतत्त्वार्थवेदितः जायते भैरवावेशः सर्व
त्रसमदर्शनः तमःपरिवृते वेश्मनि यथा दीपेन दृश्यते तथा मायावृतो ह्या।
त्मा द्रव्यपानेन दृश्यते मंत्रपूतं कुलद्रव्यं गुरुदेवार्पितं प्रिये ये पिबंति ज।
नास्त्येषां स्तन्यपानं न विद्यते द्रव्यं तु देवो मोदः शक्तिः समीरिता अहो पी
त्वं द्रव्यं हि मोहयंत्रि दर्शनपि तन्मेरेयं पिबतो वा पीत्वा यो न विक्रयेन्नरः मनु
प्याने कपरो भूत्वा यात्समुक्तः सर्वकौलिकः सुराशक्तिः शिवो मांसं तद्भोक्ता

[margin, right:] निर्गुणत्वा च

[margin, left:] भैरवो

रु·या·
११७

भैरवः स्वयं तयोरैक्यंसमुत्पन्नमानंदोमोक्षउच्यते आनंदोब्रह्मणोरूपंतच्चदेहे
व्यवस्थितं तस्याभिव्यंजकंद्रव्यंयोगिभिस्तेनपीयते कुटिकंतुकपालानिम
धुपूर्णानिबिभ्रतः किन्नपशुपतिलोकोयंब्रह्मविष्णुमहेश्वरान् निःशंकोनि।
र्भयोधीरोनिर्लज्जोनिष्कुतूहलः निर्णीतवेदशास्त्रार्थोवरदांवारुणींपिबेत् मं
त्रसंस्कारसंशुद्धामृतपानेनपार्वति जायतेदेवताभावोभावबंधविमोक्षकः
देवान्द्विजान्समभ्यर्च्यवेदशास्त्रोक्त वर्त्मनागुरुंस्मरन्पिबेन्मद्यंत्वादेमांसंनदो
षभाक् तत्स्थैर्यंसर्वदेवानांब्रह्मध्यानस्थिरायच सेवेतामधुमांसानितृष्णया
चेत्सपातकी मंत्रसंस्फुरणार्थंमनसःस्थिरहेतवे भवपाशनिवृत्यर्थंमंत्रीपा
नंसमाचरेत् जीवःशिवःशिवोजीवःनभेदःशिवजीवयोः पाशबद्धोभवेजीवःपा।
शमुक्तःशिवःप्रिये मद्यमांसासवादीनांपदार्थानिषेवनं यागकालंविनान्य
त्रनमयाकथितंक्वचित् यथाक्रतुषुविप्राणांसोमपानंनदूषितं मंत्रपानंत
थाकार्यंसमयोभोगमोक्षदं तथाचमले यत्रास्तिभुक्तिर्नहितत्रमुक्तिर्यत्रा
स्तिमुक्तिर्नहितत्रभुक्तिः श्रीसुंदरीसाधनतत्पराणां भोगश्चमोक्षश्चकरा।
स्थएव ननुयत्रभुक्तिर्मुक्तिस्तःसएवधर्मःसर्वेषांदेवैःकथंनोपदिष्टः इ
त्याशंकायांकुलार्णवे काव्यशास्त्रपुराणानिसामान्यगणिकाइव एकै
कशांभवीमुद्रागुप्ताकुलवधूरिव कुलधर्ममिमंज्ञात्वामुच्यतेसर्वमान।
वा इतिमत्वामहेशानिमयालोकेविगर्हितं तथोक्तंभगवद्गीतासु नबुद्धि
भेदंजनयेदज्ञानांकर्मसंगिनां जोषयेत्सर्वकर्माणिविद्वान्युक्तःसमाचर
न् राजविद्याराजगुह्यंपवित्रमिदमुत्तमं प्रत्यक्षावगमंधर्म्यंसुसुखंकर्तुम।
व्ययं इत्यन्येनसुगोप्यत्वेसत्यपिपापत्वंभुक्तिमुक्तिप्रदायकत्वंचसपुराणा
गमवाक्यैः भगवत्कृपाकटाक्षवलोकनेकृतार्थोस्मिनिःसंदेहमितिमत्वा
कुलधर्मेदृढतरोबभूवेतिशिवमतेबहुनाविस्तारेणेतिसंदिग्धसंदेहभंजनतं
त्रराजेद्रव्यनिर्णयंगुरोमेवकोविमलेवकार एतंसुधासेवकोगुरुतःस
दृष्टासंदिग्धसंदेहभंजनतंत्रराजस्तुतंत्रराजमिदंदिव्यंसर्वतंत्रेषुगोपितं।

ना॰

लो॰

तवभक्त्यापिकथितंगोप्तव्यंसर्वथाप्रिये राज्यंदेयंदेयंशिरोदेयंनदेयंतंत्रमद्भुतम्
वसुपूर्णांगृहंदेयंनदेयंतंत्रराजकं तवभक्त्यापिदेवेशिकथितंप्रीतिपूर्वकं नदेयंपर
शिष्येभ्योमित्याज्ञापरमेश्वरी शिष्येभ्योभक्तियुक्तेभ्योऽन्यथानिरयीभवेत् गो
पितव्यंगोपितव्यंगोपितंपशुसन्निधौ शठायपरहीनायपरवादरतायच शक्ति
पूजाविहीनायनदेयंतंत्रमद्भुतं साधकायविशुद्धशीलायकुलज्ञानरतायच दे॥
व्यापूजनयुक्तायदातव्यंपरमेश्वरी बहुनात्रकिमुक्तेनगोपनीयंयथातथं यद्गृ
हेलिखितंतंत्रंश्रीविद्यातंत्रतिष्ठति चंचलापिस्थिराभूत्वातंत्रराजप्रभावतः दुः
स्वप्नंनभवेत्तस्यस्वप्नमुपजायते मारीभयेराजभयेव्याघ्रचौर्यादिकेभये सर्वंप्रश
मनंयातियंत्रराजप्रभावतः स्थापितंशुभवस्त्रेणपूजितंबहुधातथा गंधाक्षतप्र।
सूनैश्चपूजितंतंत्रमद्भुतं धूपदीपादिकैर्देवीपूजितंसुसमाहितैः गंगास्नानसहस्राणि
पुष्करस्नानकोटिषु यत्फलंसमवाप्नोतितत्फलंतंत्रपूजनात् यंयंवापिस्मरं।
कामंतंतंप्राप्नोतिनिश्चितं धनधान्यसमृद्धिंचपुत्रादिवर्धनं धारितंतंत्रराजेच।
प्रविशेद्रणमंडले सविजित्यरिपून्सर्वान्कल्याणीगृहमाप्नुयात् सर्वदुःख
प्रशमनंसर्वव्याधिविनाशनं सर्वसंकटनिर्मुक्तंतंत्रराजप्रभावतः ज्वरादिरोग।
शमनंवातपित्तकफोद्भवं एकाहिकद्व्याहिकंचचातुर्थकतृतीयकं सर्वप्रशमनं
यातितंत्रराजप्रभावतः शृणुदेवीप्रवक्ष्यामिगोपनीयंप्रयत्नतः गोपनीयंगोपनी
यंगोपनीयंयथातथः इतिश्रीरुद्रयामलेतंत्रराजेश्रीविद्यायांद्रव्यादिनिर्णयं।
नामषट्त्रिंशःपटलः ३६ शुभम् शुभम् शुभम् श्रीजगतनाम् ॥ ॥

यादृशंपुस्तकंदृष्ट्वातादृशंलिखितंमया यदिशुद्धमशुद्धंवा
ममदोषोनविद्यते ॥


भक्ति

माविशे

ह·या·
११८
118

श्रीगणेशायनमः

दीक्षाविधानम् विद्यार्णवसौभाग्यरत्नाकरमेरुतंत्रागमकल्पलता, मतात् ॥ ॥ ॥
अथ यथोक्तलक्षणः शिष्यो यथोक्तलक्षणं गुरुं पूर्वं चिरकालसेवितं शुश्रूषाचित्तप्रदानं विनयप्र
णामाद्यैर्बहुशः परितोषितं सुस्नातं कृतपूर्वाह्णिकक्रियं विचार्य विहितकालेषु दीक्षादिनात्पूर्वदि
ने शिष्यः प्रातःस्नातः कृतनित्यकृत्यः समलंकृतः पंचवाद्यघोषपुरःसरं ब्राह्मणैः कृतस्वस्तिवा
चनः प्रियसुहृद्भिः सार्धं स्वयं गुरुगृहं गत्वा तं विधिवत्प्रणम्य तदाज्ञया प्राणायामपुरःसरं ॥
ॐ अद्यामुके मासि अमुकराशिगते सवितर्यमुकपक्षे अमुकतिथौ अमुकगोत्रो ब्राह्मणश्चेदमु
कशर्मा क्षत्रियश्चेदमुकवर्मा वैश्यश्चेदमुकगुप्तः शूद्रश्चेदमुकदासोऽहं चतुर्विधपुरुषार्थसिद्धिकामो
मुकमंत्रग्रहणं करिष्य इति कुशहस्तः प्राङ्मुख उदङ्मुखो वा संकल्पं विधाय प्रमाणोक्त मधुपर्क
सामग्रीभिः स्वशाखोक्तविधिना श्रीगुरुं मधुपर्केणाभ्यर्च्य धौतोत्तरीयप्रच्छदपट स्वर्णगुलीय
ककर्णाभरण छत्रचामरोपानद्युगल स्वर्णयज्ञोपवीत हारकेयूरांगदादिनानाभरण प्राप्य्यातल्पा
स्तरणसंपन्नावरणसामग्रीं गुरुसन्निधौ निधायार्घ्येत्यादि प्राग्वन्निष्पुक्षे वर्णान्ते, मुक गोत्रो मुक
शर्मेत्यादि यथा वरणविहित मुक्ताचार्योऽहं चतुर्विधपुरुषार्थसिद्धिकामो मुकमंत्रग्रहणार्थममुक
गोत्रममुकवेदान्तर्गतामुकशाखाध्यायिनममुकममेभिर्यथाशक्तिविहितवरणसाधनैर्गुरुत्वेन वृणे
इति गुरुपादयोः प्रणम्य वरणसामग्रीं निवेदयेत् ततो वृतोऽस्मीति गुरुणा प्रतिवचने दत्ते शिष्यः
कृतांजलिः यथोक्तं गुरुकर्म कुरुष्वेति ब्रूयात् अन्यं गुरुवरणं विधाय तदनुज्ञया शिष्यो ब्राह्मणा
न्वेदवेदांगपारगान् स्वेष्टदेवतोपासकान् प्राग्गुरुवरणोक्त सामग्रीभिस्तथैव ऋत्विक्त्वेन वृणु
यात् चतुःकुंडपक्षे चत्वार एव ऋत्विजः कार्याः ततः शिष्येणैवं वृतो गुरुः कृतनित्यकृत्यः
समलंकृतः पंचवाद्यघोषपुरःसरं ब्राह्मणैः सुहृज्जनैश्च वृतः ब्राह्मणाशीर्भिरभिनंदितः
सशिष्यः सामयिकैः सार्धं दीक्षामंडपस्य पश्चिमद्वारं गत्वा पादौ प्रक्षाल्याचम्य प्राङ्मुखः स्वा
सने समुपविश्य प्रागुक्तं सामान्यार्घ्यं विधाय द्वारपूजां प्राग्वत्कृत्वा शिष्येण सह मंडपद्वारं ग
त्वा । ततः उपविश्य च तद्द्वारे परीक्षामारभेत् ततः शिष्याय मूलमंत्रं जप्त्वा प्रदद्यात् तद्धावनं दंतान्त्वि
शोध्य पुरतः स्थण्डिले त्वस्त्रमात्रके चतुरस्रे भ्यासयेत्तं तत्परीक्षेत् ततो गुरुः तदग्रं यदि पूर्वसंस्थं
तत्रेदं सर्वतः फलं ॥ भूतिर्हृदयसंतापो बंधुनाशस्ततो मृतिः प्रोक्तश्च व्यग्रता सौख्यं ज्ञानलाभः क्र
मात्फलम् अमंगलस्यानपाते प्रायश्चित्तं समाचरेत् अष्टाधिकं सहस्रं वा शतं विंशति रेव वा अस्त्र
संपुटिते नैव नाम्ना स्वाहान्तेन च दोषान् जहि वदेदेवं पदं नामावसानकं केवलास्त्रेण जुहुया
त् तृतीयमपि दुष्टं चेन्न ग्राह्यः स्यात्तु देवता
दुःस्वप्नेप्येवमेव हि दंतकाष्ठं पुनर्देयं पुनर्दुष्टे च तद्गुणं
ततः स्वप्नपरीक्षां च कुर्यात्तद्विधिरुच्यते वेदिकाग्रं द
वाममार्गी सकृदपि गुरुः शिष्यो विना प्रायेत् ततः स्वप्नपरीक्षां च कुर्यात्तद्विधिरुच्यते वेदिकाग्रं द
क्षिणानां वेसाराणां चवामिमाम् स्वप्राध्यायस्वक्रममेव, मेरुतंत्रे, वक्ष्यमाणविधिना द्वारपूजां
विधाय ॥



मे. २२

ततो भूतोत्सारणपूर्वकं मंडपांतः प्रविश्य ततः पंचगव्यार्घ्यतोयप्रोक्षणपूर्वकं वक्ष्यमाणवीक्षणादि
चतुर्भिः संस्कारैः संस्कृतमंडपाभ्यंतरे चंदनागुरुकर्पूरधूपिते चंदनसर्षपदूर्वाभस्माक्षतलाजानस्त्र
मंत्रेण सप्तधाभिमंत्रितान्मण्डपांतर्विकीर्य्यास्त्रमंत्रेण कुशमुष्टिना संमार्ज्य मंडपस्येशानकोणे संस्था
प्य ब्राह्मणैः पुण्याहवाचनं कारयित्वा वास्तुपुरुषपूजनादिकं विधाय ॥ ॥ तद्यथा वास्तुपूजा ॥
शिव उवाच स्थापयन्तु तद्विधिं देवा वामदक्षिणमार्गतः भूमौ निखन्य वा मुद्रापाषाणे प्रतिमास्तु च
वास्तुः पूज्यस्तु मंत्रेण वास्तोष्पते प्रतिजानीहीति १ वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशो अनमी
वो भवा नः यत्त्वेमहे प्रति तन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे इति श्रुतिमंत्रः ।
इति वैदिकमंत्रेण तस्यावाहनपूर्वकं नाममंत्रेण चान्येषां पूजां कृत्वा प्रदर्शयेत् नैरृत्यको
णो गेहस्य चतुरस्राकृतिं शुभां कृत्वा समतलां भूमिं वितस्त्युच्चां च वेदिकाम् विस्तारायामतो हस्तमात्रां तत्र
लिखेद्बुधः एकाशीतिपदं चक्रं वेदिकस्तत्र देवताः मध्यकोष्ठेषु नवसु तावद् ब्रह्माणमर्चयेत् आपवत्सौ
तदीशाने प्रागर्य्यमं त्रिकोष्ठके आग्नेये सवितारं च विवस्वन्तमथ त्रिषु इंद्रं नैरृत्यदिग्भागे मित्रं पश्चिमगे
त्रिषु वायव्ये राजयक्ष्माणं सुमेरुं चोत्तरत्रये वेदकोष्ठेषु चैशान्यामीशकोणाच्च देवताः शिखी पर्जन्यश्चा
पश्चादितिश्चाक्कोष्ठयोः द्वयोः क्रमादेते पंचदेवास्तात्तथा सव्यमार्गतः जयन्तेन्द्रौ सूर्य्यसत्यभृशश्चाग्नेय
कोणके अंतरिक्षं तथा वातः पूषा सावित्रपदवच्च चतुस्करीष्यातो देवास्ततो दक्षिणपंचके सुमेक्रमाच्च वि
तथो गृहक्षत यमो तथा गंधर्वो भृंगराजश्च नैरृतीष्ट चतुष्कके ईशानीतो जयस्तगो पितृदौवारिकौ तथा
ततः पश्चाद्धिके पंच सुग्रीवः पुष्पदंतकः वरुणोसुरशोषश्च वायव्ये ईशानतस्त्वद्धिः रुद्रश्च पापयक्ष्मी च
रोगश्चोत्तरपंचसु मुख्यो भल्लाटसोमौ च भुजंगश्चादितिस्तथा देवा एते पंचचत्वारिंशद्वर्च्यास्तु भक्तितः
भैरवक्षेत्रपालानां योगिनीनां विशेषतः वामाचारैर्वलिः कार्य्यो महिषैर्वापि कुक्कुटैः आराधितास्तु वामे
न त्वायन्नेति बुभुक्षिताः देवता वलिमिच्छन्ति तद्धीनं हन्ति साधकं मद्यमांसप्रमत्तास्ते प्राकृतेन प्रचोदिता
कदाचिच्छुभमिच्छन्ति तस्मात्सद्भिर्न वामतः क्रियते भयाच्चैनं तासां यानं तु निकटे यतः शुभं भवति वा न वा
यथा पशुस्तथा जंते यावन्न मद्यमांसाशी जनस्तावदलोलुपः भुक्तेन तस्मिन्नमनाः स्यात्तज्जपः कुचदेव
ताः मद्यमांसादिकन्याग्यात्स्य वाति निषेवनात् दृश्यते तल्प्रकृपोयः स सिद्धोन्यस्तु पातकी एवं परीक्षकर्त
व्या सिद्धानामपि संगतिः सत्संसंगी पिंडिमो यमन्यसंगेन गण्यते कालरूपेण कलिना गीता गाथा विधेषु
वः मद्यपेयप्रहृष्टोनप्यन्तस्य याह्यो विनश्यतः पात्रवीदात्वयं न पश्यन्स्वर्वनाशान्नु वामतः इति संचिंत्य भो
देवाः स्वधर्मः श्रेयसे भवेत् वास्तुशान्तिं विधायैवं सदसज्ज्ञानहेतवे सप्तभिर्नवभिर्वापि दिनैर्दीक्षादिना
तु स बीजारोपणकर्मेदं कर्तव्यं सर्वकामदं मण्डपोत्तरदिग्भागे सुसंस्कृतेतरं परे भवने मण्डलं कुर्याद्द
क्षात् प्राग्वरुणाग्रते यामोदीच्यायतं वामदीक्षायां संप्रशस्यते गोमयेनोपलिप्तायां भूमौ दक्षेण
वामके सतैलतंडुलैर्नैव सतैलविजयाद्रवैः तत्र लेखाः पंचकरदीर्घाः कार्य्यास्तु पंच च वितस्त्यंत
रिता रुद्ररेखाः कार्य्यास्तथायताः चत्वारिंशत्कोष्ठकाः स्युश्चतुर्विंशतिकोष्ठकैः वास्तुगोस्तत्र वीथ्यौ स्या

न्पूरयेद्रक्तचूर्णकैः पश्चात्कोष्ठचतुष्कं यद्ब्रह्मस्थानं तदीरितं आग्नेयकोष्ठमारभ्य ईशानान्तं प्रपूरयेत्
पीतरक्तमिश्रितकृष्णरजोभिः स्वष्टिमार्गतः कोष्ठद्वयं ततो वीथी रक्तेनैव प्रपूरयेत् विष्णुस्थानं तदग्रे तु त्रे
यं कोष्ठचतुष्टयं प्राग्वद्रजोभिरापूर्य तदग्रेऽपि च वीथिकाः प्राक्संस्थकोष्ठचतुष्कं यत्तु डिस्थानं तदी
रितं तत्पूर्यं पूर्ववद्रंगैरारक्तैः सर्वरेखिकाः विस्तारेण तु तिदैर्घ्येण हस्तयात्रास्तु पालिकाः कार्याडमरु
काकाराश्च तस्मा विष्णुदेवताः ह्वर्वाम्रपल्लवासत्यदलोपेताश्च वेष्टिताः सूत्रेण विष्णुस्थानस्य चतुः
कोष्ठे निवेशयेत् वैरंच्याः पंच मुख्यस्थाः कोष्ठजाः षोडशांगुलैः आयामोच्छ्रायदीर्घाश्च खेर्युक्ताः पश्चान्नि
वेशयेत् ब्रह्मस्थाने पल्लवादिसूत्रैः प्राग्वद्योजिताः शैवाः शरावाश्चत्वारो भाण्डं गलसमुच्छ्रया प्र
ज्ञाल्पसूत्रैः संवेष्ट्य प्राग्वदन्यादिषु न्यसेत् पालिषु जेषु गं पादि दर्भकूर्चयुतेषु च पूरयेत्ताणि पात्रा
णि वालुकामृत्करीषकैः प्राग्वत्स्वनेन नादेश्च पंचभिर्व्रीहिस्तणाशिखा ततः स्वस्मादिके पात्रे दशवीजा
नि पापयेत् यंवीजं प्रजपेन्मन्त्री ड्रापि नद्वालयेत्ततः तानि व्रीहियवश्यामाकतिलसर्षपशालयः मुद्गा
न्कीस्तु निष्पावाः खल्वामावाः प्रकीर्तिताः ब्रह्मपात्रे तु विकिरेत्प्रथमं वैष्णवे ततः ततः शैवे पंच
वाय्यवस्त्रेषोषपुरःसरं हरिद्रादैश्च संसिक्तवस्त्रैराच्छादयेत्ततः संध्ययोरुभयोरर्चेद्रात्रौ चापि बलिं
हरेत् ग्रहपंक्तिषु मार्गेण सम्यक्पात्रत्रयाग्रतः नवाह्नं तु बलिं दद्यात्तद्दिक्पदेवते प्राल्पोदनं
तिलालाजा सक्तवः प्रथमे दिने हरिद्राचूर्णसंयुक्तो भूतेभ्यो यं बलिर्मतः एवं द्वितीयदिवसे पितृ
भ्यस्तिलतण्डुलैः तृतीये सक्तवो राजायदेभ्योऽपि संयुताः नागेभ्यः सक्तवस्तुर्ये नारिकेलज
लान्विताः दद्यात्पश्चात्तनबलिं पंचमे ब्रह्मणे मुदा षष्ठे शिवाय चापूपयुक्तं भक्तं प्रयासने गुडो
दनं सप्तमे विष्णुदेवाय निवेदयेत् विष्णोर्दद्यादष्टमदिने ड्रम्योदनबलिर्मतः कृसरान्नं तु नवमे
विष्णोरेव प्रयासने वासवाये च तद्दिक्तुमण्डलस्य बलिं हरेत् ब्रह्मस्थाने तु वेतालेभ्यो मे च ब्रह्मस्य बलिः
खलु विष्णुस्थाने भैरवीस्थाने स्वजनस्य बलिर्मतः भैरवस्तु शिवस्थाने माहिषं बलिमिच्छते गौडीमा
ध्वी च पैष्टी च सुरा त्रिस्राश्च क्रमात्स्मृताः मत्स्यमांसमध्वयुक्तं भूतेभ्यो बलिरिष्यते पितृभ्यः मासवपलं
यक्षेभ्यः कुक्कुटो मधु भक्तं डरुबलिर्नागे वाममार्गे बलिस्त्वयं एवं गतेषु नवसु दिवसेषु विलो
कयेत् सम्यक्तस्योद्गमो जातः किं नष्टमध्यमं च किं सम्यगास्युद्गमे सिद्धिः कुण्ठिते विघ्नमाप्नुया
त् कीटभुक्ते न्यस्य फलस्फुटिते सर्वनाशनं सिद्धिः व्रीहियवाभिर्त्तैर्योषपामाकैः स्त्रीसुखं भवेत्
तिलैः पुत्रजनोल्लासः सर्षपैर्नाभिचारके शालिभिः सर्वमान्यत्वं मुद्गे देवकृपा भवेत् चणैः पा
दासत्या ढक्यानिष्पावादित्रमंदिरे खल्वैः सत्कर्मसिद्धिश्च माषैः शान्तिररेर्भवेत् सर्वैः स
मोद्गते वीमे सिद्धिः पातस्तनोऽन्यथा ॥

अथ दीक्षांगभूतमण्डपरचनार्थं प्राचीपरिज्ञानस्यावश्यकत्वात्तत्परिज्ञानप्रकारः प्रदर्श्यते ॥
तत्र दिग्वं सारस्वततंत्रे निर्मले दिवसे वृक्षप्रासादविवर्जिते स्थाने समतले सुवृत्तं कृत्वा हंसपदं सु
धीः तदवष्टंभतः कुर्याद् द्वादशांगुलमानतः वृत्तं तत्परितो भ्रांत्या तन्मध्ये स्थापयेद्बुधः सूच्यग्रं सर
लं शंकुं वर्तुलं द्वादशांगुलम् षडंगुलपरीणाहमूलं शिल्पिवरेण तु रचितं यत्नतस्तस्मिन् वृत्ते
पूर्वापराह्णयोः शंकुच्छायाग्रसंपातस्थानयोश्चिह्नयुग्मकं कृत्वा चिह्नद्वयं प्रापि सूत्रं प्राक्प्रत्यगा
यतं दत्वा तन्नायतार्धेन सूत्रेण न्यूनाधिकेन वा पूर्वपश्चिमयोर्वृत्तद्वयं श्लिष्टं परस्परं विधाय च तयोः
संधिद्वयप्रापि प्रसारयेत् मध्यचिह्नस्पृष्टमध्यं तत्सूत्रं दक्षिणोत्तरम् एतस्यार्धप्रमाणेन कृत्वा
कोणेषु लांछनं तेषु सूत्राष्टकन्यासाच्चतुरस्रं समं भवेत् ॥ ॥ ॥
अथैतद्रचनाप्रकारः अत्र मेघाद्यनावृतसूर्ये निर्मलनभोमंडले दिवसे वृक्षप्रासादाद्यनावृते
भूप्रदेशे समे स्थाने किंचिद्बिन्दुं कृत्वा तदवष्टंभतः प्रतिदिशं द्वादशांगुलमानेन वृत्तं निधाय
तत्र षडंगुलमानपरिणाहमूलमुत्तरोत्तरं परिणाहापचयेन सूचीमात्रकृताग्रपरिणाहमृज्वाकृ
तिं द्वादशांगुलोच्छ्रायोपेतं वृत्ताकारं शिल्पिवरेण निर्मितं शंकुं वृत्तमध्यस्थबिंदुमध्यशंकुमूलं
परिणाहमध्यं यथा भवति तथा संस्थाप्य तच्छंकुच्छायाग्रस्य पूर्वाह्णे तद्वृत्तरेखा पश्चिमभागेयं
त्रसंपातस्तत्र चिह्नं कृत्वापराह्णेऽपि शंकुच्छायाग्रस्य तद्वृत्तरेखे पूर्वभागे यत्र संपातो भवति तत्र च चि
ह्नं विधाय चिह्नद्वयप्रापि सूत्रं विधाय पूर्वपश्चिमं परिकल्प्य तच्चिह्नद्वयावष्टंभेन च चिह्नान्तरा
ह्नं विधाय चिह्नद्वयप्रापि सूत्रं... लम्बमानस्य स्वेष्टाधिकार्धमानेनान्योन्यसंश्लिष्टं पूर्वापरं वृत्तद्वयं विधाय वृत्तरेखा दक्षिणोत्तर
संधिद्वयप्रापि प्राक्पश्चिमसूत्रमध्यगत्या तिर्यग्रूपेण यत्सूत्रं तद्दक्षिणोत्तरं परिकल्प्य पूर्वपश्चिम
दक्षिणोत्तरसूत्रद्वयाग्रचतुष्कसंपाताद्धस्तमानेन तुल्यत्र्यकल्पितसूत्राग्रे लेखामंडपकुण्डादी
नां प्राक्प्रत्यग्दक्षिणोत्तरात्मकं दिक्चतुष्टयं परिकल्पयेदिति ॥ ॥ ॥ ॥
अथ सन्दिग्धस्य प्राचीसाधनविधिः प्रदर्शितः सूक्ष्मप्रकारस्तु तंत्रान्तरे सुसमे भूतले कृत्वेत्यारभ्यो
क्तप्रकारेण पूर्वं दिनकृत्यमुक्त्वा । दिनान्तरेऽपि देवेशि प्राग्वच्चिह्नद्वयं सुधीः कृत्वा हि तत्र यत्रस्था छाया
यः परमेश्वरि प्रवेशो निर्गमश्चैव तत्र पूर्वदिने यदा प्रविष्टनिर्गता छाया यदा तन्मध्यनाडिकाः
छायादिनाद्यविज्ञाय छायायुगमविकृयोः अंतरं दिनयोर्विश्लेष्य तत्तद्विभागशः विभज्य तत्र चिह्ना
निकृत्वा तन्नाभिः सर्वेश्वरि नाडीभिः कल्पिता भागाः गणनीयाः प्रयत्नतः षष्ट्या हृतं तत्तु लब्धांशैः
पूर्वे ध्रुवत्कृतं भवेत् प्राचीसूत्रं पूर्वभागे उत्तरे त्वस्तरायणे अयने दक्षिणे चैव दक्षिणस्यां दिशि ध्रु
वं कल्प्यते चेत्सुकरा सा स्यात् प्राचीतु परमेश्वरि इति प्राचीसाधनं विधाय व्यासद्विगुणरेखातो याम्यो
कृत्वांकयेदिमं व्यासार्धमानशंक्वर्धसार्थे लिम्बकर्षेण यच्च प्राच्यां प्राशंको लम्बया प्रोक्तत्वाच्चाकर्षेकर्षेण
शंक्वंकेर्वा कर्णोणिरेवमुदग्व्यत्यस्य चांसकौ इति शिल्पिप्रशाखा कुटीरमंडपसेतुमुद्दिष्टमानादधिक
ं ॥ ॥ ॥ ॥ ॥ ॥
विस्तारायामसमचतुरस्रं कल्पयेत्

दि

वेदिकायां लिखित्वाथ सर्वतोभद्रमंडलम् शृणु तस्य विधिं प्रोक्तं स्मार्ते यद्भद्रमुच्यते धृतिवर्गाः समाकार्य्याः कोष्ठकाश्चतुरस्रके खण्डेंदुस्त्रिपदं कोणे श्वेतवर्णेन पूरयेत् कोणस्थैः पंचभिः कोष्ठैः शृंखला कृष्णवर्णिका शृंखलोभयतो नीला वल्ली शंकरकोष्ठका शृंखलोभयतो भद्रमरुणं नवभिः पदैः वापीं जिनपदा श्वेता पीतान्तः परिधिर्भवेत् मध्ये षोडशभिः पद्मं रुचिरं वेष्टयेद्बहिः श्वेतारुणासितैरेवं सर्वतोभद्रमंडलम् अथान्यत्संप्रवक्ष्यामि कुर्यात्तांत्रिककर्मणि नृपवर्गसमाकार्याः कोष्ठकाश्चतुरस्रके मध्ये षड्वर्गकोष्ठानि मार्जयेत्तत्र संलिखेत् आद्यामद्वादशांशं च वहित्यक्त्वा यमध्यतः ततो वृत्तत्रयं मध्ये समं कुर्याद्यथाविधिः कर्णिकामध्यवृत्ते तु द्वितीये ततु केसरान् अंगवृत्तेन पत्राणि पत्राग्रं त्यक्तभागतः किंजल्काग्रेषु संस्थाप्याः पार्श्वतस्त्वर्द्धचंद्रकाः तदग्रे तु त्रिभिः कोष्ठैः पादान्कोणेषु विन्यसेत् शेषाणि पीतगात्राणि परतः पंक्तियुग्मकम् वीथिं कुर्यान्मार्जयित्वा चतुर्दिक्षु च मध्यतः चतुर्भिश्च कोष्ठैर्द्वारचतुष्टये कोष्ठत्रयेण वैकेन प्रत्येकं द्वारपार्श्वयोः शोभां विन्यसेत् कोष्ठैरेक क्रमाद्वाभ्यां त्रिभिरेव च उपशोभा ततः कोष्ठैः षड्भिः कोणानि कल्पयेत् शुक्लं तंडुलचूर्णं स्यादुत्सेधायामतस्तथा अंगुलेन समाकार्य्याः सीमारेखा दलानि च पीठगात्राणि च द्वारचतुष्कं तेन पूरयेत् प्रविष्टैः पूरणीयानि रक्तेनैव दलान्यपि कुसुंभचूर्णमारक्तं पूरणीयास्तु तेन तु द्वारशोभास्यी पादाः सर्वैर्विनिश्चयात् पीतं हरिद्राचूर्णं स्यात्पीठगर्भं च कर्णिका उपशोभाश्च विप्र एवः पीतगर्भं च कृष्णतः बिल्वपत्रस्य चूर्णेन हरितस्तेन पूरयेत् पत्रमस्य फलाकारमण्डिता हृयंगमाः वीथीचतुष्कमध्ये तु कल्पवल्लीः प्रपूरयेत् संधिश्च कल्पवल्लीश्च पीतरक्तेन केसरान् नानावर्णै रजोभिस्तां रंजयेत्कुशलो गुरुः कृष्णवर्णेन कोणानि बहिर्लेखा त्रयं ततः शुक्लारुणासितकृष्णैस्तु रजोभिर्भूषयेत्क्रमात् सर्वतंत्रेष्विदं प्रोक्तं सर्वतोभद्रमंडलं मार्गेषु दक्षिणे तत्र वक्ष्ये यद्देवयोनीनां सर्वतोभद्रमंडलम् मार्गे यद्दक्षिणे तत्र कोष्ठकारविवर्गका प्राग्वदेव तु तन्मध्ये षड्भिः शताः शुभम् एकपद्मा भवेत्पीठं द्वारं शोभां च पूर्ववत् कोणानि रंजितव्यं च पूर्ववत् पीठपादापरिधयः पद्माद्यं पूर्वन्मतम् वाममार्गे मंडलस्यान्कोष्ठे रष्टकवर्गेस्तैः चतुर्भिः पंकजं मध्ये तद्बाह्ये वीथिका शुभा कल्पवल्लीसमायुक्ता पद्म--र्यदेवदिक्चतुष्के तु पद्मानि चतुर्भिः कोष्ठकैश्चरेत् विदिशासु चतुर्भिस्तु चतुष्के वेदसंख्यकाः चतुष्कः परक्तनीरैः प्रपूरयेत् स्वस्तिकानाशतश्चान्यत्पूर्ववत्परिकल्पयेत् उदितं मंडलं ज्येतन्त्र वनागं सुशोभनम् एतदेवोक्तमार्गेण मध्यद्वारं विदिक्कृजम् एकोष्ठचतुः कार्यं चपद्मं प्रवक्ष्यते पद्मं प्राग्वाल नंदारस्वस्तिकचतुष्कका: वर्णौ पूर्वावीथिकातु पीठे नतमुरयोनिषु अथ मंडलं प्रतिष्ठार्थं वक्ष्ये वारुणमंडलं चतुरस्रं चतुःषष्टिकोष्ठेर्वेदांनि वेशयेत् अत्योजानि मयार्नस्तु दिक्षु कोष्ठं तु मार्जयेत्

२

मध्यस्थं चतुरद्वोणाद्वारास्थाणांतु पूर्ववतः पीतश्यामश्वेतहरिद्वर्णैरभिपरिपूरयेत् को।
णकोष्ठं विहायैकं पंचातःपादसंज्ञिताः पीतश्यापाण्डुरारक्तपीतकृष्णैः प्रपूरयेत् श्रा।
यीतःकोणकोष्ठान्यांरक्तहरितासितैः पूरयेदथतस्योर्द्ध्वं वितानं वंधयेद्यथा श्वेतव
र्णेन चत्वारि मध्ये वृत्तानि कारयेत् षट्त्रिंशदङ्गुलव्यासार्द्धं हस्तमात्रं तु पीठतः तत्पीठं का
र्णिकाकारं पीतरेखाहृतं ततः द्वितीयं द्विगुणव्यायामरूपकेशरसंयुतं पीतरक्तश्वेत
वर्णमूलमध्याग्रकेशरं द्विसप्तत्यंशिकां श्वेतां तस्याग्रे कुरु तेम्बिकां तृतीयं तु तृती
शतुल्यव्यासं तु वर्तुलं श्वेतमष्टदलं तत्र रक्ताग्रं तद्दलांतले: श्वेतं वहिः कृष्णवर्त्मोषा।
प्राग्वद्रेखां सितां कुरु तद्वहिर्वृत्तसंलग्नान् षोडशारान्प्रकल्पयेत् श्यामपीतारुण
श्वेतैस्तदंतस्तु यवाकृतीः सितपीतारुणश्यामहरिताः पंचरेखिकाः कार्याः सु।
चिराः पीठस्यान्तरे वं प्रपूजयेत्

औषधिगण:

स्वर्णादिरचितं तत्र कलशं छिद्रवर्जितं त्रिगुणात्मकसूत्रेण वेष्टितं सर्वतो बहि: चंदना
गुरुकर्पूरैर्मध्ये सम्यक् प्रधूपितं पूर्वं जपविधानेन स्थापयेद्देशिकोत्तम: नवरत्नानि
नि:क्षिप्य कुंभे कूर्चमथोपरि दूर्वाचंदनसंयुक्तं विन्यसेद्दक्षिणान्वित: पुष्पनीरं
च वैडूर्यं विद्रुमं मौक्तिकं तथा ततो मरकतं वज्रं गोमेदं पद्मरागकं प्रोक्तानि न
वरत्नानि देशिकेन्द्रैर्विचक्षणै: आद्यन्तक्रमतो मंत्रमातृकामनसा जपन् मूलमं
त्रजपं कृत्वा ते चिन्तयेत्तैक्यमात्मन: घटस्य पीठभेदं च चिन्तयेत्साधकोत्तम: पंचा
शदोषधीक्काथै: पूरयेत्तदनन्तरम् पकेन सहितास्तास्तु वर्ण्यन्ते यथाक्रमा: चं
दनं चापि रक्ताख्यं चंदनं चागुरुस्तथा कर्पूरोशीरकुष्ठानि वालकं चापि केसरं कं
कोलकं जातिफलं जटामांसी मुरा तथा ग्रंथिकं रोचना जाति बिल्वपत्रं पिप्पलं बिल्वको
पृश्निपर्णी चित्रकं च लवंगकं तृणं तथा कटुफलं चापि गुंजा स्याद्भद्रदेवदारु काश्मीरी
पद्मकोशं शंखपुष्पी मयूरस्य शिखा तथा प्रक्षोभिमं यस्तु तथा सप्तपर्णी कुशा पुन:
पाषाणभेदक: कुलशंखपुष्पी च रोहिणी स्योनाको बृहती चैव पाटली मुखकर्णिका
तुलसी शिवरीडं द्रुवल्ली भृंगी मिथाम्नय: ततोऽपराजिता तालमूली चापि कृतांजली।
दूर्वाश्री देवकन्याख्या भागतो भद्रमुस्तकं लवंगरहिता एता: पंचाशत्संख्यका इति
दुग्धवृक्षत्वचा क्काथि ब्रह्मरुद्रकगुडूचै: गंधपंकप्रस्तनाद्यैर्वासितैर्वा शुभैर्जलै: का
याद्दिने येन पूर्णं शंखं तस्मिन् विलोडयेत् गंधाष्टकं तस्य देवस्याथ प्रकीर्तितं चंदना तस्य
गुरुकर्पूररोचनाकुंकुममदे रक्तचंदनजावारि गानपत्यमुदाहृतं ह्रीवेरं चंदनाकुष्ठ:
मगुरु: कुंकुमं मुरं सेव्यकं च जटामांसी वैष्णवं तदुदीरितं चंदनागुरुकर्पूरनाभिकुंकु
मरोचना जटामांसी कपियुता शाक्तं गंधाष्टकं विदु: जलकाश्मीरकुष्ठैस्तु वकुलैर् रक्त
चंदनै: तमालागुरुकर्पूरै: सौरगंधाष्टकं विदु: गोलोचनाच कस्तूरी च कर्पूरागुरु कुं
कुमै: चंदनेन समदाम्यां च वरदेन च पत्रजे गंधाष्टकस्य संयोगात्सामर्थ्याद्देशिकस्य
च सपक्षिकं जलं कुंभेऽमर्येद्दैवविदुर्बुधा:

मनशिला १ दूध २ बिल्वफल ३ एलाचीनिकि ४ दहि ५ रक्तचंदन ६ देवदारु ७
घृत ८ वरियाँ ९ राद्यमसी १० केसर ११ गौमूत्र १२ मपौष्प १३ हुरहुरदुडुंज १४

उसीर १५ खस १६ गोबर १७ हिंगुलक १८ सिंगरफ १९ मुलठी २० गजमद २१ केगुणी २२ गंडीरेदेपुष्प २३ शंख २४ सिपी २५ कुमुंदपुष्प २६ स्फटिक २७ इलायची २८ मनशिला २९ गोबर ३० मालतीपुष्प ३१ बीजपूरानिंबु ३२ जव ३३ श्वेतसरेयाँ ३४ मूलमोकड़ी ३५ रोचना ३६ मदयंतिपत्र ३७ सहत ३८ मुलठी ३९ मोतिनारंगीफल ४१ सुवर्ण ४२ कालेतिल ४३ लोद्र ४४ सुरमा ४५ तिलपत्रकतज ४६ लोध्र ४७ मुस्तामुस्थरः (मूल) ४८ वाला ४९ वरियाँरा ५० हस्तिमद ५१ सोफ ५२ कस्तूरी मुस्तामुस्थर ५४ दूध ५५ मुत्र (लोव) ५६ साजसूत्र ५७

अथमंत्रप्रतिष्ठार्थं वक्ष्ये चारुणमण्डलं चतुस्रं चतुषष्टिकोष्टं वेद्यां निवेशयेत् अन्यो ज्ञान्निमयातास्तु दिक्षुकोष्टतिमार्जयेत् मध्यस्थं चतुरस्त्रोणि द्वाराण्याणि तु पूर्वतः पीतश्यामश्वेतहरिद्रजोभिपरिपूरयेत् कोणकोष्ट विहायैकं पंचांतःपादसंज्ञिताः पीठस्या पांडुरक्तपीतकृष्णैः प्रपूरयेत् आग्नेयीतःकोणकोष्टान्याहरितासितैः पूरयेद् यतस्या द्विवितानं बंधयेद्यथा श्वेतवर्णेन चत्वारि मध्ये वृत्तानि कारयेत् षड्विंशद्दशव्यासार्द्धं वृत्तमाद्यं तु पीठतः तत्पीतं कार्णिकाकारं शितरेखावृतेततः द्वितीयं द्विगुणव्यासरूपकेसरसंयुतं पीतरक्तश्वेतवर्णं स्तलमध्याग्रकेसरं द्विसमत्यपिकाश्वेतां तस्याग्रे कुरु नेमिकां तृतीयं तु तृतीयांशतुल्यव्यासं तु वर्तुले श्वेतमष्टदलं तत्र ।
कार्यं तद्दलांतरे श्वेतं बहिः कृष्णवर्णा प्राग्वद्द्वारं वा सितां कुरु तद्बहिर्वृत्तसंलग्नान् षोडशाब्जान् प्रकल्पयेत् श्यामपीतारुणश्वेतैस्तद्दंतलयवाकृताः सितपीतारुणश्यामहरिताः पंचरेखिकाः कार्य्यास्तु रुचिराः पीठस्यान्तरे वेदप्रपूजयेत् वज्रंशक्तिं दण्डखड्गपाशांकुशगदा लिखेत् पूर्वतस्तु तथैशान्यां शूलचक्राम्बुजिते वेदिकायामासनेस प्राङ्मुखः सविप्रादय बद्धपद्मासनेमौनी ऋजुकायो जितेन्द्रियः ।

रा रक्त
से
ना

देशिकेंद्रव्यसंस्थाप्यपूजोपकरणानितु दक्षिणेवामभागेतुस्थापयेत्कलशंशुभम
सुगंधिजलसंपूर्णंहस्तप्रक्षालनायच पश्चात्पात्रेनिधायाथदीपंप्रज्वालयेच्छुभं
व्यजनंमकुरंछत्रंचामरादिकमंत्रवित संस्कुर्यात्तानिसर्वाणिवक्ष्यमाणविधा।
ततः करशुद्धिंविधायाथकुर्यात्तालत्रयंततः शरमंत्रेणदिग्बंधंकुर्यान्मंत्रीसमा
हितः महस्ततत उत्पन्नंरक्षयेत्तद्धिसर्वतः भूतशुद्धिंततःकृत्वाप्राणस्थापनमाचरेत
न्यासादिकंततःकुर्याद्देशिकोयतमानसः ऋषिंन्यसेत्ततोमूर्ध्नि छंदोवक्त्रेगतंन्य
सेत देवतांहृदयेन्यस्यमूलमंत्रस्यदेशिकः षडंगंविन्यसेन्मंत्रीपंचांगंवायथावि
धिः यस्यमंत्रस्यपंचांगंनेत्रंतस्यविधीयते अंगैर्विहीनस्यमनोरंगंतेनैवकल्पये
त ततोमंत्रोक्तमार्गेणन्यासानन्यान्समाचरेत शरीरेस्वस्यमंत्रज्ञोयोगपीठंप्र
कल्पयेत देहात्मकेततःपीठेध्यायन्मंत्रस्यदेवतां दर्शयित्वाततोमुद्राःस्थापयेद
र्घमुत्तमं जलेनपूरितंदक्षेप्रोक्षणींस्थापयेत्ततः तत्रान्यमल्पशंखंवाम्बुनत्रद्रव्यंततो
न्यसेत पाद्यमाचमनीयंचमधुपर्कंच [illegible] मंत्रवित ततोमूलाम्बुनामंत्रीप्रो।
क्षद्भिःसमाहितः स्वात्मानंमंडलंचान्यत्पूजोपकरणादिकं प्रोक्षयेद्गंधपुष्पाद्यै
र्देशस्थेदेशिकोत्तमः योगपीठंसमभ्यर्च्यन्यासमार्गेणमंत्रवित पीठान्तेचततस्त
त्रपूजयेदिष्टदेवतां देवतात्माततःपंचकुर्याद्ब्रह्ममनोजलीः शीर्षेहृदिनयाधारेच
रणेसर्वगात्रके पूजयेच्चनिवेद्येनरहितैश्चंदनादिभिः सर्वोपचारैस्तचेष्टंगुर्वादि
ष्टेनवर्त्मना समापयेदिदंसर्वंप्रोक्षणपद्भिःसमाचरेत पाणीयेप्रोक्तसंस्थित्य।
कामंपूर्वंपूर्ववत उपचारैर्निनादैःश्चमंडलंपूजयेद्गुरुः पूरयेत्कलशिकांपूर्वंशा
तिभिःतंदुलैस्ततः दर्भान्न्यसेद्दुपर्येषामादातंकूर्चकंततः छिन्नमूलाकुशादी
र्घाःसप्तविंशतिशंख्यकाः ब्रह्मग्रंथियुतान्यस्यदेशेकूर्चउहोच्यते यजेदाधारशा।
क्त्यादिपीठमंत्रावसानकं

अयं कुंडनिर्माणविधिस्तु विलम्बेनोपरोधायेह लिखिता
अञ्जनकर्मोते स्वस्थानेऽवगंतव्य इति संकेतः

अथाग्निकुंडनिर्माणविधिः लिख्यते अत्र कनिष्ठमंडपेषु दशहस्तमंडपेपि मध्ये शायिकत्रि
कशयतावेदिकुंडवेद्योरंतरालमुभयतः पदद्वयमात्रं तद्विहितमयतंकं ठमेखलासहितं कुंडद्वय
व्याप्तभूमिश्चतुर्हस्तमिता वहिः पार्श्वद्वयेपि कुंभस्थापनार्थं हस्तद्वयमिति समस्तमंडपभूमिव्याप्ता
अतः परमाचार्यऋत्विकसदस्याद्युपवेशनस्थापनमपि न लभ्यत इति नायं पक्षः समीचीनः तस्मा
दयं पक्षस्त्वेकैककुंडैकमेखलादिसंक्षेपविकीर्षायामेतावतावारितार्थ्यतत्तद्विषय इति ज्ञेयः । इ
त्यं मंडपं विधाय तस्मिन्मंडपे पूर्वाद्यष्टदिक्षु चतुरस्रयोन्यर्धचंद्रत्रिकोणवृत्तषट्कोणपद्माष्टा
स्राख्यान्यष्टौ कुंडानि कुर्यात् तत्रादौ चतुरस्रकुंडनिर्माणप्रकारमाह शारदायां प्राक्प्रोक्ते मंड
पे विद्वान्वेदिकाया वहिस्त्रिधा क्षेत्रं विभज्य मध्यें‍शे पूर्वादि परिकल्पयेत् अष्टास्वाशासु कुंडानि
रम्याकाराण्यनुक्रमात् चतुरस्रं योनिमर्द्धचंद्रं त्र्यस्रं च वर्तुलं षडस्रं पंकजाकारमष्टास्रं तानि
नामतः आचार्यमध्ये स्याद्गौरीपतिमहेंद्रयोः हस्तमानमितां भूमिं पूर्ववत्परिसूत्रयेत् स
मंतात्कुंडं स्याच्चतुरस्रं शुभावहं चतुर्विंशत्यंगुलाढ्यं हस्तं तत्र विदो विदुः चतुरस्रकृतं क्षेत्रं ।
पंचधा विभजेत्सुधीः न्यसेत्पुरस्तादेकांशं कोणार्धार्धप्रमाणतः भ्रामयेत्कोणमानेन तदान्यपि
मंत्रवित् सूत्रयुग्मं ततो दद्यात्कुंडं योनिनिभं भवेत् चतुरस्रीकृतं क्षेत्रं दशधा विभजेत्पुनः एक
मेकं त्यजेदंशमथ ऊर्ध्वं च तत्रवित् व्यासार्धं पातयेदग्रे तन्मात्राद्भ्रामयेत्ततः अर्धचंद्रनिभं कुंडं रम ।
णीयमिदं भवेत् चतुर्थांशं तु क्षेत्रे न्यसेदुभयतः पार्श्वयोः एकैकमंशं तन्मानादक्षि
णोत्तरं लांछयेत्ततः सूत्रत्रयमथः कुर्यात्त्र्यस्रकुंडमुदाहृतम् अष्टादशांशे क्षेत्रेंशे न्यसेदेकं व
हिर्बुधः भ्रामयेत्तेन मानेन वृत्तं कुंडमनुत्तमं षड्धा विभजेद्वेवं मध्यसूत्रस्य पार्श्वयोः भा ।
गं न्यसेदेकमेकं मानेनानेन मध्यतः कुर्यात्पार्श्वयुगे मत्स्यचतुष्कं तत्रवित्तमः सूत्रषट्कं ततो
दद्यात्षडस्रं कुंडमुत्तमं चतुरस्रीकृतं क्षेत्रं विभज्याष्टादशांशतः एकं भागं वहिर्न्यस्य भ्रामये
नवर्तुलं वृत्तादिकर्णिकादीनां वहिस्त्रीणि प्रकल्पयेत् पद्मकुंडमिदं प्रोक्तं विलोचनमनोहरं
रं पूर्वोक्तं विभजेत्क्षेत्रं चतुर्विंशतिभागतः भागमेकं वहिर्न्यस्य चतुरस्रं प्रकल्पयेत् अंसयोश्च
श्चतुरस्रस्य कोणार्धार्धप्रमाणतः वाह्यस्य चतुरस्रस्य कोणमध्ये परिकल्पयेत् लांछयेत्
दिक्षु प्रतिदिशं यथान्यायमष्टौ सूत्राणि पातयेत् अष्टास्रं कुंडमेतद्धि तंत्रविद्भिरुदीरितम् ।
प्रीतं तत्रराजे प्राक्प्रत्यक्सूत्रमास्फाल्य तन्मध्ये चिह्नकल्पनां कृत्वा तत्पूर्वतः पश्चाच्चा
दशांगुलमानतः ततस्तद्दक्षिणपार्श्वयोर्मध्यचिह्नस्य मानतः कुर्याद्द्वे सपदं कोणान्यभि
ततो सुपातयेत् परं प्रसार्य तत्रापि विदध्याच्चिह्नयुग्मकं प्राक्प्रत्यक्चिह्नमानेन तयो
रेवावलंबनः दक्षिणोत्तरतो हस्तपदं कृत्वा तयोस्ततः प्रसार्य सूत्रं तस्यापि मार्जयितो
क्रमानतः चतुष्टये तु सूत्राणां चतुरस्रं भवेत्समिति अथैतत्कुंडरचनाप्रकारः तत्र वेद्याः पू
र्वभागे मुष्ट्यंगुलमानेन हस्तमात्रां भुवं परित्यज्य प्राक्कल्पितदिक्क्रमेण प्राक्प्रत्यग

यं तत्सूत्रमास्फाल्य तन्मध्ये चिह्नं कृत्वा तच्चिह्नात्पूर्वतः पश्चिमतश्च षडंगुले द्वादशमानेन चिह्नं।
कृत्वा ततदधिकाग्रं मार्जयित्वा तच्चिह्नद्वयावष्टंभेन ततस्सूत्रार्द्धात्किंचिदधिकमानभ्रमेण पू
र्वापरतः किंचिदन्योन्यसंश्लिष्टं वृत्तद्वयं विधाय तयोर्दक्षिणोत्तरसंदंशरूपहंसपदद्वयप्रा
पिप्राक्प्रत्यक्ब्रह्मसूत्रमध्यागतहंसपदमेवं दक्षिणोत्तरसूत्रमास्फाल्य तत्रापि तत्रापि।
मध्यचिह्नाद्द्वादशांगुलमानेन दक्षिणोत्तरचिह्नद्वयं विधाय ततस्तदधिकाग्रं मार्जयित्वा तत
त्सूत्राच्चतुष्टयावलंबेन द्वादशांगुलमानेन चतुष्वपि कोणेषु हंसपदं विधाय ततस्तद्ग्रान्त
हंसपदप्रापि प्राक्प्रत्यक्सूत्रद्वयं दक्षिणोत्तरसूत्रद्वयं च संभ्रष्टय सूत्रचतुष्टयमास्फाल्य चतुर।
स्रं कुर्यात् ततस्तत्प्राक्प्रत्यगायत ब्रह्मसूत्रमाननिम्नसमचतुरस्रं तत्र खातं कृत्वा तत्परितः कुंड
मानस्य चतुर्विंश[illegible]मितां भुवं परित्यज्य तद्बहिर्वा दशांगुलविस्तारां चतुरंगुलोत्सेधां मेख
लां कृत्वा तदुपरि बाह्ये परितश्चतुरंगुलमानं त्यक्त्वाष्टांगुलविस्तारां चतुरंगुलोन्नतां द्वितीयां
मेखलां कृत्वा तदुपरि बाह्ये चतुरंगुलं त्यक्त्वा विस्तारोच्छ्राभ्यां चतुरंगुलमितां तृतीयां मेखलां कु
र्यात् एवं कृते प्रथमा मेखला द्वादशांगुलोन्नता चतुरंगुलविस्तृता तृतीया चतुरंगुलोन्नता।
चतुरंगुलविस्तृता च भवतीति अत्र केचित्प्रथमा मेखला चतुरंगुलविस्तृता नवांगुलोन्नता
द्वितीया त्र्यंगुलविस्तृता पंचांगुलोन्नता तृतीया तु द्व्यंगुलविस्तृता द्व्यंगुलोच्चेति मेखलामा
नमाहुः एतन्मेखलया सह हस्तमात्रावितत प्रदेशेयं तत्र पंचदशांगुलैर्निम्नेरतस्यैव विष्वक
र्मणोक्तत्वात् तदूर्ध्वं नवं छायस्यैवावश्यकत्वात् हस्तमात्रत्वान्मतेतु सर्वेषां मेखलामा।
मानेतु वितस्त्यष्टतदर्धकैः विस्तारोत्सेधयोः कुर्यादिति मंत्रराजवचनात् सत्वपूर्वकगु
णान्विता क्रमात् द्वादशाष्टचतुरंगुलोच्छ्रिताः सर्वतोंगुलचतुष्कविस्तृता मेखलाः सकल
सिद्धिदा मता इति प्रपंचसारवचनात् पूर्वोक्त एव पक्षः समीचीन इति ततः सर्वस्य बाह्यस्य
मेखलाया बहिश्चतुरंगुलायामविस्तारोत्सेधं चतुरस्रं पीठमिदा कृत्वा तदुपरि निहितमूलद्वा
दशांगुलदीर्घान्तरोत्तरहीनपरिणाहमध्यमेखलासंलग्नरंध्रनालयुतां मूले कुंभद्वययुक्तां
मध्ये सगर्भामुपरि तन्मेखलोपरिणितामष्टांगुलमानमूलां तत्प्रदेशादुभयपार्श्वतः
क्रमेण संकुचितामेकांगुलाविस्ताराग्रां द्वादशांगुलमानायामामेकांगुलोत्सेधमेखलायु
क्तामश्वत्थपत्राकारां स्थूलात्किंचित् नमाच्छिन्नामीषत्कुंडप्रविष्टाग्रां योनिं कुर्यात् अथ
कुंडमध्यस्य हंसपदावलंबेन प्रतिदिशं चतुरंगुलमानेन वृत्तं निष्पाद्य तद्बहिः पुनः षडं
गुलमानेन च वृत्तं कृत्वा वृत्ते कर्णिकां च परिकल्प्य वृत्तद्वयान्तरालवीथ्यामष्टदलानि
कृत्वा षडंगुलोच्चनाभिं कुर्यादिति चतुरस्रकुंडनिर्माणविधिः। अथ योनिकुंडमाह तंत्रराजे

गुलो^

तन्मध्यपंचमांशेन विकाश्य ब्रह्मसूत्रकम् पूर्वतः पश्चिमतद्वत्कोष्ठयोर्मध्यदेशतः त
त्कोणमानेन तथा भ्रामयेत्पश्चिमाग्रकात् उत्तराग्रावधि तथा दक्षिणाग्रावधिश्रिये
तन्मध्यतिर्यक्सूत्राग्रद्वयावष्टंभनस्तथा विकासितब्रह्मसूत्रावधिसूत्रद्वयं भवेत् यो
निकुंडमिदं भद्रं स्याच्चतुर्थं भयात्मसा तस्मिन्नेवानि कुंडानि वदामि सममानतः चतु।
रस्राभितायातन्यकाम भूसान्यतः स्थिता लभते सर्वकुंडेषु तेन सर्वाणि सर्वतः तत्समान्ये
वजायंते षस्य वत्यंगुलात्मनेति अथैकुंडरचनाप्रकारः तत्र वचतुरस्रं निर्माय चतुःकोष्ठ
युतस्य ब्रह्मसूत्रं तन्मानं पंचमांशेन पूर्वस्यां दिशि वर्धयित्वा तत्कोष्ठचतुष्टयात्मकचतुर
स्यापश्चिमभागस्य दक्षिणोत्तरकोष्ठस्य नैरृत्यादीशानांतमाग्नेयादिवायव्यांतं च को।
णसूत्रद्वयास्फालनेन लक्षणसूत्रद्वयसंपातनविदितमध्यदेशावष्टंभनस्तत्कोणाव
धिमानेनोत्तरकोष्ठे प्राक्प्रत्यक्ब्रह्मसूत्रपश्चिमाग्रादिदक्षिणोत्तरतिर्यक्सूत्रोत्तराग्रा
वधि दक्षिणकोष्ठे तत्सूत्रपश्चिमाग्रादिततिर्यक्सूत्रदक्षिणाग्रावधिभ्रमादर्धचंद्रद्वयमु
त्पाद्य तत्तन्मध्यतिर्यक्सूत्राग्रयमारभ्य प्राक्प्रसारितब्रह्मसूत्राग्रावधिसूत्रद्वयास्फाल
नेन योन्यकारक्षेत्रं परिकल्प्य तद्बहिश्चैकं कंठमेखलयोस्तथोक्तमानेनोक्तयुक्त्या योनिमंडलद्व
यं निष्पाद्य प्राग्वत्खातं कृत्वा योग्याकारमेवकंठमेखलाकल्पयेदिति कुंडानां यादृ
शं रूपं मेखलानां च तादृशं कुर्यात्सर्वेषु कुंडेष्विति कुलप्रकाशवचनात् अथार्धचं
द्राकारकुंडान्याह तंत्रराजे तन्मध्यदशमांशं तु परित्यज्याधऊर्ध्वतः अर्धचंद्राकृतिर्ये
न भवेत्कुंडं तदीरितमिति अथैतत्कुंडरचनाप्रकारः तत्र प्राग्वच्चतुरस्रं निर्माय तति।
द्विष्कंभमानं दशधा विभज्य तेष्वेकैकांशं प्राक्पश्चिमयोः परित्यज्य तत्पश्चिमयोर्दक्षि
णोत्तरायतं तिर्यक्सूत्रं चतुरस्राद्बहिरपंचयमानेन दक्षिणोत्तरयोर्वर्धयित्वा तदग्रद्वयाव
धितत्कल्पितपश्चिमब्रह्मसूत्रसंधिमध्यावलंबेन प्राग्रेखामध्यगतब्रह्मसूत्रसंधिमा
रभ्याष्टांशमानसूत्रभ्रामादर्धचंद्राकारं कुंडं भवेदिति अर्धचंद्राकारं मंडलं निर्माय
तद्बहिरप्युक्तयुक्त्या एकांगुलमानेन द्वादशांगुलमानेन वाऽर्धनिभं मंडलद्वयं कृत्वा
प्रथमकृतमंडलमध्ये हस्तमात्रं निम्नं खातं कृत्वा बहिः कंठस्थानं परित्यज्य प्राग्वन्मे
खलादिकं कुर्यादिति अथ त्रिकोणकुंडमाह तंत्रेव तत्रैव षडष्टमांशं तु पार्श्वयोस्तु वि
काशयेत् प्रत्येकं पश्चिमं सूत्रं तन्मानेनाथ सूत्रयोः विन्यसेद्ब्रह्मसूत्रं तद्द्वयाग्राव
यिलंबनात् कुंडं त्रिकोणमुदितमिति अथैतत्कुंडरचनाप्रकारः तत्र प्राग्वच्चतु

4

स्रं कृत्वा तद्ब्रह्मसूत्रस्य प्रागग्रं बहिर्गत्वा प्रसार्य तच्चतुरस्रं विष्कंभमानं षोढा विभ
ज्य तेष्वेकैकांशेन पश्चिमतिर्यक्सूत्राग्रद्वये पार्श्वद्वयेपि बहिः प्रसार्य तदग्रद्वयां
तसूत्रद्वयस्य प्रसारितब्रह्मसूत्रस्य च यत्र संपातस्तद्वध्यास्फाल्य त्रिकोणं कुंडं परि
कल्प्य तद्बहिरेकांशमानेन तद्बहिर्द्वादशांशमानेनोक्तयुक्त्या त्रिकोणद्वयं निष्पाद्य खा
तं कंठमेखलादि प्राग्वत्कल्पयेदिति अथ वृत्तकुंडमाह तत्रैव तन्मध्यादष्टादशांशो
न प्राक्सूत्राग्रं विकाशयेत् तिर्यक्सूत्रं बहिस्तेन मानेन भ्रामयेत्तया मध्यचिह्नाव
लंबेन तद्वद्वृत्तमंडलं इति अथैतत्कुंडरचनाप्रकारः तत्र प्राग्वच्चतुरस्रं क्षेत्रं साधि
त्वा तन्मध्ये विष्कंभमानमष्टादशधा विभज्य तेष्वेकांशमानं तच्चतुरस्राद्बहिर्ब्रह्मसूत्रं
स्य प्रागग्रं विस्तार्य मध्यचिह्नमवलंब्य विस्तारेण ब्रह्मसूत्राग्रमानेन परितो भ्रमेण वृ
त्तं निष्पाद्य बहिः पुनश्चतुरस्रस्य चतुर्विंशमानेन कंठार्थं वृत्तं कृत्वा तद्बहिः द्वादशां
गुलमानेन वृत्तांतरं निष्पाद्य प्रथमकृतवृत्तमध्ये हस्तमात्रनिम्नं खातं कंठं कृत्वा वृत्ता
बहिर्द्वादशांगुलांतराले वीथ्यां प्राग्वन्मेखलात्रयं योन्यादिकं रचयेदिति अत्रं योनि
र्नास्तीति कश्चित् तत्र योनिर्योनिकुंडे योनिः पद्मकुंडे नाभिश्च नास्तीति तंत्रसिद्धांतः
अथ षडस्रकुंडमाह तत्रैव तन्मध्यषोडशांशेन विकाश्य ब्रह्मसूत्रकं तेन मानेन च।
तया कृत्वा वृत्तमतिस्फुटं तद्वृत्ते वृत्तमध्यस्य कुर्याद्दर्पणलांछनं तत्र षट्सूत्रपाततन्म
वेत्कुंडषडस्रकमिति अथैतत्कुंडरचनाप्रकारः तत्र प्राग्वच्चतुरस्रं विधाय तन्म
ध्यमानं षोडशधा विभज्य तेष्वेकांशमानेन ब्रह्मसूत्रस्य प्रागग्रं विकाश्य तन्माने
न चतुरस्रमध्यस्थहस्तपदमध्यावेन भ्रमात् वृत्तं निष्पाद्य तन्मध्यविष्कंभमानेनार्धे
न तन्मध्यतिर्यक्सूत्रदक्षिणाग्रादि परितो वृत्ते चिह्नषट्कं विधाय तत्र चिह्नाच्चि
ह्नं यावत् सूत्रषट्कमास्फाल्य तत्र छायारूप वृत्तखंडमार्जनेन षट्कोणं कुंड
क्षेत्रं निष्पाद्य तद्बहिरेकांशतो द्वादशांशान्तश्चोक्तयुक्त्या षट्कोणद्वयं निष्पाद्य
खातादीनि प्राग्वत्कल्पयेदिति अथ पद्मकुंडलक्षणसंग्रहे चतुरस्रीकृतं क्षेत्रं वि
भजेदष्टधा विवेकी अष्टमांशप्रमाणेन कर्कटेन तु मध्यतः वर्तुलं भ्रामयेत्सैयं
कर्णिका केसराः पुनः अष्टमांशद्वयेनैव मध्यतो वर्तुलं भवेत् तृतीयमष्टमां
शेन पत्राणां मध्यसंमता चतुर्थं तु भवेत्क्षेत्रं व्याससंतुल्येन वभ्रमात् चतुर्विंश
तिधा मतं कार्यं ब्रह्मसूत्रवशानने तस्यैकं भागमादाय भक्त्या षोडशधा पुनः पंच

भक्ता १

वृत्तकुंडे

भिः षोडशभागैर्न्यूनं पंचकमष्टकं भागमादाय तं वाह्ये पंचमं मंडलं शिवे मध्यतो भ्रा
मयेत् सर्वैः पत्राणामग्रभूर्मता शास्त्रोक्तविधिना देवि ततः पद्मं समालिखेत् वाह्य
वृत्तांतरालं यत्तन्मानं केसराग्रतः तन्मानं कर्कटं कृत्वा केसराग्रे विधाय च गुरूप
दिष्टमार्गेण षोडशार्धनिशाकरान् लिखित्वा कृतिहस्तेन पत्राग्राणि समालिखेत्।
कर्णिकाव्याससमानेन परित्यज्य तदुद्यतां निखनेद् वशिष्टं तु केसराणां च मंडलं ख
नेदं तत्तयाकारं कुर्वंत्यत्र मुवं खनेत् पत्राकारा यथा सम्यग्जायंते परमेश्वरि पद्मकुं
डमिति प्रोक्तमिति अथैतत्कुंडरचनाप्रकारः तत्र प्राग्वच्चतुरस्रीकृतं क्षेत्रं अष्टधा विभज्य
तन्मध्यचिह्नावलंबेनेन परितस्त्रैकांशमानेन कर्णिकार्थं वृत्तं निष्पाद्य तद्बहिरप्यंशद्व
यमानेन केसरार्थं वृत्तं कृत्वा तद्बहिरप्यंशत्रयमानेन तद्दलार्थं वृत्तं विरच्य तद्बहिरप्यंश
चतुष्टयमानेन वृत्तं भ्रामयित्वा तद्बहिरपि सार्धषट्यवमानेन चतुरस्रवेदे त्राद्बहिर्वृत्त
मेकं भ्रामयेद् द्विपंचकं कृत्वा द्वितीयवृत्त पंचमवृत्तयोरंतरालमानकर्कटेन केसरवृत्ताग्रा
त्सर्ववाह्यवृत्तस्पृष्टशृंगद्वयाग्रकान् षोडशार्धचंद्रान्निष्पाद्य तदग्रान्यष्टदलानि कृत्वा त
न्मध्यकर्णिकावृत्तं विहाय केसराणि कर्णिकापरितः प्रकाशयन् केसरवृत्तं तन्मध्यवृत्तं
च सम्यक्खनित्वा चतुर्थपंचमवृत्तयोर्दलानि मात्राणि यथा भवंति चतुरस्रकुंडस्य विस्ता
रायामखातसमानक्षेत्रफलवत् क्षेत्रफलं च यथा भवंति तथा गुरूक्तमुक्तयाखननं विधा
य वहिः पद्माकारेणैव कंठमेखलादिकं कुर्यादिति अष्टकुंडमाह तत्र राजे तन्मध्यस्य
चतुर्विंशमानेन वाह्येऽपि पूर्ववत् विधाय चतुरस्रं तु पूर्वकोणार्धमानतः कोणादभितः
एकास्यकृत्वा चिह्नानि चाष्टवै तेषु चिह्नेषु कृत्वा षट्सूत्राणि परितः शिवे कुर्यादष्टांकं कुंड
मिति अथैतत्कुंडरचनाप्रकारः तत्र प्राग्वच्चतुरस्रं विधाय तन्मध्यसूत्रमाने चतुरस्रे
विंशतिधा विभज्य तेष्वेकांशमानं तद्बहिः प्रतिदिशं प्रसारितसूत्राग्रे पूर्ववच्चतुरस्रं प्रोक्त
क्रमेण विधाय तत्र पूर्वचतुरस्रस्यार्धमानेन वाह्यचतुरस्रकोणचतुष्टयव्यासयासाव
र्ष्टभ्य तत्प्रतिरेखं विचिह्नद्वयक्रमात्तंभयाष्टचिह्नानि कृत्वा चिह्नाच्चिह्नं प्राग्वत्सूत्रा
ष्टकमास्फाल्य तद्बहिर्गतकोणमार्जनाद् अष्टास्रकुंडं भवति इत्यष्टास्रकुंडक्षेत्र।
ं परिकल्प्यखातं विद्ध मेखलादिकं यथावत्कुर्यादिति दीक्षायामाष्टौ कुंडानि।
कोर्यामिति अथ प्रसंगात्काम्यहोमार्थं पंचास्यसमभास्रकुंडयोरपि लक्षणमुच्यते

वृत ५

तत्रादौ पंचास्रकुंडमाह तत्रैव तन्मध्यसप्तमांशेन ब्रह्मसूत्रे दिक्काश्य तन्मानेन भ्रा
न्त्यकृत्वा यथावतत् तत्रांशमानेन वृत्तं कृत्वा चिह्नानि तत्रैव पातयेत्पंचसूत्राणि
तस्मात्पंचास्रकुंडमिति अथैतत्कुंडरचनाप्रकारः तत्र प्राग्वच्चतुरस्रक्षेत्रं कृ।
त्वा तन्मध्यमानस्य सप्तमांशेन ब्रह्मसूत्रस्य प्रागग्रे वहिर्विकाश्य तन्मानेन चतुरस्र
तन्मध्यसूत्रं हंसपदावनेन भ्रमात् वृत्तं निष्पाद्य तत चतुरस्य मध्यसूत्रं चतुर्धा कृत्वा ते
ष्वंशत्रयेणांशत्रयेण तद्वृत्ते ब्रह्मसूत्रप्रागग्रादि परितः पंच चिह्नानि विधाय तत्र चि
ह्नाच्चिह्नं ज्यारूपाणि पंचसूत्राण्यास्फाल्य तत्तच्चापवृत्तखंडमार्जनात्पंचास्रकुंडं भ
वति अस्य पंचास्रकुंडक्षेत्रं परिकल्प तद्वहिरपि प्रोक्तयुक्त्या कंठमेखलार्थं पंचा
स्रद्वयं परिकल्प खातादिकं कुर्यादिति अथ सप्तास्रकुंडमाह तत्रैव तन्मध्य द
शमांशेन विकाश्य ब्रह्मसूत्रकं तेन मानेन संभ्रांत्य कृत्वा वृत्तं तथा ततः त।
चतुःषष्टिभागेषु त्रयस्त्रिंशांशमानतः वृत्ते विधाय चिह्नानि सप्तसूत्राणि पा
तयेत् तत्सप्तास्रकुंडमिति अथैतत्कुंडरचनाप्रकारः तत्र प्राग्वत्सम चतुरस्र
कृत्वा तन्मध्यमानं दशधा विभज्य तेष्वेकांशमानेन ब्रह्मसूत्रं वहिर्विकाश्य तन्मा
नेन चतुरस्रमध्यसूत्रं हंसपदमवष्टभ्य वृत्तं कृत्वा तच्चतुरस्य मध्यसूत्रप्रमाणं च
तुःषष्टिधा विभज्य तेषु त्रयस्त्रिंशदंशमानेन ब्रह्मसूत्रप्रागग्रादारभ्य वृत्ते सप्त चिह्नानि
कृत्वा चिह्नाच्चिह्नं ज्यारूपेण सप्तसूत्राण्यास्फाल्य तत्तच्चापरूपवृत्तखंडमार्जनादे
तत्सप्तास्रकुंडं भवेदिति इति दशविधकुंडनिर्माणप्रकारः अथ दीक्षायाम
ष्टौ कुंडानि चाचार्यैव कुंडानि कुर्यात् अत्राप्य— प्रागाद्यष्टदिक्षु नवमाचार्यकुंड
चतुरस्रमेवेंद्रेशानयोर्मध्ये कुर्यादिति संभूय नव कुंडानि कार्याणि अष्टकुंडक
रणादिक्षु शक्तौ प्राणादि चतुर्दिक्षु चतुरस्रार्धचंद्रवृत्तपद्माख्यानि चत्वार्येव कुंडा
नि कुर्यात् अत्राप्यशक्ताविंद्रेशानयोर्मध्ये चतुरस्रमाचार्यकुंडमेकमेव वा
कुर्यादिति अथैतेषां कुंडानां काम्यहोमेषु कुंडभेदेन फलभेदः तत्र कुलप्र
काशतंत्रे चतुरस्रे स्तंभनं स्यात्सर्वसिद्धिकरं च तत् भोगापुत्रादयो तिकुंडे ह्य
र्धचंद्रं शुभावहं मारणे केचिदिच्छंति त्रिकोणं द्वेषकारकं रिपुच्चाटनकरं केचि

वृत्तं शांतिकरं जगुः षट्कोणमुच्चाटमृतिभेदे पुनर्विशिष्यति वृष्टिदं पुष्टिदं वा
पिपद्मकुंडविदुर्बुधाः अष्टकोणं तु मत्कोस्यादरोगे पीतके चन पंचकोणं चाभिचा
रशमने मृतकृंतने सप्तास्रमेवं विज्ञाप काम्यकर्माणि साधयेत्

ततः सर्वतोभद्रमंडलं यथोक्त विधिना विधाय । अन्नादिभिश्च प्रपूर्य्य वेदीपरितो
दीपान्प्रज्वाल्य वक्ष्यमाणविधिना कलशद्रव्याण्यासाद्य तथैव तानि संस्कृत्य छत्रचाम
रध्वजदर्पणव्यजनादिकं च यथायथं निधाय गुर्वादिवंदनपूर्वकं करशुद्धितालत्रय
दिग्बंधनाग्निप्राकारत्रय भूतशुद्धिप्राणप्रतिष्ठामातृकान्यासयोगपीठन्यास मूलमंत्रन्या
सांश्च विधाय मुद्राविरचन लेख्यदेवताध्यान मानसपूजांते वैसदेव मूलमंत्रजपतत्तर्पण
र्घ्यस्थापनपात्रपूजां तद्देवन मूलमंत्रजपनतत्समर्पणानि विधाय ॥ सर्वतोभद्रमंडला
य नम इति मंडलं गंधादि पंचोपचारैः संपूज्यार्घ्यजलेन प्रोक्ष्य तत्र वक्ष्यमाण विधिना
पीठपूजां विधाय तत्कर्णिकां शालिभिरापूर्य्य तंडुलान्कुशानूर्वाः सप्तविंशतिभिः कु
शैरेकीकृताग्रविरचितब्रह्मग्रंथिकं कूर्चं च निधाय तत्र वक्ष्यमाणविधिना शालिपुंजो
परि वह्निमंडले वह्निकलाश्च संपूज्य तत्र स्वर्णादिनिर्मितं त्रिगुणीकृतसूत्रवेष्टितसर्वांगं चंदनागरु
कर्पूरधूपधूपितं कुंभं प्रणवमुच्चरन् संस्थाप्य तत्र पुष्परागनीलवैडूर्यविद्रुममौक्तिकमरकतवज्र
गोमेदपद्मरागाख्यानि नवरत्नानि सस्वर्णानि निक्षिप्य कुंभस्योपरि गंधाक्षतदूर्वाङ्कितप्रागुक्त
लक्षणं कूर्चं निधाय तत्र लं क्षं इत्यादिविलोममातृकांते मूलमंत्रं त्रिर्जपन्नात्मनः कुंभस्य योग
पीठस्य देवकं भावयन् वक्ष्यमाणपंचाशद्दलैरौषधिकाद्यैरश्वत्थोडुंबरप्लक्षवटकाद्यैः कर्पूरचं
दनकस्तूरीकुंकुमवासितैस्तीर्थजलैर्वा कुंभमापूर्य्य स्वपुरतो वक्ष्यमाणविधिना शंखं संस्था
प्य कुंभपूरितजलसजातीयजलेनापूर्य्य तत्र गंधाष्टकं विलोड्य तत्र वक्ष्यमाणवह्निकलाः सू
र्यकलाः सोमकलाश्चावाह्य तासां पृथक्पृथक्प्राणप्रतिष्ठां विधाय संपूज्य प्रणवोत्थकपं
र्वां कलावक्ष्यमाणकलामातृकान्यासोक्ताः संपूज्याः तत्र प्रथमममकाराद्ब्रह्मणोत्पन्नाः क
वर्गोत्थाः सृष्ट्यादिदशकलाः समावाह्य हंसः शुचिषदित्यस्य वामदेव ऋषिर्जगतीछंदः सूर्यो दे
वतेति ऋष्यादीन्स्मृत्वा ॐ हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् नृष
द्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहदिति मंत्रमुच्चार्य ब्रह्मणे नम इति संपूज्य पूर्वो
क्तप्राणप्रतिष्ठामंत्रेण ममपदस्थाने सृष्ट्यादीनामिति पदं दत्वा सृष्ट्यादीनां प्राणप्रतिष्ठां विधा
य ॐ कं सृष्ट्यै नम इत्यादि दशकलाः संपूज्य उकाराद्विष्णोरुत्पन्नाष्टतवर्गोत्था जरादिदशकलाः
समावाह्य ॐ प्रतद्विष्णुस्स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः यस्योरुषु विक्रमणेषु
धिक्षियंति भुवनानि विश्वा इति पठित्वा विष्णवे नम इति संपूज्य प्राग्वज्जरादिदशकलानां
प्राणप्रतिष्ठां विधाय जरादिदशकलाः संपूज्य मकाराद्रुद्रोत्पन्नाः पयवर्गोत्थाः तीक्ष्णादिदश
कलाः समावाह्य ॐ त्र्यंबकमिति मंत्रस्य वसिष्ठ ऋषिरनुष्टुप्छंदः त्र्यंबकरुद्रो देवता इति
ऋष्यादिकं स्मृत्वा ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय
मामृतात् इति पठित्वा रुद्राय नमः इति संपूज्य तासां प्राणप्रतिष्ठां विधाय ॐ पं तीक्ष्णायै न

ऋतजा

त्रिषु

१० 10

मइतिसंपूज्येम्बराद्विंदोरुत्पन्नाः षकारादिक्षकारांताः पंचवर्गोत्थाः पीतादिपंचकलाश्चावा
ह्य ऋष्यादिस्मरणपूर्वकं गायत्रीमुच्चार्य ईश्वराय नम इति संपूज्य तासां प्राणप्रतिष्ठां विधाय
ॐ घं पीतायै नम इत्यादि पंचकलाः संपूज्य ततो नादोत्थाः सदाशिवाद्युत्पन्नाः स्वरजा निवृत्या
द्याः षोडश कलाः समावाह्य विष्णुर्योनिं कल्पयत्विति मंत्रस्य त्वष्टा गर्भकर्ता ऋषिरनुष्टुप्छं
दः विष्णुर्देवतेति ऋष्यादिकं स्मृत्वा ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु आसिंचतु
प्रजापतिर्धाता गर्भं दधातु ते इति पठित्वा सदाशिवाय नम इति संपूज्य तासां प्राणप्रतिष्ठां वि
धाय अं निवृत्यै नम इत्यादि षोडश कलाः संपूज्याः इत्थं चतुर्णवति देवताः शं विसंपूज्य सक
लकलामयं शिवजलं मूलमंत्रेण कुंभे संयोज्य ततोऽश्वत्थपनसाम्रपल्लवानि दूर्वावार
णीलतया संवेष्ट्य कलशस्य हस्तविधाय कलशे निधाय तदुपरि कलशसजातीयं तंडुलपूर्णं नारिके
लफलाद्यं कल्पवृक्षफलबुद्ध्या पात्रं संस्थाप्य पट्टवस्त्रयुगेन च तं संवेष्ट्य येदिति वेद्यां प्रधानकुं
भस्थानं विधाय पूर्वादितोरणसमीपे प्राग्युक्तमंडले पाष्टदलकमलेषु वा शालिपुंजोपरि प्राग्यु
क्तविधिना प्रतिद्वारमेकमेकं स्थाप्य तत्र पूर्वदिग्गतकुंभे ध्रुवं दक्षिणे धर्णं पश्चिमे वाक्पति
मुत्तरे विघ्नेशं च संपूज्य तदाग्नेयादिकोणचतुष्टये कुंभान् संस्थाप्याग्नेयकुंभेऽनंतं नैरृते
दुर्जयं वायव्ये सिद्धार्थं ईशाने मंगलं च संपूज्य पुनः पूर्वादिकुंभेष्विंद्रादिलोकपालान्वामवे
दोक्तमंत्रेण संपूज्य पुनः पूर्वाद्यष्टदिक्कुंभाद्बहिरैरावतं पुंडरीकं वामनं कुमुदं अंजनं पु
ष्पदंतं सार्वभौमं सुप्रतीकं च पूजयेदिति दिग्गजान्संपूज्य पुनर्गुरुर्वेदीं गत्वा स्वासने समुपवि
श्य स्विष्टमंत्रेण प्राणायामत्रयं कृत्वा तस्य मंत्रस्य ऋष्यादिकरषडंगन्यासपूर्वकं सकलन्यास
जालं विधाय देवतां ध्यात्वा मानसोपचारैः संपूज्य प्रधानकुंभे वक्ष्यमाणप्रकारेण मूर्तिं परि
कल्प्य तत्र स्विष्टदेवतामावाह्य वक्ष्यमाणप्रकारेण षोडशोपचारैः सांगावरणं तत्कल्पोक्तविधि
ना संपूज्य वेद्या दक्षिणभागे हस्तमात्रायामविस्तारसमं गुष्ठपर्वमात्रोच्चं वालुकाभिः समचतु
रस्रस्थंडिलं कृत्वा वक्ष्यमाणनित्यहोमप्रोक्तविधिना वह्निं संस्थाप्य चरुं श्रपयित्वा तत्र देवता
मावाह्य संपूज्य नित्यहोमोक्तविधिना साज्येनान्नेन चरुद्रव्येण हुत्वा पुनर्देवं संपूज्य कुंभस्थमू
र्तौ संयोज्य तथैव वह्निं संपूज्य विसृज्य वक्ष्यमाणविधिना सर्वभूतबलिं तत्कल्पोक्तबलिदा
नं च विधाय देवायोत्तरापोशनादिनीराजनांतं नित्यपूजोक्तविधिना विधाय प्राणायामत्रय
ऋष्यादिकरषडंगन्यासपूर्वकं मूलमंत्रमष्टोत्तरसहस्रं जपित्वा देवाय वक्ष्यमाणविधिना ज
पं समर्प्य पूर्वं मंडपस्यैशानकोणे स्थापितं विकिरपुंजोपरि सघर्गर्भं वस्त्रयुग्मवेष्टितं जलपू
रितं करकं विन्यस्य तत्रास्त्रदेवतां सिंहरूपां दक्षवामकरयोः खड्गखेटकधारिणीं घोररूपां प
श्चिमाभिमुखीं ध्यात्वा तिष्ठन् गंधादिपंचोपचारैः संपूज्य नमस्कृत्य तं करकं कराभ्यां मुहुस्सं
उपाभ्यं नरे प्रदक्षिणं भ्रमन् करकं स्रावयन्निति विघ्नोपविघ्नपास्त्रमंत्रेण

अथ दीक्षाप्रयोगः

दीक्षाप्रयोगं वक्ष्यामि नानातन्त्रानुसारतः अथ कृतनित्यकृत्यो गुरुः शुभे लग्ने तु यागागारं रहितशुद्धभू
मौ दीक्षांगं यागमण्डपनिर्माणं कुर्यात् ततो दीक्षापूर्वदिने मण्डपमध्ये यथोक्तां वेदिं निर्माय तदुपरि स
र्वतोभद्रमण्डलं कुर्यात् मण्डपमण्डलयोर्निर्माणमन्यत्र प्रमाणेन सन्धेयं ततो दीक्षादिवसे प्रातः कृ
तनित्यकृत्यो गुरुर्मण्डपद्वारमागत्य बहिरुपलिप्य तत्र प्राङ्मुखो वोदङ्मुखो वोपविशेत् शुचिः पूर्व
मुपोषितः शिष्योपि तत्रागत्य स्वस्तिवाचनपूर्वकं संकल्पं कृत्वा गुरुं गन्धादिभिः संपूज्य वृणुयात् संक
ल्पो यथा विष्णुरोंअद्येत्यादि अमुकगोत्रोमुकदेवशर्मा चतुर्वर्गफलप्राप्तिकामोमुकगोत्रं श्रीअमुकदे
वप्रमाणेशर्माणं श्रीअमुकदेवतायाः मदुत्तरमंत्रदेशिकत्वेनेभिः पाद्यादिभिरभ्यर्च्य भवन्तमहं वृ
णे ओं वृतोस्मीति प्रतिवचनम् ततः शिष्यो यथाविहितं दीक्षाकर्म कुर्विति वदेत् यथाज्ञानतः करवा
णीति गुरुः ततः कृतांजलिः ~~शिष्यो भगवन्परमात्मरूपिन्परमकारुणिक गुरो सकलपुरुषार्थसाधनतः~~
~~करवाणीति गुरुः~~ ततः कृतांजलिः शिष्यो भगवन्परमकारुणिक गुरो सकलपुरुषार्थसाधनमन्त्रदीक्षा
भिषेकपूर्वकं मां प्रसादयेत्युक्त्वा गुरोराज्ञया सहस्रं गायत्रीं जपत्विनयतो गुरोर्दक्षिणे जपेत् ततो गुरुः
सामान्यार्घ्यं स्थापयेत् तद्यथा स्ववामे त्रिकोणमण्डलं वर्तुलं आधारं तदुपरि संस्थाप्य वह्निमण्डलाय दश
कलात्मने नमः इत्याधारं संपूज्य फडिति अर्घपात्रं प्रक्षाल्य तदुपरि संस्थाप्य अर्कसूर्यमण्डलाय द्वादशकला
त्मने नम इति पात्रं संपूज्य नमः इति शुद्धजलेनासंपूज्य फडिति अर्घपात्रं प्रक्षाल्य तदुपरि संस्थाप्य
अर्कसूर्यमण्डलाय द्वादशकलात्मने नमः इति शुपूर्य सोममण्डलाय षोडशकलात्मने नमः इति जलं
संपूज्य तस्मिन् जले गंगे च यमुने चैव गोदावरि सरस्वति नर्मदे सिन्धुकावेरि जलेस्मिन्सन्निधिं कुरु
इत्यंकुशमुद्रया तीर्थमावाह्य तत्प्रणवेन गन्धाक्षतान्निक्षिप्य मूलमंत्रमष्टधा जप्त्वा धेनुमुद्रां प्रदर्श्य
एवं प्रकारेणान्यदपि पात्रं स्थापयेत् तद्यथा द्वारस्योर्ध्वशाखायां मध्ये विघ्नाय नमः तद्दक्षिणे विघ्नेशा
यनमः गंगायै नमः द्वारवामे महालक्ष्म्यै नमः तद्वामे सरस्वत्यै नमः द्वारदक्षिणे विघ्नेशाय नमः
गंगायै नमः द्वारवामे क्षेत्रेशाय नमः यमुनायै नमः देहल्यामस्त्राय नमः एवं प्रतिहारपूजां कुर्यात् त
तोंगं संकोच्य दक्षिणपादपुरःसरं गृहं प्रविशेत् ततः पंचगव्यसामान्यार्घोदकाभ्यां गृहाभ्यन्तरं संप्रो
क्ष्य संस्कारचतुष्टयं कुर्यात् यथा मूलमंत्रेण गृहं वीक्षेत् फडिति गृहं प्रोक्षयेत् फडिति मंत्रेण दर्भै
स्ताडयेत् हुमिति अभ्युक्षणं कुर्यात् ततः पूजास्थले रक्तकंबलाद्यासनमास्तीर्य पृत्वा पठेत् मेरुपृष्ठऋ
षिः सुतलं छन्दः कूर्मो देवता आसने विनियोगः कृतांजलिः पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता
त्वं च धारय मां देवि पवित्रं कुरु चासनम् इति पठित्वा क्लीं श्रीं आधारशक्तिकमलासनाय नमः इत्यासनं सं
पूज्य तदुपरि स्वस्तिकादिक्रमेणोपविशेत् ततः सिद्धार्थानानीय अपसर्पन्तु ते भूता ये भूता भुवि सं
स्थिताः ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञयेति पठित्वास्त्राय फट् इत्यनेनाक्षितान्विकीर्य पार्ष्णिघातेन
भौमान्विघ्नानंगुष्ठतर्जनीभ्यामास्फोटेनान्तरिक्षगान्त्वा समुद्दंचितवक्त्रमूर्ध्वदृष्ट्या दिव्यानिति
त्रिविधविघ्नानुत्सार्य नैरृत्यां वास्त्वीशाय नमः ब्रह्मणे नमः इति संपूज्य भूतेभ्यो माषभक्तमांसबलिं नम
इत्युत्सृज्य भूतबलिं दत्त्वा विकिरान्विकिरेत् यथा लाजचन्दनसिद्धार्थभस्मदूर्वाकुशाक्षतान् पकीक
त्यफडिति सप्तधा जपन् त्रिधा विकिरेत् अस्त्रजप्तेन दर्भाणां मुष्टिना मार्जयेच्च तान् तान्विकिरान् तथा
वास्त्राय फडिति मंत्रेण कुशमुष्टिना विकिरान्मार्जयेत् ईशानकोणे वर्धन्याश्चासनाय प्रकल्पयेत् वर्धनी
विकिराधिष्ठात् देवता तस्याश्चासनाय ईशानकोणे विष्टरोपरि वर्धनीसंज्ञकं जलाधारं स्थापयेत् त
तो दक्षिणे पूजाद्रव्याणि पृष्ठे करप्रक्षालनार्थं पात्रं स्थापयेत् घृतप्रज्वालितान्दीपान्परितः स्थापयेत् य

याशक्तिद्वामरादिकंच ततोवामेगुरुभ्योनमः दक्षिणेगणेशायनमः मध्येइष्टदेवतायैनमः ततोभूतशुद्धिं
कुर्यात् यथास्वांकेतन्त्रान हंसोहं वा सोहमिति मंत्रेण प्रदीपकलिकाकारं हृदयस्थजीवात्मानं मूलाधारस्थ
कुण्डलिन्यासह शिरःस्थसहस्रदलकमलकर्णिकान्तर्गतपरमात्मनि लीनं विचिंत्य पादतो जानुपर्यंतं
चतुरस्रं सवज्रकं लंयुतं पीतवर्णं च भुवःस्थानं विचिन्तयेत् जानोर्नाभि चन्द्रार्धनिभं पद्मेन लांछितं
शुक्लवर्णं स्ववीजेन युतं ध्यायेदपां स्थलं नाभितः कण्ठपर्यंतं सत्रिकोणं सरेफकं सस्वस्तिकं स्ववीजेन यु
क्तं वह्निस्थमण्डलं कण्ठाद्भ्रुमध्यपर्यंतं हंसं वायोस्तु मण्डलं षट्कोणं विंदुभिः षड्भिर्युक्तं वीजेन चिन्तयेत्
भ्रुमध्याद्ब्रह्मरन्ध्रांतं वर्तुलं ध्वजलांछितं धूम्रवर्णं स्ववीजेन युक्तं ध्यायेन्नभःस्थलं पृथिव्यालंवीजं जलस्य वं अग्नेरं
वायोर्यं आकाशस्य हं एवं ध्यात्वा ततस्तानि भूतानि प्रविलापयेत् पृथ्वीमप्सु च तां वह्नौ वह्निं वायौ समीरणं प्रवि
लाप्य तथाकाशे आकाशं च ततो तथा अपरब्रह्मरूपां तां मायाशक्तिं परात्मनि इति समस्तदेहादिप्रपंचं परमा
त्मनि प्रविलाप्य पुरुषाकारं भागनादिभवसंचितं ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभुजद्वयं सुरापानहृदायु
क्तं गुरुतल्पकटिद्वयं तत्संसर्गिपदद्वन्द्वं अंगप्रत्यंगपातकं उपपातकरोमाणं रक्तश्मश्रुविलोचनं खड्गचर्म
धरं क्रुद्धं वामकुक्षौ विचिन्तयेत् ततइडावक्त्रे वामेन सिधूम्रवर्णं यमिति वायुवीजं षोडशवारं जपन् वामा
नासापुटेन वायुना देहमापूर्य पुनर्यमिति चतुःषष्टिवारं जपन् कुंभकं कुर्वन् देहं संशोष्य पुनर्यमिति द्वा
त्रिंशद्वारं जपन् दक्षनासापुटेन वायुं रेचयेत् ततो रुलनं वायुसंवन्येन रमिति वह्निवीजं षोडशवारं जपन् द
क्षनासापुटेन देहमापूर्य चतुःषष्टिवारं जपन् कुम्भकं कुर्वन् तद्भस्मीभूतमिति विचिंत्य रमिति द्वात्रिंश
द्वारं जपन् वामनासया भस्मना सह वायुं रेचयेत् ततः ठमिति चन्द्रवीजं शुभ्रं प्रकृत्यात्मकं वामनासापु
टेन पुरुषात्मकं ललाटचंद्रं षोडशवारं जपेन येत् ततो वमिति चतुःषष्टिवारं जपन् ललाटचन्द्राद्गलि
तां तामृतमयीं वृष्टिं निपात्य तया देवोपासनयोग्यं सकलं वपुः कुर्वन् लमिति द्वात्रिंशद्वारं जपन् दक्षना
सापुटेन वायुं रेचयेत् पुनरुत्पादयेद्देहं पवित्रं परमात्मनः परब्रह्मात्मिका माया मातृका प्रकृतिः परा
अजायत जगन्माता तस्या आकाशं नभसोनिलः समीरणादभूद्वह्निर्वह्नेरापस्ततो मही सेयमेभ्योपि भूतेभ्यो
जातो रूपं कलेवरं देवताराधने योग्यमुत्पन्नमिति भावयेत् तस्मिन्देहे परात्मायं सर्वज्ञः सर्वशक्तिमान्
समस्तदेवतारूपः सर्वमंत्रमयः शुभः आत्मरूपेण देहेस्य जीवभावेन तिष्ठति इत्येवं भावनायुक्तो भू
तशुद्धिरिहोदिता नासापुटोभूता वायुमवष्टभ्य हंसः सोहं अवतर २ शिवपदाज्जीव शिवसुषुम्णाप
थेन प्रविश मूलशृंगाटमुल्लस २ ज्वल २ प्रज्वल २ हंसः सोहं स्वाहा ततः पृथिव्यादीनि तत्वानि यथास्थाने स्था
पयित्वा हृत्पद्मे देवतां समानीय हृदि हस्तं दत्वा अं आं ह्रीं क्रौं हंसः मम प्राणाः इह प्राणाः अं आं ह्रीं क्रौं हंसः
मम जीव इह स्थितः अं आं ह्रीं क्रौं हंसः मम सर्वेन्द्रियाणि वाङ्मनोनयनश्रोत्रघ्राणप्राणा इहागत्य सुखं चि
रं तिष्ठन्तु स्वाहा एतत्करणप्राणशक्तानामेतत्पाठमात्रेणैव भूतशुद्धिः स्यात् इति भूतशुद्धिः ततः प्राणशक्ताना
मेतन्मामकं कुर्यात् मूलमंत्रेण वालया वा श्रीवीजेन वा प्राणायामं कुर्यात् यथा श्रीं इति षोडशवारं जपन् वाम
नासापुटेन वायुना देहमापूर्य पुनः श्रीं इति चतुःषष्टिवारं जपन् कुंभकं कुर्वन् पुनः श्रीं इति द्वात्रिंशद्वारं
जपन् दक्षिणनासापुटेन वायुं रेचयेत् इत्येकप्राणायामः एवं षोडशवारं द्वादशवारं वारत्रयं वा कुर्यात्
ततः ऋष्यादिन्यासं कुर्यात् आत्मनो मूर्ध्नि वदने हृदये च यथाक्रमं मूर्ध्नि अमुकऋषये नमः मुखे अमुकछ
न्दसे नमः हृदि अमुकदेवतायै नमः कृतांजलिः अमुकसिद्ध्यर्थे विनियोगः मातृकान्यासः क्वचिदपि
मंत्रे न स्फुरंति तत्रापि अवश्यं कर्तव्यः जपाद्यसर्वमंत्राणां विन्यासेन विना लिपेः कृतं तन्निष्फलं विद्यात्तस्मा
त्सर्वं लिपिं न्यसेत् ततो मातृकान्यासं कुर्यात् वाग्भवाद्यात्मकस्तद्वा सा शक्तितारान्वितात्कामदा श्रीं वीजाद्या
महैश्वर्यदायिनी स्मृता वाग्भवः ऐं त्रितारा ऐं क्लीं श्रीं इति वीजत्रयं श्रीवीजं श्रीं इति स्वरूपं तदुक्तं सारसं
महेश्वर्यदायिनी स्मृता वाग्भवः
...

ऐं ह्रस्वमध्ये नाभे र्नियोजयेत् ब्रह्म ऋषिः गायत्री छन्दसे नमः हृदि मातृका सरस्वती देवतायै नमः गुह्ये
हलेभ्यो बीजेभ्यो नमः पादयोः स्वरेभ्यो शक्तिभ्यो नमः कृतांजलिः मातृकान्यासे विनियोगः ललाटमुखवृत्त
नादक्षि श्रुति घ्राणेषु गण्डयोः ओष्ठदन्तोत्तमांगास्ये दोःपत्सु – अंकेषु च पार्श्वयोः स्पृष्ठतो नाभौ जठरे हृ
दयांसके ककुद्ये से च हृत्पूर्व पाणिपादयुगेष्वपि जठराननयोर्न्यसेन्मातृकार्णान्यथाक्रमम् तथा च वि
ष्णुसारोत्तरे ॐ मायें तो नमो नमोतो वा सविंदु विन्दुवर्जितः पंचाशदक्षरन्यासः क्रमेणैवं विधीयते श्रीं अं नमो ल
लाटे श्रीं आं नमो मुखवृत्ते श्रीं इं नमो दक्षिणचक्षुषि श्रीं ईं नमो वामचक्षुषि श्रीं उं नमो दक्षकर्णे श्रीं ऊं नमः
वामकर्णे श्रीं ऋं नमः दक्षनासायां श्रीं ॠं नमः वामनासायां श्रीं लृं नमः दक्षगण्डे श्रीं ॡं नमः वामगण्डे
श्रीं एं नमः – ष्ठे श्रीं ऐं नमः अधरे श्रीं ओं नमः ऊर्ध्वदन्ते श्रीं औं नमः अधोदन्ते श्रीं अं नमः मूर्ध्नि श्रीं अः नमः
मुखे श्रीं कं नमः दक्षबाहुमूले श्रीं खं नमः कूर्परे श्रीं गं नमः मणिबन्धे श्रीं घं नमः अंगुलिमूले ङं नमः
अंगुल्यग्रे श्रीं चं नमः श्री वामबाहुमूले श्रीं छं नमः कूर्परे श्रीं जं नमः मणिबन्धे श्रीं झं नमः अंगुलिमू
ले श्रीं ञं नमः अंगुल्यग्रे श्रीं टं नमः दक्षोरुमूले श्रीं ठं नमः जानुनि श्रीं डं नमः गुल्फे श्रीं ढं नमः अंगुलि
मूले श्रीं णं नमः अंगुल्यग्रे श्रीं तं नमः वामोरुमूले श्रीं थं नमः जानुनि श्रीं दं नमः गुल्फे श्रीं धं नमः अंगु
लिमूले श्रीं नं नमः अंगुल्यग्रे श्रीं पं नमः दक्षपार्श्वे श्रीं फं नमः वामपार्श्वे श्रीं बं नमः पृष्ठे श्रीं भं नमः ना
भौ श्रीं मं नमः उदरे श्रीं यं नमः त्वगात्मनि श्रीं रं नमः असृगात्मनि दक्षबाहुमूले श्रीं लं नमः मांसात्मनि
ककुदि श्रीं वं नमः मेदात्मनि वामबाहुमूले श्रीं शं नमः अस्थ्यात्मनि हृदयादि दक्षिणकरे श्रीं षं नमः म
ज्जात्मनि ककुदि श्रीं सं नमः शुक्रात्मनि हृदयादि दक्षपादे श्रीं हं नमः प्राणात्मनि हृदयादि वामपादे श्री
ळं नमः जीवात्मनि हृदयादि उदरे श्रीं क्षं नमः परमात्मनि हृदयादि मुखे ततो मन्त्रन्यासं कुर्यात् अथ कर
न्यासः अंगुष्ठाभ्यां नमः तर्जनीभ्यां स्वाहा मध्यमाभ्यां वषट् अनामिकाभ्यां हुं कनिष्ठाभ्यां वौषट् करतल
पृष्ठयोरस्त्राय फट् अंगन्यासः हृदयाय नमः इति तर्जनीमध्यमाभिः हृदये शिरसि स्वाहा इति तर्जनीम
ध्यमाभ्यां शिरसि शिखायै वषट् इति अंगुष्ठेन मुष्टि शिखायां कवचाय हुं इति व्यापकहस्ताभ्यां स्कन्दादू
रुपर्यंतं नेत्रत्रयाय वौषट् इति तर्जनीमध्यमानामिकाभिः नेत्रत्रये अस्त्राय फट् इत्यधोर्ध्वतालत्रयं दत्त्वा
छोटिकाभिर्दशदिग्बन्धनं कुर्यात् ततः स्वदेहे पीठन्यासं कुर्यात् ॐ आधारशक्तये नमः कूर्माय नमः अ
नन्ताय नमः पृथिव्यै नमः सुधासागराय नमः रत्नद्वीपाय नमः अनन्ताय नमः पृथिव्यै नमः मणिम
ण्डपाय नमः रत्नवेदिकायै नमः रत्नसिंहासनाय नमः इति हृदये अंसद्वयोरुद्वयवदनकटिपार्श्व
युग्मेषु भूयः प्रादक्षिण्येन न्यसेत् ॐ धर्माय नमः दक्षांसे ॐ [illegible] ज्ञानाय नमः इति वामांसे ॐ वैराग्याय
नमः इति वामोरौ ॐ ऐश्वर्याय नमः दक्षोरौ ॐ अधर्माय नमः इति मुखे ॐ अज्ञानाय नमः इति वामपार्श्वे
ॐ अवैराग्याय नमः इति नाभौ ॐ अनैश्वर्याय नमः इति दक्षपार्श्वे पुनर्हृदये ॐ आनन्दकन्दाय नमः संविन्ना
लाय नमः ॐ सर्वतत्त्वात्मकपद्माय नमः ॐ प्रकृतिमयपत्रेभ्यो नमः ॐ विकारमयकेसरेभ्यो नमः ॐ पंचाश
द्बीजाढ्यकर्णिकायै नमः ॐ अं वह्निमण्डलाय दशकलात्मने नमः ॐ अं सूर्यमण्डलाय द्वादशकलात्मने
नमः ॐ उं सोममण्डलाय षोडशकलात्मने नमः ॐ सं सत्त्वाय नमः ॐ रं रजसे नमः ॐ तं तमसे नमः ॐ आं
आत्मने नमः ॐ अं अन्तरात्मने नमः ॐ पं परमात्मने नमः ॐ ह्रीं ज्ञानात्मने नमः ततः स्वपीठशक्तीर्न्य
स्य पीठमन्त्रं पठित्वामुकदेवतापीठाय नमः इति न्यासं कृत्वा हृत्पद्मे देवतां ध्यात्वा मानसोपचारैराराध्य
ष्टां दशधा यित्वा नमस्कृत्यार्घ्यपात्रं स्थापयेत् तद्यथा तदुक्तं तन्त्रसागरसंहितायां आधारं त्रिपदं प्राक्:
स्वर्णरौप्यशिलाकूर्मकपालालाबुरूपमयम्
षट्पदं वाच तुष्पदं अथवा वर्तुलाकारं कुर्याद्देवि मनोहरं अतिसूक्ष्ममतिस्थूलं भिन्नं छि
न्नं ... नारिकेलं च शंखं च मुक्ताशुक्तिसमुद्भवं पुष्पहस्तसमुद्भूतं पात्रं कुर्याद्विचक्षणः शान्तिके च शिलापात्रं लभनं चैव मरणमयं नारिकेलं च
त्रं च वर्जयेत् स्वर्णरौप्यताम्राणि सर्वसिद्धिकराणि च

७०

वश्यादौऽभिचारे च कूर्मजं शंखं ज्ञानप्रदं प्रोक्तं मुक्तिविद्याप्रदायिनी कपालभवपात्राणि योगसिद्धिकराणि
च श्रीपद्मजपात्राणि सर्वपापहराणि च उक्तेष्वेतेषु देवेशि पात्रमेकं प्रकल्पयेत् आत्मदेवतयोर्मध्ये
पात्राणि स्थापयेद्बुधः गुरोः पात्रं च तस्मात् तदन्ते भोगपात्रकं तदन्ते शक्तिपात्रं च योगिनीनां तदन्तिके तदन्ते
वीरपात्रं चार्घ्यले पात्रं तदन्तिके पाद्यपाचमनीयं च पात्राणि स्थापयेद्बुधः उत्तमेन वपात्राणि सप्त पात्राणि
मध्यमं केचिदिच्छन्ति मंत्रज्ञा पंच पात्राणि मध्यमं अधमं त्रीणि पात्राणि पात्रद्वयमथापि च देवतापूजनेऽर्म
त्रीपकपात्रं न कारयेत् पंचपात्रपक्षे देवीपात्रं गुरोः पात्रं भोगपात्रं त्रयं मतं पूजापात्रं विज्ञेयं योगिनीनां च त
र्पणे पाद्यमाचमनीयं च ले पात्रात्रयार्चने ततोऽर्घ्यपात्रस्थापनं स्ववामे त्रिकोणमण्डलं कृत्वा तदुपरि त्रि
पदिकामारोप्य अस्त्राय फडिति शंखं प्रोक्ष्य तदुपरि संस्थाप्य मूलमंत्रं जपन् शुद्धजमापूर्य वं वह्निमण्ड
लाय दशकलात्मने नमः इति त्रिपदिकां अं सूर्यमण्डलाय द्वादशकलात्मने नमः इति जलं संपूज्य क्रां
हृदयाय नमः क्रीं शिरसे स्वाहा क्रूं शिखायै वषट् क्रैं कवचाय हुं क्रौं नेत्रत्रयाय वौषट् क्रः अस्त्राय फट्
षडंगमंत्रैरपि संपूज्य हस्ताभ्यामाच्छाद्य तस्मिंजले मूलमंत्रमष्टधा जप्त्वा अस्त्रेण संरक्ष्य कवचेनावगुण्ठ्य
वं इति धेनुमुद्रयामृतीकृत्य तत्र गन्धपुष्पादिकं निक्षिपेत् एवं प्रकारेण सदा दक्षिणे प्रोक्षणीपात्रं संस्थाप्य
किंचिदर्घ्यजलं गृहीत्वा प्रोक्षणीजले निक्षिप्य तेनोदकेनाने पूजोपकरणं यागमण्डपं चाभ्युक्षयेत् एवं प्रका
रेणार्घ्यपात्रस्य वामे पाद्यपात्रं आचमनीयपात्रं च स्थापयेत् इत्यर्घ्यसंस्थाप्य च स्थापनं कुर्यात् तद्यथा प्रथम
तो मण्डलं गन्धादिभिः संपूज्य धान्यादिभिः कर्णिकामध्यमापूर्य तदुपरि तण्डुलान्दत्वा तदुपरि कुशानास्ती
र्य तदुपरि माहन्तं विष्टरं संस्थाप्य तदुपरि घटं अस्त्राय फडिति प्रक्षालितान्तरं कर्पूरादिसधूपितं तीर्थम
नोहरं यथोक्त त्रिगुणतंतुभिर्वेष्टितं चन्दनादिभिरलंकृतं पुष्पमाल्यालंकृतग्रीवं – वोद्भतसमन्वितं न
वरत्नोदरं विलोममातृकामूलमंत्रं च जपन् लीरिद्रुमपलाशत्वग्भवकषायपयोऽन्वितगन्धाष्टकयुक्तैः
सुगन्धिजलैः संपूरितान्तरं अश्वत्थोडुम्बरप्लक्षन्यग्रोधाम्राणां मण्डराजिता लतावेष्टितं नवपल्लवमुखं समुखं दत्तसफ
लयवशरावं वस्त्रयुग्मवेष्टितं ओंकारमुच्चरन् भूरसीत्यादिभिर्वैदिकमंत्रैर्विष्टरोपरि स्थापयेत् ततः
कुम्भकलशाधिष्ठातृप्राणप्रतिष्ठां कुर्यात् प्राणप्रतिष्ठामंत्रो यथा पाशादिवर्णात्मतेसादमुष्य पदं पुनः
क्रमात् प्राण इह प्राणस्तथा जीव इह स्थितः अमुष्य सर्वेन्द्रियाणि भूयो मुष्य पदं वदेत् वाङ्मनोनयनश्रोत्रघ्राण
प्राणपदात् अमुष्य पश्चादिहागत्य सुखं चिरं तिष्ठंतु वह्निजाया अयं प्राणमनः प्रोक्तः सर्वजीवप्रदायकः सर्वत्र आं ह्रीं क्रों
हंसः इत्यंते अमुष्य पदं देवमिति निष्कर्षः यथा आं ह्रीं क्रों हंसः अमुकदेवतायाः प्राणाः इह प्राणाः आं ह्रीं क्रों हं
सः अमुकदेवताया जीव इह स्थितः आं ह्रीं क्रों हंसः अमुकदेवतायाः सर्वेन्द्रियाणि वाङ्मनोनयनश्रोत्रघ्राण
प्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा इति प्राणप्रतिष्ठां कृत्वा दिनकरकिरणकणकृतमाञ्जलोसहृदया
हृन्नासापुटेन देवतां समानीय मूलेमृति संकल्प्य घटं संस्थाप्य संस्थापनसन्निधानसन्निरोधनसकली
करणावगुण्ठनामृतीकरणपरमीकरणमुद्राभिर्घटे देवतामावाह्य तस्मिन् घटे पीठं पूजयेत् ओं आधारश
क्तये नमः ओं कूर्माय नमः ओं अनन्ताय नमः ओं पृथिव्यै नमः ओं सुधासागराय नमः ओं रत्नद्वीपाय नमः ओं कुस
हलाय नमः ओं रत्नमण्डपाय नमः ओं रत्नवेदिकाय नमः ओं महासिंहासनाय नमः इति संपूज्य पुष्पाद्
ह्रीं त्वा देवतां ध्यात्वा घटे पुष्पं दत्वा षोडशोपचारैः पूजयेत् तद्यथा आसनं स्वागतं चार्घ्यं पाद्यमाचमनीयकं
मधुपर्काचमनस्नानवसनाभरणानि च गन्धपुष्पे धूपदीपौ नैवेद्यं वन्दनं तथा प्रयोजयेदर्चनायामुपचा
रस्तु षोडश तदक्रमान् मानसोल्लासे संयुक्त प्रदद्देह्मी मुपचारांस्तु षोडश संयुक्तासंबोधनमे संयुक्तपदेन पू
जा यथा श्रीअमुकदेवते आसनं कल्पयामि नमः स्वागतं कुशलप्रश्नं श्रीअमुकदेवते अर्घ्यं कल्पयामि स्वाहा
इति मूर्ध्नि दद्यात् श्रीअमुकदेवते पाद्यं कल्पयामि नमः इति पादयोर्दद्यात् श्रीअमुकदेवते आचमनीयं क
ल्पयामि स्वाहा इति मुखे दद्यात् श्रीअमुकदेवते मधुपर्कं कल्पयामि वं नमः इति मुखांबुजे दद्यात् श्रीअमु

कदेवते आचमनीयं कल्पयामि नमः श्रीअमुकदेवते स्नानीयं कल्पयामि नमः अमुकदेवते इदं वस्त्रं
कल्पयामि नमः अमुकदेवते यज्ञोपवीतं कल्पयामि नमः श्रीअमुकदेवते आभरणानि कल्पया-
मि नमः श्रीअमुकदेवते गन्धं कल्पयामि नमः श्रीअमुकदेवते पुष्पं कल्पयामि नमः श्रीअमुक
देवते धूपं कल्पयामि नमः दीपं कल्पयामि नमः नैवेद्यं पुरतः समानीयार्घजलेनास्त्रायफडित्य
भ्युक्ष्य ह्रूमित्यवगुण्ठ्य वमिति धेनुमुद्रयामृतीकृत्य तदुपरि मूलमंत्रमष्टधा जप्त्वा श्रीअमुक
देवते नैवेद्यं कल्पयामि नमः इत्युत्सृज्य अमृतोपस्तरणमसि स्वाहा इति जलगण्डूषं दत्वा प्रा
णाय स्वाहा अपानाय स्वाहा समानाय स्वाहा उदानाय स्वाहा व्यानाय स्वाहा इति प्राणवायुपंच
प्राणाहुतीः कृत्वा तस्याः स्वीकारं विभाव्य ॐ अमृतापिधानमसि स्वाहा पुनरपोशानं दत्वा श्रीअ
मुकदेवते आचमनीयं कल्पयामि नमः इत्याचमनं दत्वा श्रीअमुकदेवते ताम्बूलं कल्पयामि न
मः इति ताम्बूलं दत्वा अमुकदेवतायै नमः इति पुष्पांजलित्रयेण पूजयेत् तत्र तत्र जलं दद्या
दुपचारान्तरान्तरे केसरेषु अग्निकोणादि हृदयादीन् पूजयेत् ह्रां हृदयाय नमः ह्रीं शिरसे स्वाहा
ह्रूं शिखायै वषट् ह्रैं कवचाय हुं ह्रौं नेत्रत्रयाय वौषट् ह्रः पूर्वादिषु अस्त्राय फट् इति च तद्दिक्षु पूज
येत् ततस्तत्तद्देवतावरणान् संपूज्य लोकपालान् संपूजयेत् इन्द्रमग्निं यमं रक्षो वरुणं पवनं विधुं
ईशानं पन्नगाधीशमजं ऊर्ध्वपितामहं यथोक्तदिक्ष्वेताः पूजयेत् ततस्तेषामस्त्राणि वज्रशक्ति
दण्डमसिपाशमंकुशांकं गदां शूलं चक्रं पद्ममेषामायुधानि क्रमाद्विदुः क्रमादायुधान्यपि संपू
ज्य देयमानमंत्रस्य दशसंस्कारान् कुर्यात् तद्यथा जननं जीवनं पश्चात्ताडनं बोधनं तथा अ
थाभिषेको विमलीकरणाप्यायने तथा तर्पणं दीपनं गुप्तिर्दशैता मंत्रसंस्क्रियाः मंत्राणां मा
तृकामध्यादुद्धारो जननं स्मृतं प्रणवान्तरितान् कृत्वा जपेदित्यर्थः एतन्मंत्रस्य जीवनम्
मंत्रवर्णान्समालिख्य ताडयेच्चन्दनाम्भसा प्रत्येकं वायुना मंत्री ताडनं तदुदाहृतं प्रत्येकमिति
देयमंत्रस्य प्रत्यक्षरोपरि यमिति वायुबीजमुच्चरं चन्दनमिश्रितं जलं दद्यात् इति मंत्रस्य ताड
नं विलिख्य मंत्रं तं मंत्री प्रसूनैः करवीरजैः तन्मंत्राक्षरसंख्यातैर्हन्यात्तेन बोधनं तान्मंत्रपद्मादावि
त्यर्थः यातेनेति यकारस्यानते रेफः तथा च रमिति बीजेन एतन्मंत्रस्य बोधनं स्वतंत्रोक्तविधा
नेन मंत्री मंत्रस्य संख्यया अश्वत्थपल्लवैर्मंत्रमभिषिंचेद्विशुद्धये स्वतंत्रोक्तेति विष्णुपटलेषु क्वच
न्दनेन दैवीपटेरलं वा चन्दनेन तथाः संचिन्त्य मनसा मंत्रं ज्योतिर्मंत्रेण निर्दहेत् मंत्रे मलत्रयं मंत्री
विमलीकरणं त्विदं ज्योतिर्मंत्रेण ॐ ह्रौं मिति मंत्रेण मलत्रयं मायिकार्मणशारीरसंज्ञकमिति
मलत्रयं कुशोदकेन जप्तेन प्रत्यर्णं प्रोक्षणमेनोः तेन मंत्रेण विधिवदेतदाप्यायनं मतं तेन
मंत्रेण देयमंत्रेण एतन्मंत्रस्याप्यायनं मंत्रेण वारिणा मंत्री तर्पणं तर्पणं मतं मंत्रेण देयमू
लमंत्रेण तथा च मूलमंत्रमुच्चार्यामुकमंत्रं तर्पयामीति प्रयोगः एतन्मंत्रस्य तर्पणं तारमाया
रमायोगो मनोदीपनमुच्यते तारः ॐ माया ह्रीं रमा श्रीं योगः संबद्धः तेन देयमंत्रस्यादौ ॐ ह्रीं
श्रीं इति बीजत्रयं दत्वा जपेदित्यर्थः एतन्मंत्रस्य दीपनं जप्यमानस्य मंत्रस्य गोपनं त्वप्रकाशनं
संस्कारा दशसंप्रोक्ताः सर्वतंत्रेषु गोपिताः याः कृत्वा संप्रदायेन मंत्री वाञ्छितमाप्नुयात् ततो होमं
कुर्यात् यथा प्राङ्मुख उपविष्टः स्वस्तिवाचनपूर्वकं सूर्यः सोम इति पठित्वा तिलकुशजलान्या
दाय विष्णुः अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवप्रीत्या चतुर्वर्गफलप्राप्तिकामः श्रीअमुकदेव
तायाय दत्तस्य मंत्रस्य दीक्षाकर्मांगभूतं श्रीअमुकदेवतायाय दत्तस्य मंत्रस्य पूर्वकं तिलाज्यादिभि
रष्टोत्तरसहस्रं शतं वा होमकर्म करिष्ये इति संकल्प्य यज्ञाय तत इति पठेत् ततः प्रथमतः सर्वा
धिकारिकं चतुरश्रं कुण्डमिति निरूपयामि तत्र सहस्रादिहोमे शताद्यादि दिग्विधिनिषेधकृष्णमानात्वेनित्ये वा

शुभेन तत्कुर्यात् तदुक्तं विष्णुसंहितायां आदौ भूमिं परीक्षेत वास्तुज्ञानविशारदः शल्यादीन् शोधयेदत्र
खात्वा वा पुरुषं खनेत् पुरुषं पुरुषप्रमाणं आदौ कुण्डस्थानं गोमयेनोपलिप्य लिप्य समामार्वे संस्था
प्य समास्या च जलेनाभ्युक्ष्य पञ्चगव्येनाभ्युक्षणं कुर्यात् तत्र च तद्विंशत्यङ्गुलप्रमाणं चतुरस्रं निर्मायाष्टा
दश संस्कारान् कुर्यात् यथा शारदातिलके वीक्षणं मूलमन्त्रेण शरेण प्रोक्षणं मतं तेनैव ताडनं दर्भै
र्वर्मणाभ्युक्षणं मतं अस्त्रेण खननोद्धारौ हृदयेनावपूरणं समीकरणं मन्त्रेण रोचनं वर्मणा मतं कु
ट्टनं हेतिमन्त्रेण वर्ममन्त्रेण मार्जनं विलेपनं कलारूपकल्पनं तदनन्तरं त्रिसूत्रीकरणं पश्चाद्धृद
येनार्चनं मतं अस्त्रीवज्रीकरणं मन्त्रेण कुशैः शुभैः चतुष्पथं तनुत्रेण तनुयादक्षपाटने यागेकु
ण्डानि संस्कुर्यात्संस्कारैरेभिरीरितैः मूलमन्त्रेण दृश्यमानं मूलमन्त्रेण तत्स्थानं पश्येत् अस्त्राय फडि
ति तत्स्थानं प्रोक्षयेत् अस्त्राय फडिति दर्भैस्ताडनं ताडयेत् कुमिति तत्स्थानमभ्युक्षयेत् अस्त्राय
फडिति कुण्डस्य खननं यावान् कुण्डस्य विस्तारः खननं तावदिष्यते अस्त्राय फडिति मृत्तिकोद्धरणं
नमः इति मन्त्रेण पूरणं मृत्तिकान्तरेण तत्स्थानस्य कुट्टनं अथवा अस्त्राय फडिति मन्त्रेण वा कु
ट्टनं कुट्टनं दृढीकरणं अथवा कुमिति मन्त्रेण कुट्टनं कुमिति मन्त्रेण कुण्डस्थानं मार्जयेत् नमः
इति मन्त्रेण तत्स्थानं गोमयेनोपलेपयेत् ततो कुमिति मन्त्रेण तत्कुण्डं कलारूपं भावयेत् ततो न
म इति मन्त्रेण रक्तसूत्रत्रयेण शुक्लसूत्रत्रयेण वा मध्यमेखलां वेष्टयेत् इति त्रिसूत्रीकरणं नम
इति कुण्डमर्चयेत् अस्त्राय फडिति कुण्डं वज्रत्वेन चिन्तयेत् इति वज्रीकरणं नमः इति मन्त्रेण कुशैः
कुण्डाभ्यन्तरे चतुरस्रं कुर्यात् मध्ये आवसथ्यभागः पूर्वे सभ्यभागः पश्चिमे आहवनीयभागः
उत्तरे अन्वाहार्यः दक्षिणे गार्हपत्यः इति चतुष्पथीकरणं इति केचित् वस्तुतस्तु कुण्डमध्ये पूर्व
पश्चिमं दक्षिणोत्तरं क्रमेण कुशचतुष्टयदानमेव तत् नमः इति मन्त्रेण कुण्डस्य मध्ये मेखलायां द
क्षिणपश्चिमोत्तरेषु विष्टरत्रयस्थापनार्थं द्वादशाङ्गुलप्रमाणं मूलमन्त्राभिमन्त्रितान् कुशानास्त
रेत् तथा च शारदाचार्यभट्टः विष्टरास्तरणार्थं मूलमन्त्राभिमन्त्रितान् द्वादशाङ्गुलमानेनाक्षपादं प्र
कीर्तितम् इत्यक्षपाटनं इत्यष्टादश संस्कारान् कुर्यात् अथवा तानि संस्कुर्यात् चतुर्भिर्वीक्षणादि
भिः यथा मूलमन्त्रेण कुण्डमुपपश्येत् अस्त्राय फडिति कुण्डं प्रोक्षयेत् अस्त्राय फडिति दर्भैः कुण्डं ताड
येत् कुमिति कुण्डमभ्युक्षयेत् इति संस्कारचतुष्टयं वा कुर्यात् कुण्डकरणाशक्तौ हस्तप्रमाणं स्थ
ण्डिलं कृत्वा यथासम्भवसंस्कारं कृत्वा होमं कुर्यात् स्थण्डिले यथा हस्तायामसविस्तारमङ्गुष्ठोन्न
तं चतुरस्रं चयेत् तदुक्तं विम गणेशविमर्षिण्यां अथवा स्थण्डिलं कुर्याद्धोमार्थं मन्त्रिसत्तमः अ
ङ्गुष्ठपर्वणोन्नतं हस्तायामं समं शुभं अन्यथा वर्णयन्त्येके स्थण्डिलं हस्तमात्रकं चतुरङ्गुलम
न्येषां बालुकाभिः समन्ततः इति ततः कुण्डमध्ये पूर्वाग्ररेखात्रयं उत्तराग्ररेखात्रयं विलिख्य अर्घ्यपा
त्रं संस्थाप्य तस्य दक्षिणे अर्घ्यपात्रं वामे प्रोक्षणीपात्रं च संस्थाप्य अर्घ्यजलं तत्र किञ्चिन्निदध्यात्
ततः प्रणवमुच्चरन् अर्घ्यजलेन रेखामभ्युक्ष्य प्रागग्रायां रेखायां उत्तराग्ररेखाक्रमेण पूजयेत् प्रथम
रेखायां मुकुन्दाय नमः द्वितीयरेखायां वैवस्वताय नमः कूर्माय नमः अनन्ताय नमः पृथिव्यै न
मः स्वधासागराय नमः रत्नद्वीपाय नमः कल्पवृक्षाय नमः तृतीयरेखायां इन्दवे नमः इति सं
पूज्य तन्मध्ये त्रिकोणं तदुपरि षट्कोणं तदुपरि वृत्तं लिखित्वा ओंकारमुच्चरन् अर्घ्यजलेन संप्रोक्ष्य
तदुपरि पीठमर्चयेत् यथा आधारशक्त्यै नमः कूर्माय नमः अनन्ताय नमः पृथिव्यै नमः स्वधा
सागराय नमः रत्नद्वीपाय नमः कल्पवृक्षाय नमः तत्त्ववेदिकायै नमः चिन्तामणिगृहराजाय
नमः रत्नसिंहासनाय नमः आनन्दकन्दाय नमः संविन्नालाय नमः तत्त्वात्मकाय नमः प्रकृति
मयपत्रेभ्यो नमः विकारमयकेसरेभ्यो नमः पञ्चाशद्बीजाढ्यकर्णिकायै नमः धर्माय नमः ज्ञाना

यनमः वैराग्यायनमः ऐश्वर्यायनमः अधर्मायनमः अज्ञानायनमः अवैराग्यायनमः अनैश्वर्यायनमः
अशुकदेवतास्थंडिलायनमः इतिपीठानिसंपूज्यातन्मध्येवागीश्वरीमृतस्नातांनीलेदीवरसन्निभां
वागीश्वरेणसंयुक्तामुपचारैः प्रपूजयेत् यथावागीश्वरीमहितवागीश्वरेहागच्छेत्यावाहयइदंपाद्यं ॐवा
गीश्वरीवागीभ्यांनमः इतिपुष्पांजलित्रयेणसंपूज्य वागीश्वरीवागीश्वराभ्यांनमः इतिनमइतिनस्य
यात् ततोग्निमरणिसंभवंसूर्यकांतादिमणिसंभवंश्रोत्रियागारजंवानीयस्वदक्षिणेकांस्यपात्रेसंस्था
प्य तस्मादेकांकाष्ठिकांगृहीत्वा ॐक्रव्यादेभ्यः स्वाहाइत्यनेननैऋत्यांदिशिप्रक्षिपेत् ततोवह्निंमूले
नवीक्ष्यास्त्रायफडितिप्रोक्षजलेनाग्निंप्रोक्ष्यास्त्रायफडितिमर्भैः संताड्यऊमित्यर्घजलेनवह्निमभ्युक्ष्य
तस्मिन्नग्नेरंजाठराग्नयेनमः रींबैंदवाग्नयेनमः कूंसौमाग्नयेनमः इतिसंपूज्य प्रणवेनाग्निमभि
२ संज्य वमितियेनमुद्रयाम्रतीकृत्यास्त्रायफडितिवह्निमभिरक्ष्यऊमितिअवगुंठ्यवह्निंमूलमंत्रे
णसंपूज्यवह्निंकराभ्यांततोत्सजानुस्पृष्टमहीतलः ऊंडोयदिविः परिभ्राम्यात्मनोभिमुखंवह्निंप्र
णतमुच्चरन् परमशिवजीवबुद्ध्यासोहमिति वबुद्ध्यावागीश्वर्यायोनौविनिक्षिपेत् ततोवागीश्वरी
वागीश्वराभ्यामाचमनीयंनमः इतिसंपूज्यकामेश्वरीश्वरीवागीश्वराभ्यामाचमनीयंनमः इतिसंपूज्य
कामेश्वरीश्वरीकामेश्वरयोः संगमंविचिंत्यकामेश्वरीगर्भनाडींतेश्चेतत्संयोज्य ॐइतिऊपोर्ध्वायो
निमाच्छाद्यगर्भरक्षार्थंदर्भकंकणंदत्वाजालिनीमुद्रांप्रदर्शयेत् मुद्रालक्षणमाह मणिबंधौसमौकृ
त्वाकरौप्रसृतांगुली यथामेमिलितौकृत्वातन्मध्येगुष्ठकंक्षिपेत् वह्निमुद्दीपयेत्सम्यग्जालिन्या
मुद्रयानया ततोवह्निंमंत्रेणाग्निज्वालयेत् चित्पिंगलहनहनदहदहपचपचसर्वज्ञापयस्वाहा
इत्यग्निंप्रज्वाल्य कृतांजलिरग्निंप्रज्वालितंवत्देशातवेदंकृताशनं स्वर्णवर्णममलंसमिद्धंविश्व
तोमुखं इत्यनेनाग्निमुपस्थापयेत् ततोवह्नेःसात्विकीनांसप्तजिह्वानांस्वदेहेन्यसेत् लिंगपायुशि
रोवक्त्रघ्राणनेत्रेषुसर्वतः वह्निरंत्रीसंयुक्तामादिर्यानामबिन्दवः वह्निमंत्राः समुद्दिष्टाजिह्वानांस
मदेशिकैः पायु - दः सर्वतःसर्वांगेव्यापकंन्यसेत् वह्निरेफः इयकारः अर्धीशाः ऊकारः तेन
युक्तमेणसप्तसवलरयाः सबिंदवःबिन्दुयुताः तेन इतिवह्नेः सप्तजि
ह्वामंत्रः प्रकारांतरेणजिह्वावीजान्याह उर्ध्वयामले त्रिरेखोइति सौवर्णोरेफसप्तस्वरस्थि
तौ उद्धृविडसमायुक्तोजिह्वावीजान्यनुक्रमात् अतिसौवर्णौयवर्णशवर्णौ यरलव इतिय
वर्गः शषसह इतिशवर्गयुक्तः विंदुरनुस्वारः तद्युक्तइत्यर्थः वर्णः अतिसौयतौवर्णौत्रिरेफौ
रेफरहितौ तेनयर्जवेंशषसहाः तेनयुक्तक्रमेणहसषशवलयाः इंदुरर्धचन्द्रः तद्युक्तः विं
दुरनुस्वारः तद्युक्तइत्यर्थः प्रारदामतमालंभ्याह जिह्वास्ताम्रिविधाप्रोक्तागुणभेदेनकर्मसु
हिरण्यागगनारक्ताकृष्णान्यासुप्रभामता वकनूपातिरक्ताश्चसाविकीयागकर्मसु पद्मरागा
सुवर्णान्यात्ततीयाबहुलोहिता लोहितानातरश्वेता धूमिनीचकरालिका राजस्योरमनाव
र्कोर्विहिताः काम्यकर्मसु विश्वमूर्तिःस्फुलिंगिन्याधूम्रवर्णामनोजवाः लोहितास्याकरालाख्या
कालीतामसर्दरिताः एताःसप्तनियुञ्जीतक्रूरकर्मसुमंत्रिभिः स्वस्वनामसमाभाःस्फुजिह्वाः
कल्याणरितसः कल्याणरेतसोवह्नेः प्रथमतःसात्विकीनांस्वदेहेन्यासंकुर्यात् सुंहिरण्यायैनमः
लिंगे हूंगगनायैनमः गुदे स्रंरक्तायैनमःशिरसि कृंकृष्णायैनमःमुखे ल्यूंसुप्रभायैनमः घ्राणे श्रुंबहु
रूपायनमोनेत्रे गंमुअतिरिक्तायैनमः मुखे ल्यूंसुप्रसर्वगात्रेषुन्यसेत् ततोहिरण्यागगनारक्ताकृष्णासु

प्रभावज्ररूपाअतिरक्तानांसप्तजिह्वानांअधिदेवता अमर्त्यपितृगन्धर्वयक्षनागपिशाचकाः राक्षसाःसप्तजिह्वा
नामीरिताअधिदेवताः अमर्त्योदेवः अधिदेवतानामपिस्वदेहेन्यासंकुर्यात् ॐदेवेभ्योनमः लिंगे ॐपितृभ्यो
नमः गुदे ॐगन्धर्वेभ्योनमः शिरसि ॐयक्षेभ्योनमः मुखेनागेभ्योनमः घ्राणहृदये पिशाचेभ्योनमः नेत्र
हृद्ये ॐराक्षसेनमः सर्वगात्रेव्यापकंन्यसेत् वह्नेरंगमन्त्रैर्न्यसेत्तनावृत्तेनवर्दना सहस्रार्चिस्वस्तिपूर्णोऽउ
त्तिष्ठपुरुषः पुनःधूमव्यापीसप्तजिह्वोअंगुष्ठयोः धनुर्धरइतिक्रमात् षडंगमनवः प्रोक्ताजातिभिःस
हसंयुताःतथाकरन्यासंकुर्यात् सहस्रानामिकाभ्यांनमः अनामिकयोः सप्तजिह्वायकनिष्ठाभ्यांनमः
कनिष्ठयोः ॐधनुर्धरायअस्त्रायफट्करतलपृष्ठाभ्यांनमः करतलपृष्ठयोः ततोंगन्यासंकुर्यात् सह
स्रार्चिषेहृदयायनमोहृदये स्वस्तिपूर्णायशिरसेस्वाहाशिरसि उत्तिष्ठपुरुषायशिखायैवषट् शिखा
यां धूमव्यापिनेकवचायहुं स्कन्धाद्युरुपर्यन्तं सप्तजिह्वायनेत्रत्रयायवौषट् नेत्रत्रये ॐधनुर्धराय
अस्त्रायफट् इत्यूर्ध्वोर्ध्वतालत्रयं कोटिकाभिर्दशदिशोबध्नीयात् अथमूर्तीनांन्यासः मूर्तीनष्टौतनौन्य
सेद्देशिकोजातवेदसः मूर्ध्नांसपार्श्वकंसांशुकटिपार्श्वांसके पुनः प्रदक्षिणवशान्न्यसेदुच्यन्तेतायथा
क्रमम् जातवेदाःसप्तजिह्वोहव्यवाहनसंज्ञकः अश्वोदरजसंज्ञोन्यः पुनर्वैश्वानराह्वयः ताग्नयर
ति ॐअग्नये — हव्यवाहनायनमः दक्षपार्श्वे ॐअग्नये अश्वोदरजायनमोदक्षकट्याम् ॐअग्नयेवैश्वानरा
यनमः पायौ ॐअग्नयेकौमारतेजसेनमोवामकट्यां ॐअग्नयेविश्वमुखायनमोवामपार्श्वे ॐअग्नयेदेव
मुखायनमोवामांसे ततोमध्येआसनंकल्पयित्वा ॐवह्न्यासनायनमः इतिसंपूज्यवह्निंध्यायेत् य
थापुष्पंगृहीत्वा इष्टंशक्तिंस्वस्तिकाभीतिमुच्चैर्दीर्घैर्दोर्भिर्धारयन्तंजपाभं हेमाकल्पंपद्मसंस्थंत्रिनेत्रं
ध्यायेद्वह्निंबद्धमौलिंजटाभिः इतिध्यात्वामूलमन्त्रेणमूर्तिंकल्पयन् कुण्डस्थिताग्नौपुष्पंदत्वा एकीभू
तंविचिन्त्य ॐवैश्वानरइहागच्छइहतिष्ठइत्यावाह्य इदंपाद्यं ॐवैश्वानरजातवेदइहावहलोहिताक्षसर्वक
र्माणिसाधयस्वाहानमः एवमर्घ्यंनमः एवमाचमनीयस्नानीयगन्धपुष्पधूपदीपनैवेद्यपुनराचमनीया
निदत्वा ताम्बूलंदत्वापुष्पांजलित्रयेणवह्निंसंपूज्यमध्यत्रिकोणेषट्कोणेषुच तथाचोक्तंगणेशविमर्शि
न्यांहिरण्यातप्तहेमाभाशूलपाणिर्दिशिस्थिता अरुणादित्यसंकाशारक्तजिह्वाग्निसंस्थिता कृष्णानीलाञ्जनसं
काशानैरृत्यांदिशिसंस्थिता वज्ररूपातथाव्याख्यादक्षिणेतरतः स्थिताषट्कोणेषुवह्नितेषु सुप्रभापूर्वसं
स्थिता हिरण्यावारुणीप्रोक्ताशंकरीवज्ररूपका सव्येरक्तातथाग्नेय्यामतिरक्ताचसंस्थिता कनकारश्मिमाया
वकुण्डमध्येव्यवस्थिता हिरण्याकनकारक्ताकृष्णादक्षाननस्थिता सुप्रभातिरिक्ताचवज्ररूपाचवामतः
सप्तजिह्वाःपूजयेत् पूर्वेहिरण्यायैनमः आग्नेय्येगगनायैनमः नैरृत्येरक्तायैनमः पश्चिमेकृष्णायैनमः वा
योसुप्रभायैनमः ईशानेवज्ररूपायैनमः त्रिकोणमध्ये ॐअतिरक्तायैनमः इतिसंपूज्यकेसरेष्वंगदेवता
याःपूजयेत् यथा अग्निकोणेसहस्रार्चिषेहृदयायनमः नैरृत्येस्वस्तिपूर्णायशिरसेस्वाहा वायौउत्तिष्ठ
पुरुषायशिखायैवषट् ईशानेधूमव्यापिनेकवचायहुं मध्येसप्तजिह्वायनेत्रत्रयायवौषट् गोपालपक्षे
नेत्राभ्यांवौषट् पूर्वदक्षिणपश्चिमोत्तरेषुधनुर्धरायअस्त्रायफट् ततोष्टदलेषुपूर्वाग्निदक्षिणनैरृतप
श्चिमवायूत्तरेशानेषुवह्निमूर्तयः पूज्याःपूर्वे अग्नयेजातवेदसेनमः ॐआग्नेय्यां ॐअग्नयेसप्तजिह्वायन
मः दक्षिणे ॐअग्नयेहव्यवाहनायनमः नैरृते ॐअग्नयेअश्वोदरजायनमः पश्चिमे ॐअग्नयेवैश्वानरायन
मः वायौ ॐअग्नयेकौमारतेजसेनमः उत्तरे ॐअग्नयेविश्वमुखायनमः ईशाने ॐअग्नयेदेवमुखायनमः त
तश्चतुरस्रस्याष्टदिक्षुपूर्वादिक्रमेणेन्द्रादिलोकपालान्पूजयेत् यथा इन्द्रोवह्निर्यमश्चैवनैरृतिर्वरुण
स्तथा वायुःकुबेरईशानोनन्तोब्रह्माततःपरंच प्राच्यादिदिक्षुसंपूज्याः प्रसूजगान्यसन्देनेः तेषांध्याने पीतो

रक्तस्तथा नीलः श्यामः श्वेतश्च धूम्रकः शुक्लः श्वेतस्तथा शुभ्रो रक्तवर्णः प्रकीर्तितः तथास्त्राणि वज्रं श-
क्तिं दण्डं खड्गं पाशं अङ्कुशं गदां शूलं चक्रं तथा पद्मं क्रमतोऽस्त्राणि पूजयेत् अस्त्राणां ध्यानं कनकरजतो-
यदाभ्रं च पावकारुण हिम नील जपा प्रवाल भासः निजनिजलक्षितमौलयो निजास्त्राभययुतपाणियुगाश्च
वज्रपूर्वाः पूर्वे लां इन्द्राय नमः आग्नेय्यां रां अग्नये नमः दक्षिणे यां यमाय नमः नैरृते क्षां निरृतये नमः
पश्चिमे वां वरुणाय नमः वायौ वां वायवे नमः उत्तरे शां कुबेराय नमः ईशाने हां ईशानाय नमः ऊर्ध्वे
ओं ब्रह्मणे नमः अधः ह्रीं अनन्ताय नमः इत्याद्येतदस्त्राणि पूजयेत् यथा पूर्वे वज्राय नमः आग्नेय्यां ओं
शक्तये नमः दक्षिणे ओं दण्डाय नमः नैरृते ओं खड्गाय नमः पश्चिमे ओं पाशाय नमः वायौ ओं अङ्कुशाय
नमः उत्तरे ओं गदायै नमः ईशाने ओं शूलाय नमः ऊर्ध्वे ओं पद्माय नमः अधः ओं चक्राय नमः इति संपूज्य
शुद्धजलेन मध्यमेखलोपरि प्रदक्षिणक्रमेण वेष्टयेत् मध्यमेखलायां दक्षिणपश्चिमोत्तरेषु विष्टरस्था-
पनार्थं द्वादशाङ्गुलप्रमाणान् गर्भान् कुशान् आस्तरेत् तदुपरि सविष्टरान् परिधीन् दक्षिणपश्चिमोत्तरेषु स्थाप-
येत् छन्दोगपरिशिष्टे वा कुमाराः परिधयश्चत्वारः सत्वचो व्रणाः त्रयो भवन्ति पर्णा एकैकशस्तु वर्द्धि-
शाम् तत्र कुण्डानुरूपा वा मानमस्य निगद्यते ततः स्रुक्स्रुवौ संस्थापयेत् यथा स्रुक्स्रुवौ समादायाधो-
मुखौ वह्नौ त्रिधा प्रतप्य वामहस्ते कृत्वा दक्षिणहस्तेन कुशेन तयोरग्रमूलमध्यानि मार्जनं कृत्वार्घोदकेन त्रिवारं सं-
प्रोक्ष्य पुनर्वह्नौ प्रतप्य दर्भानग्नौ प्रक्षिपेत् ततश्चाग्नेर्दक्षिणे कुशोपरि स्थापयेत् ततश्चाज्यस्थालीमादाय फडिति
प्रक्षाल्याग्नौ त्रिः प्रताप्य वामहस्ते संस्थाप्य दक्षहस्ते नार्घोदकेन त्रिः प्रोक्ष्य पुनरग्नौ प्रताप्यात्मसंमुखे स्थापयेत्
आज्यमानीयाज्यस्थाल्यां निक्षिप्य मूलेनाज्यं वीक्ष्यास्त्राय फडिति आज्यं प्रोक्ष्यास्त्राय फडिति दर्भैर्मर्दितं सन्ताड्य कु-
मेत्यर्घजलेनाभ्युक्षयेत् इति संस्कारचतुष्टयं कृत्वा कुण्डादङ्गारानुत्तरत्र वायुकोणे संस्थाप्य नमः इति मन्त्रेणा-
ज्यस्थालीं स्थापयेत् इदं तापनं ततो युगलं प्रज्वाल्याज्यस्थाल्यां निक्षिप्य दग्धशेषं नमः इति मन्त्रेण वह्नौ क्षिपेत् इदं
पवित्रीकरणं पुनर्ज्वलितेन दर्भयुगलेन कुशमिति मन्त्रमुच्चरन् हृतनीराज्यमग्नौ प्रक्षिपेत् इत्यभिद्योतनं ततः
प्रज्वालितकुशमुष्टिं गृहीत्वास्त्राय फडिति मन्त्रमुच्चरन् हुते प्रज्वालितान् दर्भान् दग्धाग्नौ प्रक्षिपेत् इत्युद्यो-
तनम् तस्मादङ्गाराज्यस्थालीमानीयात्मसम्मुखे संस्थाप्य तानङ्गारानग्नौ प्रक्षिप्याङ्गारस्थानमार्जनं कृत्वा ज-
लं स्पृशेत् ततो ज्ञानयोर्हस्तयोरङ्गुष्ठकनिष्ठाभ्यां पवित्रं पृथक्पृथग्धृत्वास्त्राय फडिति मन्त्रमुच्चरन् प्राङ्मुखोत्ह-
नमुत्प्लुयात् पवित्रं स्थाल्यां निस्थापयेत् पुनस्तेनैव प्रकारेण तथैव धृतेन पवित्राग्रेण संगृहीत्वा तेन पवित्रेण नमः
इति मन्त्रमुच्चरन् आत्मनोऽभिमुखं हुतं संस्थाप्य पूर्वास्थापितपवित्रमिदं चेति पवित्रद्वयमग्नौ प्रक्षिपेत् इत्युत्प-
वनोत्पवनेनाज्यस्य संस्कुर्यात् संस्काराः षडुदीरिताः ततः प्रादेशमात्रं मध्ये दक्षिणभागं शुक्लपक्षं
वामभागं कृष्णपक्षं विचिन्त्य वामे इडां दक्षिणे पिङ्गलां मध्ये सुषुम्णां ध्यात्वा होमं कुर्यात् ततः स्रुवेण नमः इति मं-
त्रमुच्चरन् दक्षिणभागाद्घृतमादाय ओं अग्नये स्वाहा इत्यग्नेर्दक्षिणलोचने जुहुयात् संपातमाज्यं तत्रैव वा-
मभागे स्थापयेत् पुनर्नमः इति मध्यभागात् घृतमादायाग्नीषोमाभ्यां स्वाहा इति वह्नेर्ललाटनेत्रे हुत्वा संपा-
तमाज्यं मध्यभागे क्षिपेत् संपातमपसे ललाटनेत्राहुतिं न कुर्यात् नरसिंहविधये कुर्यादेव पुनर्नमः इति दक्षिण-
भागादाज्यमादायाग्नये स्विष्टकृते स्वाहा इत्यग्नेर्वक्त्रे हुत्वा संपातमाज्यं तत्रैव दक्षिणभागे क्षिपेत् इत्यग्निवक्त्रो-
द्घाटनं स्वाहा इत्यस्य कः पदे तस्मादग्रभागाद्गृहीतमाज्यं तत्र शेषं स्रुवे सलमन्यसेत् तथा च स्वाहाशब्दमुच्चार्या कृ-
तिं स्वाहाशब्दमुच्चार्याकृतिशेषं हुतं तत्रैव स्थापयेदित्यर्थः ततो महाव्याहृतिहोमं कुर्यात् ततः स्रुवामेज

लपूर्णपात्रं स्थापयित्वा प्रस्वाहुतिशेषं तत्रैव स्थापयेत् ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ भूर्भुवः स्वः स्वाहा ॐ वै
श्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा इत्यग्निमंत्रेणाहुतित्रयं हुत्वा हुतशेषं ज
लपूर्णपात्रे स्थापयेत् होमे स्वाहान्ते तन्नाम हव्यं यजमानः पार्श्वः आदाय दक्षिणे पाणौ स्रुव त्रिमधुरं हविः प्राङ्मुखो व
ह्निजायांते जुहुयात् त्यक्तपाणिना एवं मंत्रेणौंकारपूर्वेण स्वाहान्तेन विचक्षणः स्वाहावसाने जुहुयाद्धा
यन्त्वे मंत्रदेवताम् त्रिमधुरं घृतमधुशर्कराः तथा चोक्तं प्रयोगसारे पयोमधुघृतं चेति समं त्रिमधुरं स्मृ
तम् वह्निजायास्वाहेति धानादिषोडशसंस्कारान् कुर्यात् यथा शारदातिलके गर्भाधानादिका वह्नेः क्रि
या निर्वर्तयेत् क्रमात् अष्टाभिराज्याहुतिभिः प्रणवेन पृथक् पृथक् गर्भाधानं पुंसवनं सीमन्तोन्नयनं
तथा अनंतरं जातकर्म स्यान्नामकरणं तथा उपनिष्क्रमणं पश्चादन्नप्राशनमीरितं चूडोपकरणं भूयो
महानाम्नी महाव्रतं अथोपनिषद्व्रतं गोदानं द्वाहकौ स्मृतिः शुभे स्युर्विवाहान्ताः क्रियास्ताः क्रूरक
र्मसु मरणांतः समुद्दिष्टा वह्नेरागंकर्मभिः महानाम्नी ब्रह्मचर्यम् स्मृतिरंत्येष्टिः तद्यथा अग्नेर्गर्भाधानं
कल्पयामि स्वाहा इत्यष्टाहुतीर्जुहुयात् ॐ अग्नेः सीमंतोन्नयनं कल्पयामि स्वाहा अष्टाहुतीः सर्वत्र अग्नेर्जा
तकल्पयामि स्वाहा ८ ॐ अग्नेर्नामकरणं कल्पयामि स्वाहा ८ तस्मिन् समये अग्ने त्वं अमुकनामासि ततसं
ज्ञाधिष्ठातृदेवता नाम्ना नाम कुर्यात् अथवा अग्नेस्त्वं वरदनामासि विश्वरूपनामासि वा नाम कुर्यात् अग्ने
नामानि पूर्वं लिखितप्रमाणेनानुसंधेयानि उल्लकबाहुल्यात्तु न तत्र न लिखितानि अमुकनाम्नेऽग्नये पा
द्यादिभिर्वह्निं संपूज्य तांबूलं दत्वा नमस्कुर्यात् ततः ॐ अमुकनाम्नो अग्नेर्निष्क्रमणं कल्पयामि स्वाहा इत्यष्टा
हुतीर्जुहुयात् ॐ अमुकनाम्नो अग्नेरन्नप्राशनं कल्पयामि स्वाहा ८ ॐ अमुकनाम्नो अग्नेः चूडाकरणं कल्पया
मि स्वाहा ८ ॐ अमुकनाम्नो अग्नेरुपनयनं कल्पयामि स्वाहा ८ ॐ अमुकनाम्नो अग्नेर्महानाम्नीं कल्पयामि स्वाहा
८ महानाम्नी व्रतं वेदाध्ययनमिति वा अमुकनाम्नो अग्नेर्महाव्रतं कल्पयामि ॐ स्वाहा ८ ॐ अमुकनाम्नो अग्नेरु
पनिषद्व्रतं कल्पयामि स्वाहा ८ ॐ अमुकनाम्नो अग्नेर्गोदानं कल्पयामि स्वाहा ८ ॐ अमुकनाम्नो अग्नेः समाव
र्तनं कल्पयामि स्वाहा ८ अमुकनाम्नो अग्नेर्विवाहं कल्पयामि ॐ स्वाहा ॐ अमुकनाम्नो अग्नेरग्न्याधानं कल्पया
मि ॐ स्वाहा ८ इत्यग्नेः षोडशसंस्कारान् समाप्य पितरौ तस्य संपूज्यात्मनि योजयेत् तस्य वह्नेः वागीश्वरी वा
गीश्वरौ यथा इदं पाद्यं वागीश्वर्यै नमः इति पाद्यादिभिः संपूज्य वागीश्वर्यै नमः इति पुष्पांजलित्रयं दत्वा वागी
श्वर्यै नमः इति नमस्कुर्यात् ततो वागीश्वरं पूजयेत् यथा वागीश्वराय नमः इति पाद्यादिभिः संपूज्य वागीश्व
राय नमः इति पुष्पांजलित्रयं दत्वा वागीश्वराय नमः इति नमस्कुर्यात् वागीश्वरी सहित वागीश्वरपूजितो
सि त्वमस्मत्कांसहारमुद्दयास्थापिलांतं वर्धन्नाम पुटे आनीय स्वहृदि स्थापयेत् वैश्वानरसंहितायां ब्राह्मणं
स्थापयेदग्नौ फलार्थी कर्मसाक्षिणं अग्नेराग्नेयकोणे अथवा दक्षिणे कर्मस्थापनं ब्रह्मणः सदा ततः कुण्ड
स्य दक्षिणे ब्रह्माणं संस्थाप्य पाद्यादिभिरर्चयेत् ततः समिधः पंच जुहुयात् मूलाग्रघृतसंस्तुताः ततो हुत्वा
तु पंचसमिधोऽग्नौ प्रक्षिपेत् ततो जिह्वाग्रमूर्तीनां मंत्रैरेकैकाहुतीर्जुहुयात् ॰ हिरण्याय स्वाहा इत्येकाहु
तिं जुहुयात् ॰ गगनायै स्वाहा १ कृष्णायै स्वाहा ॰ सुप्रभायै स्वाहा १ ॰ वह्निरूपायै स्वाहा ॰ अतिर
क्तायै स्वाहा १ सहस्रार्चिषे हृदयाय स्वाहा १ स्वस्तिपूर्णाय शिरसे स्वाहा १ उत्तिष्ठपुरुषाय शिखायै वष
ट् स्वाहा १ ॐ धूमव्यापिने कवचाय हुं स्वाहा १ सप्तजिह्वाय नेत्रत्रयाय वौषट् स्वाहा १ गोपालपद्मसप्तजि
ह्वाय नेत्रत्रयाय वौषट् स्वाहा ॐ धनुर्धराय अस्त्राय फट् स्वाहा १ ॐ अग्नये सप्तजिह्वाय स्वाहा १ ॐ अग्नये हु

व्यवाहनायस्वाहा १ ॐअग्नयेअग्न्योदरजायस्वाहा ॐअग्नयेवैश्वानरायस्वाहा १ ॐअग्नयेकौमारतेजसे
नमः १ ॐअग्नयेविश्वमुखायस्वाहा १ ॐअग्नयेदेवमुखायस्वाहा १ ततोवामहस्तेस्रुवंसंस्थाप्यदक्षिण
हस्तेनस्रुचमादायनमइतिमंत्रमुच्चरन् स्रुचेणचतुराज्याहुतीःस्रुविदत्वाधोमुखेनस्रुचेणस्रुवंपिधा
य इतिहुन् वैश्वानरजातवेदइहावहलोहिताक्षसर्वकर्माणिसाधयस्वाहावौषट् इत्यग्निमंत्रेणपूर्णा
हुतिंदत्वाश्रीमहागणपतिमंत्रेव्यस्तसमस्तेनच दशाहुतीर्जुहुयात् यथा ॐस्वाहा ॐश्रींह्रींस्वाहा ॐ
श्रींह्रींक्लींस्वाहा ॐश्रींह्रींक्लींग्लौंस्वाहा ॐश्रींह्रींक्लींग्लौंगंस्वाहा ॐश्रींह्रींक्लींग्लौंगंगणपतयेस्वाहा
ॐश्रींह्रींक्लींग्लौंगंगणपतयेवरवरदस्वाहा ॐश्रींह्रींक्लींग्लौंगंगणपतयेवरवरदसर्वजनंमेवशमान
यस्वाहा इतिदशाहुतीर्हुत्वाभीष्टदेवतायंत्रंध्यात्वाविष्टपीठेध्यात्वावाह्याग्निनासहैक्यंविभाव्य वह्निरू
पांतांविचिंत्यनित्यपूजाक्रमेणसपरिवारांतांसंपूज्यनैवेद्यंदत्वापुनराचमनीयंदत्वा ताम्बूलंनिवेद्य
मूलेनामुकदेवतायैनमः इतिपुष्पांजलित्रयेणसंपूज्यनमस्कुर्यात् ततोवह्नीष्टदेवतयोरैक्यंविभाव्य
तस्यामुखेपंचविंशाहुतीर्जुहुयात् यथा मूलमंत्रमुच्चरन् इदंस्वाहामुकदेवतायै एतत्क्रमेणपंचविं
शाहुतीर्जुहुयात् इदंसैकीकरणम् ततोवह्निदेवतयोरात्मनाचसहैक्यंविभाव्यमूलेनैकादशाहुतीर्जुहुया
त् यथा मूलमंत्रमुच्चरन् इदंनाडीसंधानम् जुहुयादंगमुख्यानामाहुतीनामनुक्रमात् एकैकमाहुतिंस
म्यक्सर्पिषादेशिकोत्तमः अंगमुख्यानामंगप्रधानम् आहुतीनां यस्यदेवस्ययत्संख्याआवरणदेवताः
तासाम् ततः आवरणदेवतामुद्दिश्यमूलेनैकैकाहुतिंजुहुयात् अग्नेरंगविभागमाह शारदातिलके यतः
काष्ठं ततःश्रोत्रंयतोधूमोत्रनासिका यत्राल्पज्वलनंनेत्रंयतोङ्गारः ततःशिरः यत्रप्रज्वलिताज्वालासाजिह्वा
जातवेदसः आस्यंतज्जुहुयादग्नेविप्रश्चेत्सर्वकर्मसु कर्णेहोमेभवेद्व्याधिर्नेत्रेन्धत्वमुदाहृतं नासिकाया
मनःपीडामस्तकेधनसंक्षयः प्रकृतहोमंसंपाद्यसूर्यगणेशशिवलोकपालादिभ्योपिचैकैकाहुतिंजुहु
यात् ततोमहाव्याहृतिहोमंकुर्यात् ॐभूःस्वाहा ॐभुवःस्वाहा ॐस्वःस्वाहा ॐभूर्भुवःस्वःस्वाहा इतिजु
तामूलदेवतांगन्धादिभिःसंपूज्यतिलाज्यादिभिःप्रकृतहोमंकुर्यात् होमप्रकारमाह हविन्दानंतस्य
जपाणिनाकर्तव्यं तदुक्तंगन्धालतंत्रेविनिहस्तेनकर्तव्यंनाविरेणकदाचन होतश्चत्तविनाशाययद्यन
मानोवनस्पति तथाचत्रिपुरार्णवेसारे विद्धहस्तेहविर्दीनंक्रियतेचकृताश्चनि दातुःस्वल्पफलंनास्ति
होताचनरकंव्रजेत् भैरवतंत्रेपि हविर्दानंहस्तेनवैश्वानरमुखेकृतंहोतुश्चत्तविनाशाययजमा
नोविनश्यति होमेमुद्रात्रयंप्रोक्तं मृगीहंसीचसूकरी मृगीकनिष्ठातर्जन्योर्हंसीमुक्तकनिष्ठिका सूक
रीकरसंकोचमितिमुद्राःप्रकीर्तिताः मृगीशान्तिकपुष्टिकामार्थाहंसीसर्वफलप्रदा अभिचारेषुयान्तेषुसूकरी
कथितावुधैः प्रकृतहोमंसमाप्यगुरुः शिष्यंपंचगव्यंपाययित्वा विधिवत्स्नापितंवर्धनीमुखस्थशिशोः
शिरसिमातृकामनसाजपन्मूलेनसाधितैःकुंभजलैरभिषिंचेत् अवशिष्टतोयेनशिष्यमाचामेत्
उत्थाप्यगात्रमार्जनंकृत्वाधौतेवाससीपरिधाप्याचमेत् ततःसूक्ष्मवस्त्रेणवौषडितिमंत्रमुच्चार्यशिष्य
स्याचामेत् नेत्रेबध्नीयात् ततःकरेगृहीत्वातं शिष्यंकुण्डसमीपेसमानीयनेत्रबन्धंदूरीकृत्वास्ववामे
कुशासनेस्थापयेत् ततोगुरुरमुकंमंत्रंददामीतिप्रतिज्ञांश्रावयेत् ततःशिष्योदक्षिणांदद्यात्रयेणव
स्त्रेणशिरःप्राच्छाद्योऽस्यऋष्यादिकंसहतच्चदेवताधिया पूर्वकं ततोगुरुःशिष्यहृद्देशेमात्रकामासंहत्वावस्त्रेणशिरः मंत्रंदत्वागुरुर्जलंगृहीत्वाविधिपूर्वमंत्रो
शिष्यस्यदक्षिणकर्णेवारत्रयंब्रूयात् वामकर्णेएकवारंब्रूयात् इतिविनीतशिष्यस्यहस्तेजलंदद्यात् अस्त्वितिशिष्याब्रूयुः
वातवममसमानफलदात्रीदातावाक्

ततः शिष्यो गुरुमंत्रदेवतानामैक्यं भावयन्मंत्रमष्टोत्तरशतं जपेत् अष्टवारं वा तथा च विज्ञानसंहितायां गु
रोर्विद्याममालभ्याष्टोत्तरशतं जपेत् अथवाष्टसहस्रं तु प्रजपेन्मंत्रमनन्यधीः गुरुरपि स्वशक्तिसिद्ध्यर्थ
मासं कृत्वाष्टोत्तरसहस्रं शतं वा जपेत् ततः शिष्यो जपं समाप्य देवतात्मकं गुरुं दण्डवत्प्रणम्य तस्य पा
दाम्बुजद्वंद्वं मूर्ध्नि योजयित्वा स्तवं कुर्यात् यथा नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे विद्यावतारसंसि
द्धये स्वीकृतानेकविग्रह नारायणस्वरूपाय परमात्मैकमूर्तये सर्वाज्ञानतमोभेदभानवे चित्स्वरूपि
णे स्वतंत्राय दयाक्लृप्तविग्रहाय शिवात्मने परतंत्राय भक्तानां भव्यानां भव्यरूपिणे विवेकिनां विवे
काय विमर्शाय विमर्शिनां प्रकाशानां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे त्वत्प्रसादादहं देव कृतकृत्योऽस्मि स
र्वतः अहं त्वत्पुमहापाशाद्विमुक्तोऽस्मि शिवोऽस्मि च इति पठित्वा गुरुं स्थापयात् ततो गुरुहस्ताभ्यां शिष्यमस्त
कं धृत्वा उत्थापयेत् यथा उत्तिष्ठ वत्स मुक्तोऽसि सम्यगाचारवान्भव इत्युक्त्वा शिष्यमुत्थापयेत् मंत्रावतारं कथयेत्
ततो गुरवे दक्षिणां दद्यात् तदुक्तं ब्रह्मसंहितायां यथा विप्रवाचो यस्तु गुरुरत्नानि मानवप्रिये अदत्वा दक्षिणां वा
पि स याति नरकं ध्रुवं दीक्षान्ते दक्षिणां प्राज्ञः स्वर्णगोभूमिभूषणं वस्त्रभाजनवस्त्रानपशुदासासनानि च य
द्यदिष्टतमं वस्तु गुरवे तन्निवेदयेत् तथा च कपिलपंचरात्रे सर्वस्वं दक्षिणां दद्यादर्धं वा दद्यात्स्वयशस्विनीम् भूमिं
हस्तिकरीं दद्यात्सुत्रपौत्रानुयायिनीम् तथा च पारिजातेऽपि गुरवे दक्षिणां दद्यात्स्वप्रदाय शिवात्मने गुर्वर्थमति
मात्मीयं शरीरमपि संत्यजेत् एकमप्यक्षरं यस्तु गुरुः शिष्यं निवेदयेत् पृथिव्यां नास्ति तद्द्रव्यं यद्दत्वा सो
ऽनृणी भवेत् ततः पूर्णाहुतिकाले अग्नेस्त्वं मृडनामासि मृडनाम्ने अग्नये पाद्यं नमः इति पाद्यादिभिः संपूज्य पू
र्णां दद्यात् यथा अग्निपुराणम् मूर्धानं देवमंत्रेण संस्त्रवेण धारया मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृ
तमाजातमग्निं कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः दद्यादन्यायपूर्णां तु नोपविश्य कदा
चनेति मूर्धानं दिवेति यजुषा पूर्णाहोमं यशःसाम होमीति सामगानां तथा च कृशानुसंहितायां स्रुक्स्रुवौ चोत्ता
नास्यौ गृहीत्वा शंखमुद्रया स्थित्वा नाभिसमं कृत्वाथ यद्देवं महेश्वरं पंचाङ्गुल्यग्रका धारयेच्छंखमुद्रयेति वाचस्प
तिमिश्रकृतमहादानपद्धतिवचनात् तांत्रिकमत्र माह स्रुक्स्रुवौ चोत्तानौ स्थौ गृहीत्वा ॐ भूर्भुवायवे चान्तरिक्षा
य दिवे च महसे स्वाहा ॐ सूर्यायादित्याय चन्द्रमसे नक्षत्रेभ्यश्च दिग्भ्यश्च महते स्वाहा स्रुक्स्रुवावधोमुखौ
कृत्वा मूलविद्यया तेन पूर्णां दद्यात् ततोऽग्निं पाद्यादिभिः संपूज्य वस्त्रनारिकेलफलादिकं दद्यात् ततोऽग्निं नम
स्कुर्यात् सर्वतः पाणिपादोऽसि सर्वतोक्षिशिरोमुखः विश्वरूपो महानग्निः प्रणीतः सर्वकर्मसु आयुरारो
ग्यमैश्वर्यं धृतिं सर्वबलं यशः तेजो वर्चः पशून्वीजं शौर्यं साम्राज्यमेव च सौभाग्यं कर्मसिद्धिं च कृपशिष्टा
सकरीता सर्वमेतत्सर्वसाक्षिन् विलोहितोऽग्निरीहिनः अग्निप्रज्वलितं वन्दे जातवेदं हुताशनं सुवर्णवर्ण
ममलं समिद्धं विश्वतोमुखं इति पठित्वा नमस्कुर्यात् ततः कृतांजलिरग्निं प्रार्थयेदनेन यथा ॐ आ ब्रह्म
ब्रह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वा
नाशुः सप्तिः पुरंध्रिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो
वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पतां इति प्रार्थयेत् ततोऽग्निगतदेवतागणं तदंगैर्वि
लीनं विभाव्य भगवति देवते पूजितासि क्षमस्वेति संहारमुद्रया स्वहृदि समानीय कृतांजलिरग्निं विस
र्जयेत् यथा ॐ यज्ञं यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्व
वीरस्तं जुषस्व स्वाहा इति पठित्वाग्निविसर्जनं कुर्यात् ततो ब्रह्मणे दक्षिणां दद्यात् तथा च स्मृतिः ब्रह्म
णे दक्षिणां देया यत्र या परिकीर्तिता कर्मान्तेनुच्यमानापि पूर्णपात्रादिका भवेत् हैमं वस्त्रयुग्मं कांस्य
मित्यपि श्रुतेः तथा च शाखाभेदादुभयं यथा पूर्णपात्रमानीय तिलकुशजलान्यादाय विष्णुः
ॐ अद्य अमुकमासे अमुकपक्षे अमुकतिथौ अमुकगोत्रः श्री अमुकदेवशर्मा श्री अमुकदेवतायाः

दक्षरमंत्रस्य दीक्षाकर्माङ्गहोमकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं ब्रह्मणेहं ददे इति दक्षिणामुत्सृज्य ब्रह्म
विमोचनं न कुर्यात् अनेन ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे उप प्रयन्तु मरुतः सुदानव इन्द्र प्राशूर्भ
वा सचा इति ब्रह्मविमोचनं कुर्यात् ततः परिस्तरणकुशांस्तु तान् कांस्यस्थालीमध्ये प्रक्षिपेत् ततस्तिलकार्थं
कुण्डस्य ईशानकोणात् स्रुवेण भस्मानीय पात्रान्तरे स्थापयेत् शान्तिदीपिकायां वसिष्ठः ऐशान्यां माहेन्द्रे भस्म
स्रुवेणाथ स्रुचापि वा वन्दनं कारयेत्तेन शिरःकण्ठांसकेषु च कश्यपस्येति मन्त्रेण यथानुक्रमयोगतः
ततः शान्तिं प्रकुर्वीत अवधारणवाचनं अथ होमदक्षिणा प्रपञ्चसारे एकादशार्धकर्णिकावरकाञ्चन
स्य दद्यात्तं देवगुरवे अयुतसहस्रहोमे अर्धार्धं पञ्चकर्णिकाद्दिकणाच सार्धांश्याद्दक्षिणेति कथिता मुनिभि
र्द्विधैव शारदायां च सहस्रहोमे वितरेद्दक्षिणां निष्कमानतः तदर्धं वा सुवर्णं वा यथाविभवसारतः नि
ष्कं वा तदर्धं वा शक्त्यपेक्षया विकल्पः ततपेक्षिकः निष्केऽप्रवृत्तेः निष्कपलमिति संप्रदायः तस्य सु
वर्णचतुष्टयं पञ्चकृष्णलको माषकेऽस्तु वर्णस्तु षोडश पलं सुवर्णाश्चत्वार इति शास्त्रस्य निश्चयः कृ
ष्णलः स्वर्णमाषकः विश्वप्रकाशे अत्तालंकारयोर्निष्कं निष्कः सुवर्णचतुष्टये निष्कमष्टाधिकस्वर्णश
ते दीनारकर्षयोरियमुक्तं उक्तलिकास्त्वष्टकलिके गतद्वात्रिंशद्रक्तिकमिते ततः कृताञ्जलिः होमकर्मा
च्छिद्रमस्तु निष्कमात्रः दक्षिणा च प्रदातव्या ग्रहादीनां विसर्जनं ततो होमस्येतुर्ग्यं दत्त्वा पृथिवीप्रीतितला
भवेति वदेत् ततः कृताञ्जलिः होमकर्माच्छिद्रमस्तु ततो गुरुः स्वयमुत्थाय घटसंनिधौ गत्वोपविशेत्
ततः शिष्यो गुरवे दक्षिणां दद्यात् यथा तिलकुशजलान्यादाय विष्णुः अद्य अमुके मासि अमुकपक्षे अ
मुकतिथौ अमुकगोत्रः अमुकदेवशर्मा श्रीअमुकदेवताया यथाक्षर मंत्रस्य दीक्षाकर्मप्रतिष्ठार्थमिदं
कांचनं अमुकगोत्राय श्रीअमुकदेवशर्मणे गुरवे तुभ्यमहं ददे गुरुः स्वस्तीति ब्रूयात् वित्तशाठ्यं वि
ना सर्वं गुरवे संनिवेदयेत् मण्डपं मण्डपद्रव्यं गुरवे संनिवेदयेत् ततो गुरुर्घटमूलदेवतां यथाविधिभिः
संपूज्य तां मूलं दत्त्वा पुनराचमनीयं दत्त्वा अंगदेवतागणं तदंगे विलीनं विभाव्य श्रीअमुकदेवतां पूजिता
सिद्धमस्त्विमस्त्कां संहारमुद्रया वहन्नासापुटेन देवतां स्वहृदि समानीय प्राणायामं कृत्वात्मानं तत्स्वरूपं
विभाव्य निर्माल्यं गृहीत्वा ईशे निर्माल्यशेषिणा तत्र देवं समर्चयेत् ईशानकोणे त्रिकोणमण्डलं कृत्वा तम
ण्डलं व्यापकं मण्डलाय नमः इति पुष्पैः संपूज्य निर्माल्यं गृहीत्वा ॐ अमुकदेवतायै नमः इति मण्डलोप
रि पूजयेत् गन्धसारं तन्नैवेद्यं तत्शेषं तत्सर्वं ऐशान्यां तद्भुजे दद्यात् किंचित् ध्यानेन विशोधयेत् तद्भुजे निर्मा
ल्यभुजेति च विष्वक्सेनस्तु विष्णोः जसमण्डो विवस्वतः चण्डेश्वरी तथा शाक्ते श्रीचण्डेशः शंकरस्य
च लम्बोदरो गणपतेरसौ उच्छिष्टभोजिनः तथाचागमकुठ्के दीक्षायां पूजयेत्कुम्भे यत्रादोषमं
हंयजेत् ततो घटं संचाल्य स्थानान्तरे संस्थाप्य कृताञ्जलिः अथ कुम्भेन तदमुकदेवतायाय दक्षरमंत्रस्य
दीक्षाकर्माच्छिद्रमस्तु ततो घटजलेन शिष्यमभिषिंचेत् यथा सुरास्त्वामभिषिंचन्तु ब्रह्मविष्णुमहे
श्वराः वासुदेवो जगन्नाथस्तथा संकर्षणः प्रभुः प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते आखण्डलो
ग्निर्भगवान्यमो वै नैर्ऋतस्तथा वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ब्रह्मणा सहितः शेषो दि
क्पालाः पान्तु ते सदा कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्षमा मतिः बुद्धिर्लज्जा वपुः शान्तिः तुष्टिः कां
तिश्च मातरः एतास्त्वामभिषिंचन्तु धर्मपत्न्यः समागताः आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः
ग्रहास्त्वामभिषिंचन्तु राहुः केतुश्च तर्पिताः देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ऋषयो मुन
यो गावो देवमातर एव च देवपत्न्यो ध्रुवा नागा दैत्याश्चाप्सरसां गणाः अस्त्राणि सर्वशस्त्राणि

राजानो वाहनानि च औषधानि च रत्नानि कालस्यावयवाश्च ये सरितः सागराः शैलास्तीर्थानि जलदा नदाः एते त्वा
मभिषिंचंतु सर्वकामार्थसिद्धये महादेव ऋषिः विराड्गायत्री छन्दः इन्द्रो देवता शान्तिकर्मणि विनियोगः क
या नश्चित्र आभुवदूती सदावृधः सखा कया शचिष्ठया वृता कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः दृढा
चिदारुजे वसु अभीषुणः सखीनामविता ज— बृहस्पतिर्ददातु इति घटजलेनाभिषिच्य त्रिशीर्णि शन्तं भव
सूतये ओं स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पति
र्दधातु इति घटजलेनाभिषिच्य यज्ञभस्मना वन्दनं कुर्यात् यज्ञभस्म गृहीत्वा ओं कश्यपस्य त्र्यायुषं शि
ष्यस्य ललाटे दद्यात् जमदग्नेस्त्र्यायुषमिति कण्ठे दद्यात् यद्देवानां त्र्यायुषमिति अंसयोः तन्नो अस्तु त्र्यायुषमिति
कण्ठे दद्यात् यद्देवानां त्र्यायुषमिति अंसयोः तद्धृदि दद्यात् ततश्चाशीर्वादं कुर्यात् ततः शिष्यो गुरुं दण्डवत्प्रणम्य
यथासुखं विहरेत् गुरुरपि यथास्थानं गच्छेत् अन्येभ्योऽपि दीनानाथेभ्यः किंचिद्दद्यात् कुमारीश्च भोजयेत्
तथा चोक्तमागमकल्पद्रुमे ततः सुस्थिरचित्तेन योगवत्स समभ्यसेत् गंगायां गोप्रदानेन दिव्यं वर्षशत
त्रयं यत्फलं प्राप्यते नित्यमाराध्याप्नोति तत्फलं कुरुक्षेत्रे गयायां च प्रयागे पुरुषोत्तमे गोसहस्रप्रदानेन
यत्फलं समवाप्यते तदेतद्दत्तिलं पुण्यं प्राप्नोत्येव न संशयः समग्रसमग्रं वो यो दद्यात्पूजितः हरः कदाचि
दपि वा पत्रपुष्पादिकं वक्र किं तीर्थसेवया दानैरन्यैव कुभिरीरितैः आराधनासमर्थस्तु दद्याद्दर्शनसाधनं
यो दानं नैव प्राप्नोति कुर्याद्दर्शी न दर्शनं निस्तारयत देवालं भवाब्धिपततः क्षणात् इति प्रज्ञाविधानेन नम
पेत प्रतिदिनं च यः इष्टावाप्तं ललाम लक्ष्मीमन्ते भूयात्परं पदं देहान्ते क्वाचयो मंत्री उपवासं समाचरेत् तस्य
देवः सदा रुष्टः शापं पतति मूर्धनि दाता गृहीता नो प्यः छेदुपवासः श्रियं हरेत् तस्मादन्नं समश्नीयाद्धवि
ष्यान्नेन पूर्णाकरि अथ संक्षेपदीक्षा मुकुते सर्वतो नवं कुंभं निधाय च। मोदकं गन्धपुष्पाभ्यामर्चितं वस्त्रसंह
तं सर्वौषधि नवरत्न पंचपल्लवसंयुतं मुरामांसी वचा कुष्ठं शैलेयं रजनीद्वयं शटी चम्पक मुस्तं च सर्वौष
धिगणः स्मृतः पृश्निपर्णी प्रमामलाम्लेनेन पञ्चशतावरी गुडूची सहदेवा च महौषधिगणः स्मृतः सुरा
मांसी जटामांसी शैलेयं शैलजं रजनीद्वयं हरिद्रा दारुहरिद्रा पृश्निपर्णी पिप्पली सहदेवा हत कुमारी न
वरत्नं तथा रत्नाद्यौ मुक्तामाणिक्यवैडूर्यगोमेधान्वज्रविद्रुमौ पद्मरागं मरकतं नीलं चेति यथाक्रमं ततो दे
वार्चनं कृत्वा जुहुयादष्टोत्तरशतं जुहुयादिति शक्तिविषयं शिष्यं स्वलंकृतं वेद्यामुपान्तमुपवेशयेत् मंत्रितैः को
ष्णीतोयैः शान्तिकुम्भजलैस्तथा मूलमंत्रेणाष्टोत्तरशतमंत्रितेनाभिषेचयेत् अथ संपादयेन्मंत्रं फलं
शिरसि निधाय प्राणोस्वित्पहस्तार्दद्यात् ततः शिष्योऽर्चयेद्गुरुं यद्भादीनान्तरक्रमः शाक्तमर्थ्यसाक्षतं तद
नुना अभिषिच्याष्टवारं मूलेन केकरं विधायाष्टोत्तरजपेत् करणे उपदेशोत्थ्यं विधिः उपदेशान्तरमाह चन्द्रसू
र्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये मंत्रमात्रप्रकथनमुपदेशः स उच्यते॥

शिष्यं स्नातं पंचगव्यं पाययन्मंत्रवित्तमः कुण्डस्याभ्यासमानीय दिव्यदृष्ट्याविलोकयेत् एवं कुण्डरी
कात्वेन तं शिष्यस्यात्मनि योजयेत् आचार्यस्ततः प्रधानं षड्विधं शोधयेत्क्रमात् ते कलातत्त्वभुव
नाख्यपदा मंत्रपूर्विका शिष्यस्य पादयोश्चिंत्या गुरुणा तु कला इमाः निवृत्तिश्च प्रतिष्ठा च विद्या शांति
स्तथैव च शांत्यतीतेति पंचाथ शोधनक्रम उच्यते कूर्चेन च गुरुः शिष्यं स्पृष्ट्वा कुण्डस्वकेन नेत् नि
लेहृतानां स्वाहायमनुकाध्यानमत्र च शोधयामि हि गौनचमंत्रेणाष्टाहुतीर्जजेत् तत्त्वाधनि विली
नं तत्कलाधानं विविचिन्तयेत् ततो लिंगप्रदेशस्य तत्त्वान्येतानि चिन्तयेत् गाणेशानि च शैवानि त
त्त्वैतानि रसाग्नयः तद्यथा शिवशक्ती च सदाशिवमहेश्वरौ विद्येति पंच शुद्धानि शुद्धाशुद्धानि सप्त च
मायाविद्याकलारागः कालो नियतिरेव च पुरुषश्चाथ शुद्धानि प्रकृतीर्बुध्यहंकृती मनश्चेंद्रियदशकं
तन्मात्राभूतपंचकं अथ वै सर्वतत्त्वानि द्वात्रिंशात्संमितानि तु जीवः प्राणो मनो बुद्धिस्तन्मात्राभूतपं
चकं दशेंद्रियाणि रूपं मंत्रसूर्यसोमाग्नयस्तथा वासुदेव संकर्षणः प्रद्युम्न निरुद्धकः सौराणि भू
ततन्मात्रामनोगर्वेंद्रियाणि च प्रकृतिर्बुद्धिरिति च चतुर्विंशतिसंमिताः दशैव शाक्तितत्त्वानि आत्मा
विद्याशिवा इति शिवाविद्या तथात्मेति चात्मविद्याशिवाः पुनः सर्वतत्त्वं चेति पुनः प्राग्वद्धृदेन होम
येत् तत्त्वाधानं विलीनं तु चिंतयेद्भुवनाध्वनि शिष्यस्य नाभौ चिंत्यानि भुवनानि चतुर्दश तानि क्र
मेण पातालरसातलमहातलं तलातलं च सुतलं वितलं चातलं च भूः भुवः स्वर्महर्जनस्तप
इति क्रमात् सत्यं च भुवनाध्वानं होमाद्धृदस्तु पूर्ववत् विलीनं ध्यानं वर्णाध्वनि विचिंतयेत् अकारादि
लकारांतांश्च वर्णांस्तान् चिंतयेद्धृदि वर्णाध्वानं विलीनं तु पदाध्वनि विचिंतयेत् होमो हृदः प्राग्वदेवात्र ल
लाटे चिंतयेत्ततः पदाध्वानं मूलमंत्रपदवर्णस्वरूपकः पदाध्वानो हृद्धोमादि प्राग्वदेव समाचरेत् मंत्रा
ध्वनि विलीनं तु पदाध्वानं विचिन्तयेत् संपूर्णमंत्रो मंत्राध्वा चिंतयेच्छिष्यमूर्धनि होमो हृदः प्राग्वदेवा
त्र विलीनोयं परे शिवे ब्रह्मरंध्रे स्थिते ध्यायेदेतत्स्यात् षडध्वशोधनं सर्वेस्वष्टाविलीनानां तान् शिवानां
स्वशुद्धजमः ब्रह्मार्पणाख्यमंत्रेण सर्वकर्मार्थसिद्धिदः सुधीः एवं दत्वा गुरुर्दीक्षां कुर्यात्तस्याभिषेचनं वि
नायेनाभिषेकेन साधकः पूर्णबोधनो आचार्यत्वं च नाप्नोति सद्गतिं च समीहितां तस्माद्गुरुः प्रियं शि
ष्यं बोधयित्वाभिषेचयेत् विरच्य विपुलं चक्रं मण्डपेति मनोहरे खारीतोयभृतं कुंभं स्थापयेच्चक्रम
ध्यतः अन्यांश्च कलशांस्तद्वत्सहेमसमन्वितान् दलेषु विविधाः स्थाप्यास्तत्रावाह्येष्टदेवतां अभ्यर्च्य म
ध्यवाह्नेषु सांगावरणदेवताः सप्तर्षींश्च मध्यकलशे मातृवार्णीः प्रपठेदिति सांगांश्च चतुरो वेदान्तत
स्तेन जलेन तु अभ्यषिंचेद्गुरुः शिष्यमिति पूर्णाभिषेचनं देवेभ्यः सर्वतंत्राणि तंत्रेभ्यो मनवस्तथा
यतो यातास्ततः शिष्यं सर्वमंत्रैकभाजनं भवेदाचार्यनामा च कुर्यान्नामान्तरं गुरुः एतादृशस्य
यो दीक्षां गृह्णीयात्स तु सिद्धिभाक् सर्वमंत्रप्रदानेषु समर्थः स तु जायते सर्वदेवा वशास्तस्य वेदयं
प्यात्पुण्याल्विकः एवमेव विधिस्तत्र मार्गे स्याद्दक्षिणाभिधे विशेषस्तत्र तोयानि तीर्थानां हृत्वा पीः
गंगाया यमुनायाश्च सरस्वत्या महोदधेः सिंधुगोदावरीरेवाकावेरीभ्यः ह्रदकात् महेंद्रजायाः सर
यूचर्मण्वत्याश्च पुष्करात् महानद्या देविकायाः क्षिप्रावेत्रवतीजलं कुरुक्षेत्रस्य गण्डक्याः ह्रस्यायाः
मानसस्य च घटे दत्वा जपेन्मंत्रान्नानातंत्रगतानपि अभिषिक्तस्ततैस्तोयैः सिद्धास्ते मनवोऽस्य तु
प्रयोगार्थं तथान्यस्य दानार्थं मध्यवामके मध्यतीर्थे च घटः स्थाप्यः शेषास्तोयचयामताः ये ये आवा

हित्वादेवागुरूणात्तस्याचटे तेनेकुर्वंतस्यान्निध्यं मंत्ररूपाश्च तन्मुखे स्वयंसिद्धेतिवागस्य मूर्द्धानं तैः
वनामयेत् यदर्थं नामितो मूर्द्धा तस्य मस्तु नैसंप्राय: वाममार्गे मुख्यस्य ईदृक् सिद्धो यदा भवेत् सिद्ध
श्चनिरहंकारः सदा दैवततत्परः देवतार्थं यस्यनात्रत्रयं भोगे मनो नच स एव सिद्धो वामस्मादन्यो
निरयभाजनं दरिद्रो दुःखितो मूर्ख इह लोके परत्र च क्रियादीक्षा विधिं कुर्य्याद्यथा शास्त्र्या गुरुः क्षि
तः एतत्तत्त्वं समाख्यातं किमन्यच्छ्रोतुमिच्छथ।

संक्षेपतः क्रियादीक्षाकृतिरियम्

अथैतावत्कर्तुमशक्तानामाचार्यः प्रागुक्तनवहस्तमंडपे मंडपकरणाशक्तौ प्रशस्ते क्षा-
चिह्नहेस्तु समे भूतले मंडपे च पश्चिमस्थो गुरुः स्वासनस्थः परिक्षिप्य पूर्वतो हस्तद्वयमा
त्र प्राक्प्रत्यगायतं ब्रह्मसूत्रमास्फाल्य तन्मध्ये चिह्नं विधाय तच्चिह्नावलंबनेन हस्तमा
त्रपरिभ्रांत्या वृत्तिं निष्पाद्य तन्मध्यब्रह्मसूत्रं षोडशधा विभज्य प्रागादि पंचदश चिह्ना
नि कृत्वा समांतरालेषु तेषु पूर्वादि चतुर्थसप्तमद्वादशेषु तीर्यक्सूत्रत्रयं दक्षिणोत्तरवृत्त
रेखावधि कृत्वा तेषु मध्यसूत्रस्य दक्षिणोत्तरवृत्तसंधिद्वयमारभ्य पश्चिमसूत्रमध्याद्य
ब्रह्मसूत्रस्य पूर्ववृत्तसंध्यवधि सूत्रं संध्यवधि सूत्रद्वयमारभ्य ब्रह्मसूत्रं मार्जयित्वा सु
समं नवयोनिचक्रं निष्पाद्य तत्र प्राग्वत्कुंभस्थापनादिकं विधाय विश्वेदेवान्ते गुरुरिंद्रेशा
नयोर्मध्ये चतुरस्रमाचार्यकुंडं यथाविधि संस्कृत्याग्निस्थापनादिकं कृत्वाभिषिच्य प्रा
गुक्तविधिना दीक्षां मंडपाभावे गृहे एव कुंडकरणाशक्तौ प्रागुक्तस्थंडिले वाग्निस्थापनां
दि दीक्षांतं सकलं कर्म कुर्यात् अग्निस्थापनेऽपि विस्ताराशक्तौ प्रागुक्तनित्यहोमवि
धिना वाग्निस्थापनं कुर्यात् पूर्वदिनादधिवासनाशक्तौ तस्मिन्नेव दिने सद्योऽधिवास
नं कृत्वा दिनद्वयकर्म कस्मिन्नेव दिने समापयेत् इति सद्योऽधिवासनपक्षे गुरुशिष्य
योर्हुतशेषचरुप्राशनं न स्यात् किंतु प्राशनस्थाने पृथक्त्वाच्चरोराघ्राणं कार्यमिति
शिष्टाचारः अवघ्रेयमेव तत्रैव प्राशितं नैव प्राशितमिति श्रुतेरिति संक्षेपतः क्रि
यादीक्षा ॥ ॥ ॥ ॥ ॥ ॥

अथ प्राकृतक्रियादीक्षाशक्तानां वर्णदीक्षाविधिर्लिख्यते तत्र पुंप्रकृत्यात्मकान् क
कारादिक्षकारान्तान्मातृकावर्णान् पुंप्रकृत्यात्मशिष्यदेहे प्रागुक्तविधिना विन्यस्य पुनः सं
हारक्रमेणैव मूर्धादिहृदयांतस्थं क्षकारं हृदयादिनाभ्यंतस्थे लकारे संहरामि हृदयादि
नाभिपर्यंतस्थं लकारं हृदयादिवामपादाग्रपर्यंतस्थे हकारे संहरामि हृदयादिवामपा
दाग्रपर्यंतस्थं हकारं हृदयादि दक्षिणपादाग्रपर्यंतस्थे सकारे हृदया संहरामि हृदया
दि दक्षपादाग्रावधिस्थं सकारं हृदयादि वामपाण्यग्रावधिस्थे षकारे संहरामि हृदयादि
वामपाण्यग्रावधिस्थं षकारं दक्षिणपाण्यग्रावधिस्थे संहरामि इत्यंयुक्ताशकारव
कारे संहरामीत्यादि मुखवृत्तस्थमाकारं शिरःस्थे अकारे संहरामि सत्तुमुक्तयुक्त्या

वर्णान्संहृत्यपुनस्तच्चैतन्यंसकलतत्त्वग्रामसमेतंपरमात्मनिसंयोज्यविलीनंसंकल्प्यत
त्त्वसमूहंविगलितंनिर्विकल्पंदिव्यतनुंशिष्यंसंचिंत्यपुनःपरमात्मनःसकाशाद।
कारादिक्षकारांतान्वर्णानुत्पाद्यप्रागुक्तसृष्टिन्यासक्रमेणशिष्यदेहेमातृकावर्णान्वि
न्यस्यपुनस्तच्चैतन्यंतत्त्वग्रामसमेतंतस्मिन्संयोज्योक्तविधिनोपदेशंकुर्यात् इति
वर्णदीक्षा अथकलादीक्षा तत्रपादादिजानुपर्यंतंनिवृत्तिकलांजानुतोनाभिप
र्यंतंप्रतिष्ठाकलांनाभितःकंठपर्यंतंविद्याकलांकंठाल्ललाटपर्यंतंशांतिकलांलला।
टात्ब्रह्मरंध्रांशांत्यतीतकलांचशिष्यदेहेसंचिंत्यनिवृत्तिकलांप्रतिष्ठाकलायांसंह।
रामिशांत्यतीतकलानि प्रतिष्ठाकलांविद्याकलायांसंहरामि विद्याकलांशांतिकला।
यांसंहरामिशांतिकलांशांत्यतीतकलायांसंहरामि शांत्यतीतकलांपरमात्मनिसंह।
रामीतिक्रमात्संहृत्यवेधयित्वापुनःपरमात्मनःसकाशाच्छांत्यतीतकलांततःशांतित
तोविद्यांततःप्रतिष्ठांततोनिवृत्तिंचसृष्टिक्रमेणशिष्यदेहेतत्तत्स्थानेसंयोज्योपदेशा
दिकंकुर्यात्इति एवमष्टत्रिंशत्कलाभिर्वाएकपंचाशत्कलाभिर्वाप्रागुक्ताभिरुक्ता
पुक्तसंहारसृष्टिन्यासक्रमेणशिष्यंसंस्कृत्यदीक्षांदद्यात् इतिकलादीक्षा अथस्पर्शदी
क्षा तत्रगुरुःस्वहस्ततलेशिवरूपंस्वकंध्यायन् मूलविद्यांषडंगमंत्रान्मातृकांचजपन्
शिष्यस्यशिरसिस्वदक्षिणकरंनिधायोपदिशेत् इतिस्पर्शदीक्षा अथवाग्दीक्षा त
त्रगुरुःपरचिद्रूपंशिवेचित्तंनिधायतदुद्गतान्समस्तमंत्रान्ध्यायंस्तन्मयःस्वयंशिष्या
यमंत्रानुपदिशेत् इतिवाग्दीक्षा अथदृग्दीक्षा तत्रगुरुःस्वनेत्रेनिमील्यपरमात्मस्व
रूपिणींमंत्रदेवतांध्यात्वाप्रसन्नचित्तोदिव्यचक्षुषाशिष्यंनिरीक्ष्यमंत्रपदेशंकुर्यात्।
इतिदृग्दीक्षा पश्चादुक्तमेतद्दीक्षात्रयंविरक्तानामशक्तानांशिष्याणांतत्त्वविदागुरु
णाकार्यमतिक्षीणांतुवाग्दीक्षादृग्दीक्षावाविहितानान्याः अथवेधदीक्षा तत्रगुरुः
शिष्यस्यमूलाधारेचतुर्दलपंकजमध्यगतत्रिकोणमध्येप्रागुक्तरूपांकुंडलिनींध्या।
त्वानयातत्पार्श्वचतुष्टयमध्यस्थवादिसांतार्णचतुष्टयंतन्मध्यस्थितेकमलासने
संहृत्यतंबहिर्लीनंतदूर्ध्वगतेस्वाधिष्ठानाख्यषड्दलकमलमध्यस्थितेविलोमसंयो
ज्यवेधयित्वानत्यत्रषड्दलमध्यस्थवादिलांतवर्णषट्कंचविलोमसंयोज्यतदूर्ध्वेना।

भिमंडले दशदलात्मके मणिपूरक चक्रे विष्णुं संयोज्य तत्यत्र दशकमलस्था डादिफांत व
र्णदशकसहितं विष्णुं तत्यत्र पंकजमध्यस्थे रुद्रे संयोज्य वेधयित्वा तं रुद्रमनाहताख्ये हृत्प
द्मे कादिठांत द्वादशवर्णाढ्य द्वादशदलयुक्ते संयोज्य तैर्वर्णैः सार्धं तं रुद्रं तन्मध्यस्थितेश्व
रे संयोज्य वेधयित्वा कंठदेशे षोडशस्वराढ्य षोडशदलकमले शुद्धि चक्रे स्थमीश्वरं संपूज्य तैः
स्वरैः सार्धमीश्वरं तन्मध्यस्थिते सदाशिवे संयोज्य विधयित्वा तं सदाशिवं भ्रूमध्यस्थ द्विदलपं
कजमाज्ञा चक्रं नीत्वा तत्यत्र द्वयस्थ्य हक्षवर्णद्वयसहितं सदाशिवं तन्मध्यवर्त्तिनि विन्दौ संयोज्य
वेधयित्वा तं विन्दुं तदूर्ध्वस्थितायां कलायां संयोज्य तां पुनर्नादे नादं नादांते नादांतं सुषुम्नां
ताविष्णुवक्त्रे विषुवक्त्रं गुरुवक्त्रे चेत्युत्तरोत्तरं संयोज्य वेधयित्वा जीवात्मना सहितां कुंडलि
नीं परशिवे संयोज्य वेधयेत् एवं कृते शिष्ये गुर्वाज्ञया छिन्नसंसारपाशो भवति त
तो गुरुः संहृत विपरीतक्रमेण पराशिवात्कुंडलिनीमुत्थाप्य तेयां संहृतमखिलं सृष्टि
क्रमेण शिष्यदेहे तत्तच्चक्रे तां तां देवतां संयोज्य हृदये जीवं मूलाधारे कुंडलिनीं संयो
ज्योपदेशादिकं कुर्यात् ततः संजातदिव्यबोधो भूतभविष्यद्वर्त्तमानज्ञः सदाशि
वो भवति इति वेधदीक्षा